प्रयोगरत्नारंभः

श्रीगणेशाय नमः ॥ श्रीरामं सपरिवारं गणेशं च सरस्वतीं ॥ आश्वलायनतच्छिष्या
न्प्रणम्य पितरं गुरूं ॥ १ ॥ भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ॥ प्रयोगरत्नं कुरुते काश्यां
त्रिष्टिष्टतुष्टये ॥ २ ॥ ग्रंथेस्मिन्गुणगणावलमुच्यते चेत्स्वं ग्रंथं गुणगणवंतमाह को ना ॥ त्व
संतः शिरसि तांजलिं कृत्वा चेद्दोषोच्यते तत्सदसदिहोच्यते भ पायत ॥ ३ ॥ अथ संस्काराः ॥ ते च
ष्टचत्वारिंशत् ॥ तथा च गौतमः ॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं जातकर्म नामक
रणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पंचानां
यज्ञानामनुष्ठानमष्टका पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्री आश्वयुजीति सप्त
पाकसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढ
पशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वा
जपेयोतिरात्रो प्तोर्याम इति सप्त सोमयज्ञसंस्था इत्येते च त्वारिंशत्संस्काराः अष्टावात्मगु
णाः दया सर्वभूतेषु क्षांतिरनसूया शौचमनायासो मंगलमकार्पण्यमस्पृहेति यस्यै

ते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यमाप्नोति ॥ पार्वणः पार्वणस्थाली
पाकः ॥ श्राद्धममावास्यादिः ॥ श्रावणीत त्र कर्त्तव्यं श्रवणाकर्म ॥ आग्रहायणी तत्र कर्त्तव्यं प्र
त्यवरोहणं ॥ चैत्रीति तत्र कर्त्तव्यः शूलगवः ॥ आश्वयुजीत तत्र कर्त्तव्यमाश्वयुजीकर्मेति हरदत्ते
व्याख्यातं ॥ अंगिरसा तु चैकपंचविंशति संस्कारा उक्ताः ॥ पंचविंशतिसंस्कारैः संस्कृता ये द्विजा
तयः ॥ ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः ॥ आदिशब्दाद्यज्ञदानादौ ॥ गर्भाधानं
पुंसवनं ॥ सीमंतो बलिरेव च ॥ बलिर्विष्णुबलिः ॥ जातकृत्यं नामकर्म निष्क्रमोन्नाशनं परं ॥
चौलकर्मोपनयनं तद्व्रतानां चतुष्टयं ॥ तच्छब्देन प्रसिद्धत्वाद्वेदग्रहणे तद्व्रतानां वेदव्रता
नामित्यर्थः ॥ स्नानोद्वाहौ चाग्रयणमष्टका च यथातथं ॥ श्रावण्यामाश्वयुज्यां च मार्गशी
र्ष्यां च पार्वणं ॥ उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः ॥ संस्कारा नियता ह्येते ब्राह्मण
स्य विशेषत इति ॥ श्रावण्यां श्रवणाकर्मादीत्यादि पूर्ववद्व्याख्येयं ॥ नियतानि त्यौः ॥
एतेषां चैकपंचविंशतीनां नैमित्तिकवार्षिकमासिकनित्यभेदेन चातुर्विध्यमाह ॥ आश्वलाय

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

न॥ नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः॥ सप्तैवान्नप्राशनाद्याश्च संस्कारा वार्षिका मताः॥
मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकं॥ महायज्ञास्तु नित्याः स्युः संध्यावच्चादितं प्रव्रजेत्या
ति न विरुध्यते॥ एते च द्विजातीनामेव समंत्रकाः॥ यदाह याज्ञवल्क्यः॥ ब्रह्मक्षत्रियविट्शूद्रा व
र्णास्त्वाद्यास्त्रयो द्विजाः॥ निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रिया इति वै॥ एव अत्र ते
षामेव मंत्रतः क्रिया इति वदन् शूद्रस्यामंत्रकाः क्रिया इति सूचयति॥ अत एव संस्कारा
न्यिकृत्ययम॥ शूद्रोप्येवंविधः कार्यो विना मंत्रेण संस्कृत इति। इति संस्काराः॥ अ
थ स्वस्तिवाचनं। तद्यत्र कर्त्तव्यं तदुच्यते॥ यामः॥ संप्रज्ञ्यगं चमाल्यादौ ब्राह्मणान्स्व
स्तिवाचयेत्॥ धर्मकर्मणि मांगल्ये संग्रामे दुतदर्शने। गृह्यपरिशिष्टे॥ अथ स्वस्ति
वाचनमाद्दिएत्तेषु। क्रदिर्विवाहांतो अपत्यसंस्काराः॥ प्रतिष्ठाद्यापन्ने एत्ते॥ तत्कर्म

णश्चाद्यंतयोः कुर्यादिति आश्वलायनस्मृतिः॥ वैदिके तांत्रिके चादौ नरः पुण्याहमिष्यते॥
शौनकः॥ पुण्याहवाचनविधिं वक्ष्यामि यथाविधि॥ प्रयोक्तुः कर्मणामादावंते चोदयसि
द्धये इति। तच्च प्रयोगांतर्गतमिति केचित्। बहवस्तु प्रयोगबहिर्भूतमिति॥ आद्यपक्षे क
र्मप्रयोगसंकल्पं कृत्वा कार्यं। द्वितीये तु तत्कर्म प्र॥ स्याकर्मसंकल्पः॥ अथ प्रयोगः॥
प्रयोगपारिजातानुसारेणोच्यते। यजमानः कृताभ्यंगादिः स्वलंकृतो दर्भपाणिः शुचि
र्भूत्वा मंगलसंभारं संभृत्य स्वलंकृते गृहे गोमयोपलिप्ते सोत्तरच्छदे भद्रास
ने प्राङ्मुख उदङ्मुखो वा उपविश्य स्वदक्षिणपार्श्वे संस्कार्य उदङ्मुखमुपवेश्य रंगवल्लिकायुक्ते कृ
तले प्रस्थपरिमितस्य शालेस्तदर्धन्यूनस्य वा धान्यस्योपरि दक्षिणोत्तरयोः सुवर्णर
जतताम्रमृन्मयान्यतमकलशद्वयमव्रणं मनोहरमलंकृतं शुद्धपुण्यजलपूरितं

सपल्लवं निधाय पश्चात्तत्रैव स्थिते ताम्रकलशोपरि चरुपात्रं निक्षिप्य तदुपरि सिततंदुलपूरि
3 तं सपल्लवं पात्रं निधाय तत्पश्चिमदेशे प्रभुस्तान्प्रतिवचनसमर्थौ स्तद्दिवसे श्राद्धादि
षभुक्तव्रतो निषिद्धप्रतिग्रहनिवृत्ताः शुचीन्सोत्तरीयान्दर्भपवित्रपाणीन्पुण्यान्ब्रा
ह्मणान्प्राङ्मुखानासनेषूपवेश्य गंधपुष्पादिभिरभ्यर्च्य यथाचारं सुमुखश्चे
त्यादिभिर्गणपतिं स्मृत्वा षोडशोपचारैरभ्यर्च्य उत्तरकलशे देवता आवाहयेत् ॥
तद्यथा ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्र
ह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा ॥ ऋग्वेदो
थ यजुर्वेदः सामवेदो ह्यथर्वणः । अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः । तुष्टि
शांतिश्च गायत्री सावित्री च सरस्वती । आयांतु यजमानस्य दुरितक्षयकारकाः ।

एवमेताः समावाह्य कलशे देवतास्ततः । एतन्मंत्रस्थितान्देवान्संपूज्य प्रार्थयेत्क्रमात् ।
ततः सर्वेषु कालेषु सुसमस्तदेशेषु यत्र योगीश्वरः कृष्णः । अनन्याश्चिंतयंतो मां । स्मृ
ति सकलकल्याणं । सर्वेषामारब्धकार्येषु । सर्वमंगलमांगल्ये । तदेव लग्नमित्यादि यथाचारं प
ठित्वा लक्ष्मीनारायणाभ्यां नमः ॐ दुर्गायै नमः इति प्रणवादि चतुर्थ्यंत नमोंत नाम्नाभि
दुर्गाक्षेत्रपालवास्तुपुरुषमातृपितृनाचार्यानिष्टदेवताः कुलदेवता ग्रामदेव
ताः सर्वा देवताः सर्वान्ब्राह्मणानिति सर्वान्प्रत्येकं नत्वा प्राणानायम्य देशकालौ
स्मृत्वा मुककर्मकर्तुरादौ शुद्धिवृद्ध्याभ्युदयसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं
ब्राह्मणैः सह स्वस्तिवाचनं करिष्ये । इति संकल्पयेत् ॥ ततः सर्वे ब्राह्मणाः प्राङ्मुखा
स्तिष्ठेयुः ॥ तद्दक्षिणतः कर्तोत्तरकलशाभिमुख उदङ्मुख उपविशेत् । कर्तुर्दक्षिणपार्श्वे सं

स्कार्यं उदङ्मुखस्तिष्ठेत्॥ अथ कर्त्ता शिवा आपइत्युक्त्वासौ — मनस्यमस्त्विति वाचयित्वा अक्ष
तमित्युक्त्वा अक्षतं चारिष्टं चास्त्विति वाचयित्वा दक्षिणा इत्युक्त्वा स्वस्ति दक्षिणाः पांतु बहुदे
४ यमस्त्विति वाचयित्वा तं कलशं पूर्ववन्निधाय दक्षिणं जानुं भूमौ निपात्योदङ्मुखः श्र
द्धये त्यादि सूक्तं जपित्वा पुनस्तं कलशमादायोच्छ्रायोदङ्मुखो मनः समाधीयतामित्यु
क्त्वा समाहितमनसः स्म इति तैरुक्ते प्रसीदंतु भवंत इत्युक्त्वा प्रसन्नाः स्म इति तैरुक्ते सर्वैः सहशां
तिरस्तु० इष्टं संपद्यतामिति पंचदश वाक्यान्युक्त्वा स्वयं कर्मदेवतात्मको भवान्प्रजापतिः प्रीय
तामिति रुक्त्वा प्रीयतां भगवान्कर्मदेवतात्मकः प्रजापतिरिति तैर्वाचयित्वा पुण्याहं वाच
यिष्ये इत्युक्त्वा वाच्यतामिति तैरुक्ते। उद्गातेव शकुने० इति ऋचं सर्वैः सह पठित्वा ॐ पु
ण्याहं भवंतो ब्रुवंत्विति मंद्रस्वरेणोक्त्वा ब्राह्मणैरों पुण्याहमिति तथोक्ते पुनरेवं मध्यमस्वरे
णोक्त्वा तथैव तैरुक्ते पुनरेवमुच्चस्वरेणोक्त्वा तथैव तैरुक्ते स्वस्तिनं इंद्रो वृद्धश्रवा इत्यृचं स ६

र्वैः सह पठित्वा ॐ स्वस्तिं भवंतो ब्रुवंत्विति पूर्ववदुक्त्वा स्वस्तीति तथैव तैः प्रत्युक्ते स्वस्त्यमुक
कर्मणे भवंतो ब्रुवंत्विति करिष्यमाणकर्मनाम पूर्ववदुक्त्वा अमुककर्मणे स्वस्तीति तैः
पूर्ववदुक्ते ऋध्याम स्तोममित्यृचं सर्वैः सहपठित्वा ॐ ऋद्धिं भवंतो ब्रुवंत्विति पूर्ववदुक्ते
ॐ ऋध्यतामिति तैस्तथैव प्रत्युक्ते सामान्यः प्राङ्मुख उदङ्मुखो वोपविशेत्। इदं शौनकमते।
गृह्यपरिशिष्टे तु स्वस्त्यमुककर्मणे इत्युत्तरं प्रत्युक्ते ततो विप्राः प्राङ्मुखा उपविश्य
तहृदिकलशोदकं विन्यात् ताम्रादिपात्रे निनीय यजमानं सामान्यमंत्रैरभिषिंचे
युः। ते च मंत्राः। तत्सवितुर्वरेण्यमित्यस्य विश्वामित्रः सविता गायत्री आपो हिष्ठेति
नवर्चस्य सूक्तस्य अंबरीषः सिंधुद्वीप आपो गायत्री पंचमी वर्धमाना सप्तमी प्र
तिष्ठा अंत्ये द्वे अनुष्टुभौ। आ नो भद्रा इति दशर्चस्य राहूगणो गोतमो विश्वेदेवास्त्रिष्टु
प् पंचमी सप्तमी जगत्यः षष्ठी विराट् स्थाना शेषास्त्रिष्टुभः। अपनः शोशुचदघमि

५ त्यप्र्चस्य कुत्सो ग्निर्गायत्री। एतोन्विंद्रमिति त्र्यृचस्य आंगिरसास्तिरश्चिरिंद्रोनुष्टुप्। स्वा
दिष्ठयेति दशर्चस्य विश्वेदेवाः पवमानसोमो गायत्री तरत्समंदीति चतुर्ऋचस्य अ
वत्सारः पवमानसोमो गायत्री। शुचीवोहव्या इतिमंत्रस्य वसिष्ठो मरुतस्त्रिष्टुप्। यदंतिप
रचेति वर्गद्वयस्य आद्यावसिष्ठ ऋषिः शिष्टानामेकादशानां पवित्र वसिष्ठ ऋषी पवमा
नसोमो गायत्री। यत्ते पवित्रमर्चिषीति द्वे अग्निदेवत्ये। उभाभ्यां देवसवितरिति सवितृदे
वत्या। त्रिभिष्ट्वमिति अग्निसवितृदेवत्या। पुनंतु मा मिति विश्वेदेवी। अष्टा यस्वेति पुर
उष्णिक्। पुनंतु मामिति पावमानीरिति पावमानी यो अध्येतीति चानुष्टुभः। अ
ग्निः शुचिव्रततम इति विरूपोग्निर्गायत्री। समुद्रज्येष्ठा इति चतुर्ऋचस्य वसिष्ठ
आपस्त्रिष्टुप्। इमा आपः शिवतमा इत्यनेन ऋचेन देवस्यत्वेति च यजुषा भूर्भुवः स्व
रित्येताभिश्च व्याहृतिभिः कुशाग्रैः सपल्लवैरभिषिंचेयुः। ततस्तु वाद्यध्वनीभि। नीराजनं
कार्यं॥ यथाचारं। ततो ब्राह्मणानां वैदिकमंत्राशिषो ग्राह्याः कर्मांतेपि पुनरेवं का ५

र्यं॥ ॥इति जयंतादि संमतः प्रयोगपारिजातकारप्रोक्तः पुण्याहवाचनविधिः॥ छ॥ अथ
हेमाद्रौ दानकांडे बह्वृचगृह्यपरिशिष्टोक्तमेनोक्तः सकलसाधारणशिष्टाचारप्राप्तश्च पु
ण्याहवाचनप्रयोगः॥ ॥कृतमंगलस्नानः स्वलंकृतः कृताचमनः प्राङ्मुखो यजमानो
वस्त्राद्यादि ते पीठे उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेश्य संस्कार्यं चेत्तथैवोप
लक्ष्मी० वेश्य। ॐ सुमुखश्चैकदंतश्चेत्यादि। शुक्लांबरधरं० अभीप्सितार्थ० सर्वमंगल० सर्वदा सर्व०
सर्वेकालेषु० तदेव लग्नं० यत्र योगीश्व० सर्वेष्वारंभ० इति श्लोकान्पठित्वा। ॐ लक्ष्मीनारा
यणाभ्यां नमः। उमामहेश्वराभ्यां न०। शचीपुरंदराभ्यां०। मातापितृभ्यां नमः। इष्टदे
वताभ्यो न०। कुलदेवताभ्यो०। सर्वेभ्यो ब्राह्मणेभ्यो०। आचमन प्राणायामौ कृत्वा देशकालौ
कीर्तित्वा ममुकफलसिद्ध्यर्थं श्वो वा द्य वामुककर्म करिष्ये। तदंगत्वयादौ पुण्याहवाचनादि
करिष्ये इति संकल्प्य यद्वा। यदा तु प्रयोगाद्बहिर्भूतं पुण्याहवाचनाद्यंगं तदामुकफलसि

१ ग्राम० वास्तु० सर्वेभ्यो देवेभ्यो नमः॥

६ या ओष० अश्वत्थे० कांड० सो० या० क० सहि० हिरण्य० युवा सु० २ गणानां त्वा० त्रि० दु० धि० क्रतु० इम०

५ ध्यर्थं अमुककर्मकर्तुं मंगलभूतमादौ पुण्याहवाचनादि करिष्ये इति प्रत्येकं संकल्पः प्रधान सं
कल्पस्तु सर्वदृत्वात् दिन एव भौवाकार्यः। ततो यजमानः षोडशोपचारैर्गणपतिमभ्यर्च्य प्रा
र्थयेच्च। ततः कर्त्ता स्वपुरतः मही द्यौः पृथिवी च न इति मंत्राव् त्या दक्षिणोत्तरतो भूमिं स्पृष्ट्वा ॐ
ष धयः सं मि ति तत्र्थै व तंडुलपुंजौ कृत्वा आ कलशेषु विशंतिंदु जो परिसलक्षणौ धातुमयौ मृन्म
यौ वा कलशौ निधाय। इमं मे गंगा इति तीर्थजलेन प्रत्येकं पूरयित्वा गंधद्वारामिति गंधं च कल
शयोः प्रक्षिप्य चंदनादिना तावनुलिप्य पुष्पमालाभ्यां भूषितौ तौ कृत्वा पूर्णा दर्वीति सतंडु
लाभ्यां सफलाभ्यां पात्राभ्यां कलशौ पिधानं निधायेत्॥ सर्वत्र प्रतिकलशं मंत्रावृत्तिरुक्ते
रसंस्पृता च। ततस्तत्वा यामि शुनः शेपो वरुण त्रिष्टुप्। कलशे वरुणावाहने विनियोगः। ॐ तत्त्वा
यामीति उत्तरकलशे वरुणमावाहयेच्चंदनादिना पूजयेच्च॥ पुण्याहवाचने चैव यः कुर्यात् कलशा
र्चनं। दक्षिणस्थ स्थिरश्चैव उत्तरस्थश्चर स्तथा। अन्यथा प्रत्यवा नि स्यादिति। ततः उत्तरकलशे देव
ता आवाहयेद्देवं। कलशस्य मुखे विष्णुः ० दुरित क्षय कारकाः॥ ततस्तत्कलशे अक्षतान् निक्षिपेत्॥ ५

सर्वे ब्रा० प्रारब्ध० २ गंधाः० अक्षताः० पुष्पाः० तांबू०

मातृदेवो भव। पितृ० आचार्य० अतिथि ॐ ततः अवनिकृत० धारयित्वा आशिषः प्रार्थयेत। प्रार्थनामाह।
एता आशिषः सत्याः संतु॥ दीर्घा नागा० मा पुरस्तु॥ शिवा आपः संतु। सौमनस्य० अक्षतं चा ॐ दक्षिणाः
बहुदेयं चास्तु। दीर्घमायुः शांतिः० श्रीर्यशो० अत्र सर्वत्र ब्राह्मणैरस्त्विति प्रत्युत्तरं देयं॥ यं कृत्वा सर्व
वेदयज्ञ० भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। विप्राः वाच्यतामिति वदेयुः। एवमुत्तरत्रापि
यथायोगं प्रत्युत्तरं॥ ततो यजमानः भद्रं कर्णेभिः० १० ऋक् १ द्रविणोदाः० ऋक् १ सविता० १ नवो
नवो० १ उच्चा दिवि० १ आपः उदंतु जीवसे० यस्य हृदा कीरिणेति ऋक् यजमानः। संत्वा सिंचामि०
व्रतनियम० मनः समाधीयतां विप्राः समाहित मनसः स्मः यजमानः प्रसीदंतु भवंतः विप्राः प्रसं
न्नाः स्मः। यजमानः। शांतिरस्तु पुष्टिर ॐ उत्तरे कर्माः अविघ्नमस्तु शुभाः शोभनाः संपद्यंतां॥ तिथि
करणमुहूर्तनक्षत्रसंपदस्तु। तिथिकरणमुहूर्तनक्षत्रलग्नाधिदेवताः प्री०। तिथिकरणो० अ
दुर्गा० अग्निपुरोगा १ इंद्रपुरोगा मरुद्गणाः प्री० ब्रह्मपुरो० वेदाः प्री० माहेश्वरी पुरो० उमा मातरः० वसि गन विष्णु दे०
ष्ठ पुरो० ऋषि० अरुंधति पुरोगा एकपत्न्यः प्री० ऋषयश्छंदा० ब्रह्म च० श्री सरस्वत्यौ० श्रद्धा०
४ तुष्टि० रधि० भाति० आयु० आरो० शिवं कर्म० धर्म० वेद० शास्त्र० पुत्र० धन० इष्ट० बाह्यदेशे० अरि० यशो० च० पुत्र० उत्तरे०

भगवत्स्वा० सपत्नीकः ससुतः सपार्षदः सर्वस्थान० हरिहर दि० सर्वाः ग्रा० सर्वा कु० हता ब्रह्म० हताः दरि०

6 भगवतीकात्यायनी प्री०। भ० माहेश्वरी० भ० पुष्टिक० भ० तुष्टिक०। भ० ऋद्धिक०। भ० वृद्धिक० भग
वंतौ हतास्य कर्मणो विघ्नकर्त्तारः। शत्रवः पराभवं० यथैतौ। शिवा आपः संतु। शिवा ऋतवः
सं०। शिवा आग०। शिवा आहु०। शिवा ओषध०। शिवा वनस्प०। शिवा अतिथयः सं०। अहोरा
त्रे० भगवान्पर्जन्य प्री०। प्रीयतां भगवान्स्वामी महासेनः। पुण्याहकालान्वाचयिष्ये। वाच्य
तां। ॐ उद्गातेव शकुनि० ऋ० १ याज्यया मज्जाति० कुरुते। यत्पुण्यं नक्षत्रं तद्वट् कुर्वीतोपकारी स्या
त्। पुण्याह एव कुरुते। तानि वा एतानि यमनक्षत्राणि। यान्येव देवनक्षत्राणि। तेषु कुर्वीत य
कारी स्यात् पुण्याह एव कुरुते। मह्यं० यपेक्षमाणायामुक कर्मणः पुण्याहं भवंतो ब्रुवंतु इ
ति त्रिर्वदेत्। पुण्याहमिति त्रिर्विप्राः। स्वस्तये वायु० ऋ० १ आदित्य उदयनीय इति। स्वस्ति न
इति ऋ० १ अष्टो देवो० यम्तन स्वस्ति। मह्यमित्यादि अमुक कर्मइत्यंतं पूर्ववत्स्वस्ति भवंतो
ब्रुवंत्विति ॐ आयुष्मते स्वस्तीति प्रतिवचनं त्रिः। ॐ ऋ० ध्याम० ऋ० १ सर्वा मे [illegible] दिति 6

ऋ० ध्यामम० १

मह्यमित्यादि अस्य कर्मणः ऋद्धिं भवंतो ब्रुवंत्विति त्रिः। ऋध्यतामिति प्रतिवचनं त्रिः। श्रिये जात
श्रिय० ऋ० १ श्रिय एवैनं तत्० वेद० यस्मिन्ब्रह्मा भ्यज० रम्तता सतो। एतैर्मंत्रैर्नीराजने का
र्य। मह्यमित्यादि पूर्ववदमुक कर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिर्ब्रूयात्। ॐ अ
स्तु श्रीरिति विप्रास्त्रिः। वृषभ्रातं पू० णम स्तु। शिवं कर्मास्तु। गोत्राभिवृद्धिरस्तु। प्रजा
पतिः प्रीयतां। शुक्रेभिरंगै० रजनाः। ऋ० १ तदप्येष श्लोको भिगीत इति०। ततः उत्तरकलशं
दक्षिण० संततनिषिंचेदभिर्मंत्रैः। ॐ वास्तोष्पत इत्यादि अनुष्टुप्यं जपेत्। शिवं शिवं
ततः कर्त्तुर्वामतः पत्नीमुपवेश्य पात्रपातितजलेन पल्लवदूर्वादिभिरुदङ्मुखा विप्रा अ
भिषिंचेयुस्तिष्ठतः। तत्र मंत्राः। समुद्रज्येष्ठा इति चतस्रः। आपं ताभिर्लिति स्त्रः। इमा आपः
शिवतमा इति। ॐ भूर्भुवः स्वः। इद्धि यं वा एतदस्मिंल्लोक इत्यादि ब्राह्मणं। सुरास्त्वा
मभिषिंचंत्वित्यादि पौराणान् श्लोकानपि पठत्यभिषेके। तद्यथा राचणी महइ
२ ति सृणां सर्षय आपो नुष्टुप

स्वस्त्ययनमसीति ऋग्द्वयं पठेत्

तिमंत्रांते अस्मत्ताभिषेकाशिषोस्तिवदेयुः। ततः आचार्याय वस्त्रादिदानं ततस्त्रिभिर्नत्वा।।
एवं बह्वृचपरिशिष्टोक्तं शिष्टाचारप्राप्तं चैकीकृत्य पुण्याहवाचनमुक्तं।। छ।। छ।।
छ।छ।। इतिश्रीविद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसुतनारायणभट्टविरचिते प्र-
योगरत्ने सकलकर्मोपयोगी पुण्याहवाचनप्रयोगः ४।।छ।। ।।छ।।छ।। गर्भाधा-
नादिनामकरणांतकर्माणि हित्वा अन्नप्राशनादिविवाहांतापत्यसंस्कारेषु अ-
न्येषु च नवागारप्रवेशादिशुभेषु कर्मसु सघोंकुरार्पणं कुर्यात्। तच्चैवं।। देशकालौ
स्मृत्वामुकशुभकर्मसाफल्यार्थं निरंतरशुभत्वसिद्ध्यर्थं द्वारा श्रीपरमेश्वरप्रीत्यर्थं अंकुरा-
र्पणं करिष्ये इति संकल्प्य शुद्धभूमिं गोमयेनोपलिप्य रंगवल्ल्यादिभिरलंकृत्य तत्र
त्रासिताक्षतान्प्रकीर्य तेषु विद्भीरं सवेणुपात्रं सूत्रेणावेष्ट्य तदेव पालिकोक्ते

वामदेवो

संस्थाप्य वल्मीकमृद्दर्भं पंकं गोमयचूर्णं च तत्र प्रक्षिप्य पालिकामृत्कले श्वे
ततंडुलैः पूरयित्वा दूर्वांकुरानश्वत्थशिरीषबिल्वपत्राणामुपरि भुजे मुहूर्त्तं तद्वे
णुपात्रं निक्षिप्य तत्र सितरक्तहरिद्वर्णान्पुष्पाण्यवकीर्य मध्यादिपंचस्थाने
षु पंचदेवान्पूजयेत्।। तत्र ब्रह्मजज्ञानं कण्वो ब्रह्मा त्रिष्टुप्।। अनेन पालिका
मध्ये ब्रह्माणमावाहयेत्।। यत इंद्र भयामहे प्रगाथो भर्गो इंद्रो बृहती अनेन पूर्व
भागे इंद्रमावाहयेत्। नाके सुपर्णं भार्गवो वेनो यम त्रिष्टुप्। अनेन पश्चिमे वरु
णं। सोमो धेनुं राहूगणो गोतमः सोमस्त्रिष्टुप्।। अनेनोत्तरे सोममावाहयेत्।। त
तः ॐ ब्रह्मणे नमः आसनमित्यादिक्रमेण षोडशोपचारैः पंचदेवताः सम्यगभ्य
र्च्य पालिकापश्चिमतः प्राङ्मुखः स्थित्वानुपतिष्ठेत् दिशांपतीन्नमस्यामि सर्वका
मफलप्रदान्। कुर्वंतु सफलं कर्म कुर्वंतु सततं शुभमिति। ततः श्वेततंडुलांस्तोयेन प्रक्षाल्य
प्राच्यादिचतुर्दिक्षु कबीजप्रतिनिचितेन संततं वापयेत्। यत इंद्रेत्यादमश्वत्थारोपं

सागर्दि

आप्रागुक्ताः। इतिश्रीनारायणभट्टविरचितेप्रयोगरत्नेसंधोकुरार्पणप्रयोगः। अथाभ्युद
यिकश्राद्धविधिः। तच्चगर्भाधानादिषुगर्भसंस्कारेषुअन्नप्राशनादिषुश्रौतकर्मसुश्र
वणाकर्मादिषुवापीकूपतडागारामाद्युद्यापनादिषुदेवप्रतिष्ठायांवानप्रस्थाश्र
मसंन्याससंस्वीकारेतुलापुरुषादिमहादानादौनवग्रहप्रवेशेमहानाम्न्यादिवे
दव्रतेषुराज्याभिषेकेशांतिकपौष्टिकेषुचसर्वेषुउपाकर्मोत्सर्जनयोः इत्येकेनवीनयो
र्वानयोरन्यत्रापिएवंविधेकार्यं। इदंआभ्युदयिकश्राद्धंवक्ष्यमाणंचमातृपूजनंनैमि
त्तिकस्थानेकसंस्कारेषुएककर्तृकेषुयुगपदुपस्थितेषुसर्वादौसकृदेवतंत्रेणकार्यं। ननु
प्रतिसंस्कारमावृत्त्या। यथादेशांतरगतजातकर्मादिकस्योपनयनकालेजातकर्माद्यनु
ष्ठानेदेशांतरगतस्यमृतबुद्ध्याकृतौर्ध्वदेहिकस्यागतपुनर्जातकर्मादिसंस्काराणां
विहितानांयुगपदनुष्ठानेकर्मनाशाजलस्पर्शादीनांप्रायश्चित्तत्वेयापुनःसंस्कारा
णांयुगपदनुष्ठानेवा। इति कमलाकरः। गणेशः क्षिप्रपाणानांमातृभ्यःपूजनंसकृ
तासकृदेवभवेच्छ्राद्धंमादौनह्यप्यगादिधिः इति। तत्राभ्युदयिकेश्राद्धेकर्तव्येमातृपूजादेव्य

श्वाद्धंविध्यामातरःआदौपूज्याः। तत्रमानुष्यौमातरौषोडशमातृपितामहीप्रपितामह्यःमा
तामहीमातुःपितामहीमातुःप्रपितामहीइतिषट्पितृष्वसामातृष्वसाचेति। अन्याघास्त
थाप्तमद्दुर्गाक्षेत्रगणाधिपाः। ब्राह्म्याद्याः। ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीवाराहीचत
थेंद्राणीचामुंडाःसप्तमातरः। दुर्गाक्षेत्राधिपातिगणाधिपतिश्चपूजयेत्। तथाचकात्यायनः।
कुड्यलग्नांवसोर्धारांपंचधारांघृतेनतु। कारयेत्सप्तवाधाराःनातिनीचांनचोच्छ्रिताः। गौ
ना रीपद्माशचीमेधासावित्रीविजयाजया। देवसेनास्वधास्वाहामातरोलोकमातरः। धृतिःपु
ष्टिस्तथातुष्टिरात्मदेवतयासहेति। आत्मदेवताआत्मकुलदेवता। आयुष्याणिचशांत्यर्थंज
पेत्तत्रसमाहितः। आयुष्याणिआनोभद्राइत्यादीनि। ततःवृद्धिश्राद्धंनवदैवत्यंपार्वणत्र
यात्मकं। तच्चक्रममाहआश्वलायनाचार्यः। मातापितामहीचैवतथैवप्रपितामही। पितृ
८ दयस्त्रयश्चैवमातुःपित्रादयस्त्रयः। एतेनवार्चनीयाःस्युःपितरोभ्युदयेद्विजैरिति। यत्तुवृद्ध
वसिष्ठः। नांदीमुखेविवाहेचप्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकमिति
स्मृत्यर्थसारादौ। वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतेइतिनिछास्त्रांतरविषयं। आ

१० श्वलायनानां तु आनुलोम्येन मात्रादिक्रमेणैव। आश्वलायनार्यचोवचनात्। यत्तु ब्रह्मपुराणे।
पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः। तेभ्यः पूर्वे
त्रयो यत्तु ते तु नांदीमुखाः स्मृताः। इति तन्महालयप्रकरणपठितत्वेपौर्णमासीनिमित्तकश्च।
दर्शविषयं तत्प्रकरणपाठादित्येवं हेमाद्र्यादय ऊचिरे। इह च नांदीमुखसंज्ञकानामत्रादी
नुद्दिष्टत्वात्। विष्णुपुराणे। कन्याविवाहादीननुक्रम्य नांदीमुखान्पितॄन्नांदीतर्पयेत्प्रयतो
गृहीत्युक्तेः। ब्रह्मपुराणे च। जन्माद्यनुक्रम्य पितॄन्नांदीमुखान्नाम तर्पयेद्दिनि[illegible]पूर्व
कामित्युक्तेः। वृद्धपराशरेण तु देवानामपि नांदीमुखविशेषणमुक्तं मंत्र। नांदीमुखेभ्यो
देवेभ्यः प्रदक्षिणं कुशासनमिति।। वृद्धिश्राद्धे च कालः। कर्माहात्पूर्वेद्युरेवानेयमात्स्मा
त्पूर्वपां। कर्माहे वा पितृपार्वणं। कर्माहोत्तराहे मातामहपार्वणमिति।। अस्यासंभवे
पूर्वेद्युरेव सर्वाणि मात्रकं मध्याह्ने पैतृकमपराह्णे मातामहानां।। अस्याप्यसंभवे आ
हव्यूहेन तु। अलाभे श्राद्धकालानां नांदीश्राद्धत्रयं बुधः। पूर्वेद्युरेव कुर्वीत पूर्वाह्णे मा
तृपूर्वकमिति इदं च महत्सु कर्मसु।। अल्पेषु तु कर्माहरेव श्राद्धं। पुत्रजन्मनि तु दि
१०

ल्प

नेवा रात्रौ वा भुक्तवतोपवासिनो वा पुत्रजन्मस्नानानंतरमेव कार्यं। अत्र संकल्पादौ विशेषः। सं
क्रान्ते। शुभाय प्रथमांते न वृद्धौ संकल्पमाचरेत्। न षष्ठ्या पदे वा कुर्यान्महादोषोऽभिजायते। अन
स्मदुद्दिश्यानामरूपाणामगोत्राणां। अनाम्ना चातिलाद्वैश्च नांदीश्राद्धं सव्यवत्।। कारिका
च। संबंधनामरूपाणि वर्जयेद्वृद्धकर्मणि। अत्र सत्यवसू विश्वेदेवौ तत्स्थाने द्वौ विप्रौ मात्रा
दीनां च प्रत्येकं द्वौ द्वौ एवं विंशतिर्ब्राह्मणाः। यद्वा मात्रादीनां त्रयाणां द्वौ द्वौ एवमष्टौ। अत्रना
पसव्यं। तिलस्थाने यवा एव। स्वधास्थाने स्वाहाशब्दः। सव्यजानुनिपातनाभावः। नाम्ना
न्नदानं। प्राङ्मुखएकैव यां प्रदक्षिणमुपचारो ऋजुदर्भैः।। क्रूये। सादपो। विशेषो ग्रंथांतर
तो ज्ञेयाः। पिंडदाने कुलदेशाचारतो व्यवस्था। भविष्योत्तरपुराणे। पिंडनिर्वपणं कुर्यान्न वा
कुर्यान्नराधिप। वृद्धिश्राद्धे महाबाहो कुलधर्माननेक्ष्य तु। पिंडदानपक्षे विशेषो वसिष्ठेनो
क्तः। दधिबदरकर्कन्धुसंमिश्रान्पिंडान्दद्याद्यथाक्रमं। कर्कन्धुर्बदरीफलं। तथा एकैकस्मै पिंडद्व
यं देयं। एकं नाम्ना परं तूष्णीं दद्यात् पिंडद्वयं बुधः इति चतुर्विंशतिमतात्। अन्ये चात्र ब

हवो। केषां ग्रंथांतरतोज्ञेयाः। दाक्षिणात्यानां विस्तरतस्तद्दिश्राद्धाचाराभावान्नेहोच्यंते॥
११ अथाभ्युदयिकेकर्तृनिर्णयः। सायणीये। नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः॥
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं। द्वितीयपाणिग्रहादौ वर एव कुर्यादित्यर्थः। कृत्याय
नः। स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिंडानोद्वाहनात्तेषां तस्याभावे तु त
त्क्रमात्। तेषां सुतानामोद्वाहनात्प्रथमविवाहपर्यंतं पिता स्वपितृभ्यः पिंडान् तदुप
लक्षितं वृद्धिश्राद्धं कुर्यात्। तस्य पितुरभावे तु तस्य संस्कार्यस्य पितृव्यादिः क्रमस्तेन
क्रमेण पितृव्याचार्यमातुलादिः श्राद्धं दद्यात्। न स्वपितृभ्य इति हेमाद्रिणा व्याख्या
तं। जीवत्पितृकस्तु पितुर्मात्रादिभ्यो वृद्धिश्राद्धं कुर्यात्। वृद्धो तीर्थे च संन्यस्ते ताते च
पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः। एतत्साग्निकविषयमित्येके।
विष्णुः। पितरि जीवति यः श्राद्धं कुर्यात्स एषां पिता कुर्यात्तेषां कुर्यात्। पितरि पिता ११

महे च येषां प्रपितामहः। पितरि पितामहे प्रपितामहे च नैव दद्यादिति। आश्वलायन
गृह्यपरिशिष्टे तु। जीवत्पिता सुतसंस्कारे स्वमातृमातामहादेः कुर्यात्तस्यां जीवंत्यां मा
महस्यैव कुर्यादिति॥ अथास्य शिष्टप्रचुराचारपरिगृहीतः संकल्पविधिप्रयोगः॥
उपनयनादिषु महत्सु कर्मसु पूर्वेद्युर्जातकर्माद्यल्पकर्मतदहरेव नांदीश्राद्धं कुर्या
त्। तत्रादौ कर्ता कृतमांगलिकस्नानो धौतवासाः कृतस्वस्त्ययनो नांदीश्राद्ध
पूर्वकं मातृकापूजनं कुर्यात्। तत्र भं। गोमयोपलिप्ये रंगमालादिभिरलंकृते श्राद्धस्य
दक्षिणे प्रतिमास्वक्षतपुंजेषु द्विजातिषु वा यथालाभं संकल्पपूर्वकं मातृपितामहीप्रपि
तामहीमातामहीमातृपितामहीमातृप्रपितामहीपितृष्वसामातृष्वसाद्या
अष्टौ मानुषमातृः यथासंभवं। पूर्वोक्ता विनायकाद्या गौर्यादिषोडशमातृस्तन्त्र ब्रा
ह्म्यादिसप्तमातृन् दुर्गां क्षेत्रपालं गणाधिपतिं च प्रत्येकं कांडानुसमयेनेप

१२ दार्थानुसमयेन वा प्रणवादिनमोंतनाममंत्रैरावाहनादिभिरर्चयेत्। पद्दा०। ॐ गौ
री दिवोऽज्ञामातृभ्यो नमः। ब्राह्म्यादिसप्तमातृभ्यो नम इति संक्षेपेण समुदितरूपेणा
र्चयेत्। तत आ नो भद्रा इत्यादि शतं जीव इत्यादि च सूक्तं पठित्वा नांदीश्राद्धसंकल्पं
कुर्यात्। तत्रोपवीती प्राङ्मुखी। स्तिथ्यादि संकीर्त्य सत्यवसुसंज्ञका विश्वेदेवाः नां
दीमुखाः मातृपितामही प्रपितामह्यः अमुकगोत्रा नांदीमुखाः पितृपिताम
हप्रपितामहाः अमुकगोत्रा नांदीमुखाः मातामहमातुःपितामहमातुःप्रपिता
महाः अमुकगोत्राः सपत्नीकाः एतानुद्दिश्य संकल्पविधानेन नांदीश्राद्धं करि
ष्ये इति संकल्प्य लक्षणलक्षितान्विंशतिसंख्याकान्ब्राह्मणान्पूर्वेद्युः सद्यो वा दि
वपूर्वकं निमंत्र्य कृताभ्यंगस्नानात्स्वर्वाके परिचारकेरा कार्यसंबुध्योक्तानेषां १२

पादान्प्रक्षाल्य प्राङ्मुखानुपवेश्यैषष्ठीविभक्त्योच्चार्य ऋजुदर्भयुग्मान्यासनं प्रदाय
पः प्रदायक्षणं दत्वा द्वितीयया मंत्रक्रमावाहनं च स्रुक्षाल्य रूपदीपाच्छादनाभरणा
नि प्रथमया द्वि द्वि दत्वा मधुरद्रव्यसहितमन्नं भक्तं परिवेष्य पृथिवीते पात्र
मित्याद्युक्त्वा चतुर्थ्यन्तं उक्त्वा स्वाहा हव्यं नमम इति सर्वत्र त्यक्त्वा मधुषु पा
स्मे गायते ति पंचानां काश्यपोऽसितः सोमो गायत्री जपे वि० एताः पंच ऋचः श्रावयि
त्वा तेरुत्तरापोशनादौ कृते हस्तःशुद्ध्यादिकं कृत्वा द्राक्षामलकैः तन्निष्क्रय यवा
दक्षिणां दत्वा मातापितामही चैव तथैव प्रपितामही। पिता पितामहश्चैव तथैव प्र
पितामहः। मातामहस्तत्पिता च प्रमातामहकादयः। एते भवंतु सुप्रीताः प्रयच्छंतु च
मंगलं। इत्युक्त्वा कृतांजलिः संप्रार्थ्य प्रणिपत्य ब्राह्मणान्विसृज्याचम्य गोपादी नि

स्रजेत्। अथात्नोऽपि संक्षिप्तः शिष्टैः क्रियमाणो वृद्धिश्राद्धप्रयोगः। पूर्ववद्गौर्यादीनां
॥१३॥ ब्राह्मणादीनां च पूजां कृत्वा सदूर्वांकुरान्नक्षतान् जलं चादाय सत्यवसुसंज्ञका विश्वे
देवा भूर्भुवः स्वः इदं वः पाद्यं। मातामहमातुः पितामहमातुः प्रपितामहाः नान्दीमुखाः
सपत्नीकाः भूर्भुवः स्वः इदं वः पाद्यं इत्युक्त्वा सर्वत्र पात्रे सदूर्वाक्षतं जलं क्षिपेत्॥ ए
वमेव पुनः सत्यादीन्विश्वान्देवान्मात्रादीन्पित्रादीन्मातामहादींश्च त्रीन् संबुध्यो
क्त्वा पूर्ववद्व्याहृतिभिरिदमासनं गंधाद्युपचारकल्पनं स्वाहा न मम इति दूर्वाक्षतगं
धपुष्पतुलसानि प्रत्येकं पात्रे निक्षिपेत्। ततो विनायकाद्याः गौर्यादिषोडश मातर
श्च भूर्भुवः स्वः इदं दास्यमानं वा युग्मब्राह्मणभोजनपर्याप्तमन्नं यथाशक्ति सो
पस्करं अमृतरूपेण स्वाहा न मम इति दूर्वादीनि निक्षिपेत्। एवं विश्वेभ्यो देवेभ्यो

१३

मात्रादिभ्यः पित्रादिभ्यो मातामहादिभ्यः सपत्नीकेभ्यः संबुध्याद्द्यात्। अन्नासंभ
वे अन्नपदस्थाने इदं दास्यमानं ग्रासोपस्करमामम् इति वदेत्। तच्च चतुर्गुणं द्वि
गुणं समं वा। हिरण्यं हिरण्यप्रतिनिधिभूतं द्रव्यं चेति वदन् दशानां पात्रं संकल्पयेत्॥
एवं दशभ्यः संकल्पयेत्॥ ततः पूर्ववत् उपस्पृश्य आदि पंचर्चं वाचयित्वा कृतस्य
वृद्धिश्राद्धस्य संपूर्णता। सिच्य चार्थं द्राक्षामलके तत्प्रतिनिधित्वेन द्रव्यं वा दक्षि
णां संप्रददे न मम इत्युक्त्वा प्रजापते न त्वदिति मंत्रं जप्त्वा अनेन नान्दीश्राद्धेन नां
दीमुखदेवताः प्रीयतां वृद्धिरस्तु। माता पितामही चैवेत्युक्तं श्लोकद्वयं जपेत्।
ततः आचारतः किंचिद्द्रव्यं इक्षामग्न इति मंत्रं जपन् संकल्प्य पात्रेण संघट्टनेन श्रा
द्धं कुर्यात् इति। ततो मातृका विसर्जयेत्। जीवन्मातृकस्य न मातृपार्वणं। जी

१४ वन्माता मह्स्यन माता मह पार्वपां द्वारलो पात्। जीवसित्वस्कये न्य: पितादघात्ति न्योद घादित्युक्तमेव॥। ॥इति श्रीनारायणभट्टविरचिते प्रयोगरत्ने वृद्धिश्राद्धप्रयोगो निर्णयसहित:॥ ॥अथ कौतुकबंधप्रयोग:। सव प्रचुराचारा भावात् संक्षेपत: सूत्रोक्तादिमात्रं गृह्यसंग्रहे लिख्यते। आचार्यो दर्भमयकूर्चे उदकुंभं निधाय साक्षतकांस्यपात्रे पंचगुणीकृतं कार्पाससूत्रं निधाय तत्समीपे प्राङ्मुखं यजमानमुपवेश्य सकुशहस्त: सहकुंभोदकेन तत्सूत्रं मंत्रैरभिषिंचेत्। ते चैमे मंत्रा:। तत्सवितुर्विश्वामित्र: सविता गायत्री। अग्निमीळे मधुच्छंदा अग्निर्गायत्री। सूत्रप्रोक्षणे विनियोग:। एवमुत्तरत्र। इषे त्वोर्जे त्वा। अग्न आ याहि वीतये। शन्नो देवीरभिष्टये। आपो हि ष्ठेति नवर्चस्य

गा

सूक्तस्यांबरीष: सिंधुद्वीप आपो गायत्री। पंचमी वर्धमाना सप्तमी प्रतिष्ठांत्ये द्वे अनुष्टुभौ॥ एतो न्विंद्रमंगिरस स्तिरश्चिरिंद्रोनुष्टुप्। ऋतं चेति त्र्यृचस्याघमर्षणो भाववृत्तोनुष्टुप्। प्रत्रा चौ यज्ञ्यावाश्वो मरुतो जगती। स्वस्ति नो मिमीतास्वस्त्यात्रेयो विश्वेदेवा स्त्रिष्टुप्। स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुच्छंदा: पवमान सोमो गायत्री। रक्षोहणमिति वैप विंशत्यृचस्य सूक्तस्य भारद्वाज: पायू रक्षोहाग्निस्त्रिष्टुप्। अन्त्याश्चतस्रोनुष्टुभ:। रात्रीव्यख्यदित्यष्टर्चस्य सूक्तस्य सोभर: कुशिको रात्री वा भारद्वाजी रात्रीस्तवं गायत्रं। कृणुष्वेति पंचदशर्चस्य सूक्तस्य वामदेवो हाग्निस्त्रिष्टुप्। तरत्समंदीति चतुर्णां अवत्सार: पवमान सोमो गायत्री। सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायण: पुरुषोनुष्टुप् अंत्या त्रिष्टुप्। विष्णोर्नुकमिति षल्

MEMORIAL
१४

चस्यसूक्तस्य औचथ्यो दीर्घतमा विष्णुस्त्रिष्टुप्। अतो देवा इति षळृचस्यसूक्तस्य
काण्वो मेधातिथिर्विष्णुर्गायत्री। परो मात्रयेति सप्तर्चस्य सूक्तस्य मैत्रावरुणो व
१५ सिष्ठो विष्णुस्त्रिष्टुप्। हिरण्यवर्णामिति पंचदशर्चस्यसूक्तस्यानंदकर्दमचिक्ली
तेंदिरासुता ऋषयः। श्रीरग्निर्देवता आद्यास्तिस्रोनुष्टुभः कांसोस्मितेति बृह
ती उत्तरयोस्त्रिष्टुप् अष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः। यज्जाग्रतइत्याद्याः शिव
संकल्पाख्याः षण्मंत्राः परस्तात्खीयाः॥ विहिहोत्रेति पंचर्चस्यसूक्तस्य वामदेवो
गौतमो वायुरनुष्टुप्। मुंचामि त्वेति पंचर्चस्यसूक्तस्य प्राजापत्यो यक्ष्मनाशन
इंद्राग्नी त्रिष्टुप्। अंत्यानुष्टुप्। स्योना पृथिवीति मेधातिथिर्भूमिर्गायत्री। द्रवि
णोदा आंगिरसः कुत्सो द्रविणोदाग्निस्त्रिष्टुप्॥ सविता पश्चाता द्वानाकोलुशो

१५

विश्वेदेवा जगती। स्योनवो मन्वतिरूपा सावित्री चंद्रमास्त्रिष्टुप्। विद्युन्नयापतंतीति पुरू
रवा उर्वशी त्रिष्टुप्। उलूकयातुं। वसिष्ठ इंद्रस्त्रिष्टुप्। पिशंगभृष्टिमंदेवो दासिः पुरुरूप
इंद्रो गायत्री। एतैः सर्वैर्मंत्रैस्सूत्रमभिमंत्र्य। जातवेदसे मारीचः कश्यपो जातवेदोग्निः। स्त्र
स्त्रिष्टुप्।। अनेन गंधेन सूत्रं विलिप्य। विश्वेत्ता ते भार्गवो नेम इंद्रो जगती। अनेन पुंसो दक्षि
णहस्ते बध्नीयात्। अग्ने जातः कण्वः पवमानः सोमस्त्रिष्टुप्। अनेन स्त्रिया वामहस्ते ब
ध्नीयात्। ततो आचार्यो ऋत्विजश्च यजमानस्य मंत्रैः रक्षां कुर्युः। ते च मंत्राः। ब्रातंजी
वेति द्वयोः प्राजापत्यो यक्ष्मनाशन इंद्रस्त्रिष्टुबंत्यानुष्टुप्। येयज्ञेनेत्यष्टर्चस्यसू
क्तस्य मानवो नाभानेदिष्टो विश्वेदेवा आद्याश्च तस्रो जगत्यः पंचम्यनुष्टुप् षष्ठी बृह
ती सप्तमी सतो बृहती अष्टम्यनुष्टुप्। त्र्यंबकं। वासिष्ठो रुद्रोनुष्टुप्। एतैर्मंत्रैः रक्षायां

१६ स्तायांयजमानःकृतकर्मसाद्गुण्यार्थंआचार्याय ऋत्विग्भ्यश्चयथाशक्तिदक्षिणां द
द्यात्। अन्येभ्योपिरूपसींदद्यादिति॥ ॥इतिश्रीप्र गारत्नेकौतुकबंधप्रयोगः॥ ॥अ
थग्रहयज्ञप्रयोगः॥ ॥सचानित्यनैमित्तिकका म्यभेदेनत्रेधा।अयनविषुवोप
नो रागादिषुनित्यः।गर्भाधानादिकर्मप्रारंभेषुनैमि त्तिकः।विपदपवामसंपदादिका
मनास्तुकाम्यः।अत्रमत्स्यः।स्वर्ण्याकरतोक्षेयानि ग्रहरूपादिसाधाकर्मकार्यं॥अ
चार्यः न्यथाविफलं।तदाहाश्वलायनः।रूपवर्णायुधपुर यानमंडलासनवाहनाहृ॥स
मिकुंडोपहारांश्चपुरस्तात्कृतीरपि।गायत्री ह्कमंत्रांश्चनाममंत्रांश्चकेव
कान्।अधिप्रत्यधिदेवानांमंत्रांश्चेष्यादिसंपु तान्।तत्तन्मूर्तीश्चजानीया
ह्रोषन्नचेन्नवग्रहान्।अस्तालेवपुमान्निह्रातं फलंनैवाविंदति।दुःखंप्राप्नोति देव
चा
१६

सुनरुद्धत्वादिस्थाप्यवित्पमानिति।गायत्रीग्रहायप ोगप्रयोगेवक्ष्यते।वर्णादयश्च
।मंडपकुंडादिचकाम्येयथोक्तंकार्यं।नित्यनैमित्तिकयो स्तुनित्यं।नित्यनैमित्तिकंहि
खासर्वमन्यत्समंडपमितिमत्स्योक्तेः।कुंडेवास्थंडिले। वितिआचार्योक्तेश्च।मंडपल
क्षणंहेमाद्रौमत्स्यपुराणे।ग्रहस्योत्तरेपूर्वेणमंडपंक ारयेद्बुधः।रुद्रायतनभूमौवाच
तुरस्रमुदक्प्लवं।दशहस्तानष्टौवाहस्तान्कुर्या द्विधोनतः।तस्यद्वाराणिचत्वारि
कर्तव्यानिविचक्षणैः।कुंडंचस्कंदपुराणे।नवग्रहमखेकुं हस्तमात्रंसमंततः।चतुरस्रम
ध्योहस्तयोनिवक्त्रंसमेखलं।चतुरंगुलविस्तारोमेखला नाहदुच्छ्रिताः।मात्स्ये।वितस्तिमा
त्रायोनिःस्यात्षट्सप्तांगुलविस्तृता।कूर्मपृष्ठोन्नता मध्येपार्श्वयोश्चांगुलोच्छ्रिता।
गजोष्ठसदृशीतद्वदायताछिद्रसंयुता।मेखलोपरिसर्व त्रअश्वत्थदलसंनिभा।गजोष्ठ
तुल्याअश्वत्थदलतुल्यावेतिविकल्पः।साचयोनिः पश्चिमतःकार्या।पश्चिमेमध्य

भागेतुयोनिंकुर्याद्विद्यानतः। इतिगर्गोक्तेः। स्यैमो। मानहीनाधिकंकुंडमनेकभयदंभ
१७ वेत्। तस्माद्गोत्तरएवं तुस्थंडिलंहस्तमात्रकं। त्रिवप्रंचतुरस्रंचवितस्त्युच्छ्रायसंयुतं। स्थं
डिलंवेदिः। वप्रमेखलौ। द्विरंगुलोच्छ्रितोवप्रः प्रथमःसमुदाहृतः। अंगुलोच्छ्रायसंयुक्तंवप्र
द्वयमथोपरि। व्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबुधैरिति। अन्यत्सर्वंवर्णादेशानामादि
प्रयोगेस्पष्टीभविष्यति। अथग्रहयज्ञप्रयोगः॥ ॥यजमानःस्नात्वा। नित्यकर्मनिर्वर्त्य
मोहूर्तिकोक्तेकालेदेशकालौसंकीर्त्य अयनादित्यकालेषुसंकल्पयेत्। ग्रहानुकूल्यसि नि
द्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्ये। विपदपगमादिकामनायांतुअमुकेका
मनासिद्धिद्वारापरमेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्येइति। ततःसंभारान्संभरेत्। अत्रनि
त्यनैमित्तिकयोःप्रतिपदोक्तवस्तूनितदभावेनुकूल्यरूपाणिवायथाशक्तिसंपादयेत्।
काम्येतुप्रतिनिध्याभावात्प्रतिपदोक्तवस्तून्येव। ततः आचार्यादिवरणं। तत्रवि
४ गर्भाधानादिषुअमुककर्मकर्तुआदावादित्यादिग्रहानुकूल्यार्थंग्रहयज्ञंकरिष्ये॥ १८

धिज्ञंस्वशाखाविदंसदाचारमेकंअस्मिन्गृहमखेत्वमाचार्यकंकुर्विति पाणिनापाणि
मुपसंगृह्यवृणुयात्। अन्यानार्त्विज्यंकुर्विति प्रत्येकंवृणुयात्। तेचहोमानुसारेणचत्वा
रोष्टौषोडशवा। तेचकरिष्यामीत्युक्त्वा आचामेयुः। ततोयजमानस्तान्यथाशक्त्यार्च
येत्। ततआचार्यःकर्मसंकल्पपूर्वकंगृहानुत्तरतएशानेवास्तायांचतुर्दिक्षुहस्त
मात्रायतायांचतुरस्रांद्व्यंगुलप्रमाणत्रिभूमिकायांग्रहवेद्यायांशुक्लव्रीहितंडुलै
सकर्णिकमष्टदलंअंबुजमुल्लिख्यकर्णिकायांदलेषुचवर्तुलादिग्रहपीठानितत्त
द्वर्णाक्षतैर्यथोपपन्नैर्वाकुर्यात्। तानीत्थं। मध्येरक्ताक्षतैर्वर्तुलं। आग्नेयद
लेशुक्लाक्षतैश्चतुरस्रं। दक्षिणदलेरक्ताक्षतैस्त्रिकोणं। ईशानदलेहरिताक्षतै
र्बाणाकारं। उत्तरदलेहरिताक्षतैर्दीर्घचतुरस्रं। पूर्वदलेशुक्लाक्षतैःपंचकोणं। प
श्चिमदलेकृष्णाक्षतैश्चापाकारं। नैऋत्यदलेकृष्णाक्षतैःशूर्पाकारं। वायव्यद

१ इंद्रं पीठानि कुर्यात् कलशस्थापनं। २ मंत्रस्तु स्वस्त्ययने लिखितः।

के चित्राक्षतैर्ध्वजाकारभित्तिं तेते दीव्यां रंगवल्लिकारं जितपद्मोपरि रच्य तच्चान्यपीठे
१८ नवग्रहप्रणमकाष्ठकं तैजसं मन्मयं वानुलिप्तमकं कृतं शुभमभिषेककुंभं निधाय इ
मं मे गंगे इत्यस्य सिंधुक्षित्प्रैयमेधो नदीस्तुतिर्जगती। अनेन पुण्यजलैः पूरयित्वा नवसू
त्रेण वस्त्रयुग्मेन वा वेष्टय हयगजवल्मीक - कृदगोष्ठराजद्वारचतुष्पथमृदः उ
द्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति कुं
भे निक्षिप्य रुवति मी मइत्यस्य वैश्वामित्रो रेणुः पवमानसोमो जगती। अनेनाम्य
ग्रोधाश्वत्थप्लक्षजंबूचूतवृक्षत्वचः प्रवो यक्षेष्वित्यस्य वासिष्ठो विश्वेदेवास्त्रिष्टुप्।
अनेन तत्पंचपल्लवान्निक्षिप्य। आप्यायस्व समेतु त इत्यस्य राहुगणो गोतमः सोमो
गायत्री। अनेन गोक्षीरं। दधिक्राव्ण इत्यस्य गोतमो वामदेवो दधिक्रावानुष्टुप्।
अनेन दधि॥ शुक्रमसि ज्योतिरसि घृतं। गंधद्वारेत्यस्यानंदः श्रीरनुष्टुप्। अने १८

तेजोसीति

४ आपो हिष्ठेति सूक्तं स्वस्त्ययनप्रकरणे लिखितं॥

नेति मयं। गायत्र्या विश्वामित्रः सविता गायत्री। अनया गोमूत्रं च निक्षिप्य। सहिरत्नानी
त्यस्य श्यावाश्वः सविता गायत्री। अनेन नवरत्नानि। या ओषधीरित्यस्याथर्वणो भिष
गोषध्यो नुष्टुप्। अनेन सर्वौषधानि। तदभावे दर्भमूलानि तदभावे सुवर्णं वा गंगाद्य
राभितिगं च निक्षिप्य सर्वे समुद्राः ० गंगे च यमुने चेति इमं मे गंगे यमुने इत्येतैर्मंत्रैः आपो
हिष्ठेति नवर्चस्य सूक्तस्याम्बरीषः सिंधुद्वीप आपो गायत्री। पंचमी वर्धमाना सप्तमी प्र
तिष्ठा त्ये द्वेनुष्टुभौ अनेन सूक्तेन। नहि ते क्षत्रमित्याद्यैकविंशत्यृचा भाजी गौर्त्तिः। शुनःशे
पो वरुण आद्या दश त्रिष्टुभौ। शिष्टा गायत्र्यो भिः। स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुछं
दाः पवमानसोमो गायत्री। अनेन सूक्तेन च तं कुंभं अभिमंत्रयेत्॥ यद्वा ॥ कलशाभि
अ मंत्रणेन्यमंत्रांविदं नियुंजीत। ततः कर्मसंकल्प्य विघ्नेशं स्वस्तिवाचनं कृत्वा ग्रहवे
दिपद्मपीठे यथास्थानं यथामुखी ग्रहप्रतिमाः स्थापयित्वा दक्षिणवामपार्श्वयोरधि

देवताप्रत्यधिदेवतेतद्दक्षिणपार्श्वेस्थापयेत् ॥ तदभावेपुष्पाक्षतादिष्वावाहयेत् । तत्रा
यंप्रकारः । व्यस्तसमस्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजप्रजापतयऋषयः
अग्निर्वायुःसूर्यःप्रजापतयो देवताः गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि । ॐ भू
रादित्यंआवाहयामि ॥ ॐ भुवआदि० । ॐ स्वरादित्यं० ॐ भूर्भुवस्वरादित्यं० । आ
कृष्णेनेत्यस्य हिरण्यस्तूपः सविता त्रिष्टुप् । आकृष्णेनेतिमंत्रमुच्चार्य भगवन्ना
दित्यमहाधिपतेकाश्यपगोत्रकलिंगदेशेश्वरजपापुष्पोपमांगद्युतेद्विभुजपद्मा
भयहस्तसिंदूरवर्णांबरमाल्यानुलेपनज्वलन्माणिक्यरत्नखचितसर्वांगाभरण
भारणेभास्करतेजोनिधेत्रिलोकप्रकाशकत्रिदेवतामयप्रवर्तेनमस्तेसन्नद्धारूपाद्धं
जपताकोपशोभितेनसप्ताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छाग्निरुद्रा
भ्यांसहपद्मकर्णिकायांताम्रप्रतिमायांप्राङ्मुखोवर्तुलपीठेधितिष्ठपूजार्थंत्वांआवाहयामी

तिआवाहयेत् । तद्दक्षिणपार्श्वे ॐ भूरादित्याधिदेवमग्निमावाहयामि ॥ ॐ भुवरादित्या० ।
ॐ स्वरादित्या० ॐ ॐ भूर्भुवस्वरादित्याधिदेव० अग्निंदूतमित्यस्यकाण्वोमेधातिथि
रग्निर्गायत्री । इमंमंत्रमुच्चार्य पिंगभ्रूश्मश्रुकेशपिंगाक्षत्रिनयनंअरुणवर्णछाग
स्थंसाक्षसूत्रंसप्तार्चिषंसप्तधरवरदहस्तद्वयमादित्याधिदेवमग्निं० तद्वामपार्श्वे ।
भूरादित्यप्रत्यधिदेवंरुद्रमावाहयामि । भुवरादित्य० स्वरादित्यप्र० ॐ भूर्भुवःस्वरादित्य
प्रत्य० । त्र्यंबकमित्यस्यवासिष्ठस्त्र्यंबकोनुष्टुप् । इमंमंत्रमुच्चार्य त्रिलोचनंपंचवक्त्रंवृषा
रूढंकपालशूलखट्वांगधारिणंचंद्रमौलिंसदाशिवंआदित्यप्र० तद्दक्षिणपूर्वद
के । ॐ भूः सोममावाहयामि । ॐ भुवः सोम० ॐ स्वः सोम० । ॐ भूर्भुवःस्वःसोम० । आप्या
यस्वेत्यस्यगोतमः सोमोगायत्री । इमंमंत्रमुच्चार्य भगवन्सोमद्विजाधिपते सुधामयशरी
रात्रिगोत्रयमुनादेशेश्वरगोक्षीरधवलांगकांतद्विभुजगदावरदानांकितकरशुक्लांब

रमाल्यानुलेपनसर्वांगमुक्तमौक्तिकाभरणरमणीयसमस्तलोकाप्यायकदेवतास्व
धमूर्ते नमस्ते सन्नद्धधवलध्वजपताकोपशोभितेन दशाश्वेताश्वरथवाहनेन मेरुं
२० प्रदक्षिणीकुर्वन्नागच्छाद्रिरूमया च सह पश्चाग्नेयदलमध्ये स्फटिकप्रतिमां प्रत्यङ्मु
खीं चतुरस्रपीठे स्थितिं पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे पूर्ववद्व्यस्तसम
व्याहृत्युच्चारणानंतरं अप्सुमहत्यस्य सिंधुद्वीप आपो गायत्री। इमं मंत्रमुच्चार्य स्त्रीरूप
धारिणीः श्वेतवर्णाः मकरवाहनाः पाशकलशधारिणीः त्रिदशपूजिताः मुक्ताभरणभू
षिताः सोमाधिदेवता आप आवाह०। वामपार्श्वे। व्यस्तसमस्तव्याहृत्युच्चारणानंतरं
गौरीर्मिमाय इत्यस्य दीर्घतमा उमा जगती इमं मंत्रमुच्चार्य अक्षसूत्रकमलदर्पणकमंड
लुधारिणीं त्रिदशपूजितां सोमप्रत्यधिदेवतामुमामावाहयामि। अथ दक्षिणदले पूर्व
वत् व्याहृत्युच्चारणानंतरं अग्निर्मूर्धेत्यस्य विरूप अंगारको गायत्री। इमं मंत्रमुच्चार्य
भगवन्नंगारकोन्याकृते भारद्वाजगोत्रावंतिदिशेश्वर ज्वालापुंजोपमाकृते चतुर्भुज
शक्तिशूलगदाखड्गधारिन् रक्तांबरमाल्यानुलेपनभूषाकाभरणभूषिते सर्वांग दुरा

MEMORIAL

२०

लोकदीप्तेन नमस्ते सन्नद्धारक्तध्वजपताकोपशोभितेन रक्तमेषरथवाहनेन मेरुं प्रदक्षि
णीकुर्वन्नागच्छ भूस्कंदाभ्यां सह पश्चाद् दक्षिणदलमध्ये रक्तचंदनप्रतिमां दक्षिणामु
खीं त्रिकोणपीठे स्थितिं पूजार्थं त्वामावाह० तद्दक्षिणपार्श्वे व्याहृत्युच्चारणानंतरं स्यो
ना पृथिवीत्यस्य मेधातिथिः पृथिवी गायत्री। इमं मंत्रमुच्चार्य शुक्लवर्णां दिव्याभरणभू
षितां चतुर्भुजां सौम्यवपुषं चंद्रांशुसदृशां धारां रत्नपात्रं सस्यपात्रं औषधिपात्रं पद्मो
पेतकरां चतुर्दिग्भागपृष्ठगतां अंगारकाधिदेवतां भूमिमावा०। तद्वामपार्श्वे व्याहृ
त्युच्चारणानंतरं कुमारश्चित्पितरमित्यस्य गृत्समदः स्कंदस्त्रिष्टुप्। इमं मंत्रमुच्चार्य
षण्मुखं शिखंडकविभूषणं रक्तांबरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं
चतुर्भुजमंगारकप्रत्यधिदेवतां स्कंदमावा०। ततः प्रागुत्तरदले पूर्ववद्व्याहृत्युच्चारणा
नंतरं उद्बुध्यध्वमित्यस्य बुधः सौम्यस्त्रिष्टुप्। इमं मंत्रमुच्चार्य भगवन् सौम्याकृते सर्व

२९
प
विकु

स्थानमथात्रिगोत्रमध्यदेशेश्वरकुंकुमवर्णं गद्युते चतुर्भुजखड्गखेटकगदावर
दानांकितपीतांबरमाल्यानुलेपनमरकताभरणालंकृतसंबोगविनुच्यमतेनम
स्तेसन्नद्धपीतपताकाशोभितेनचतुःसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नाग
च्छविष्णुपुरुषाभ्यांसहपयेशानदलेमध्येसुवर्णप्रतिमामुदङ्मुखींबाणाकारपीठेधि
तिष्ठपूजार्थंत्वामावा०।ततस्तत्पार्श्वयोरधिप्रत्यधिदेवतयोरावाहनं।व्याहृतीरुक्त्वा
इदंविष्णुरित्यस्यकाण्वोमेधातिथिर्गायत्री।सहस्रशीर्षेत्यस्यनारायणःपुरुषो
नुष्टुप्।इमौमंत्रावुच्चार्यकौमोदकीपद्मशंखचक्रोपेतचतुर्भुजसौम्याधिदेवतांवि
ष्णुमा०।प्रत्यधिदेवतांपुरुषमावा०।उत्तरदलेपूर्ववद्व्याहृत्यनंतरंबृहस्पतेअतीत्य
स्यगृत्समदोबृहस्पतिस्त्रिष्टुप्।इमंमंत्रमुच्चार्य।भगवन्बृहस्पतेसमस्तदेवता
चार्यांगिरसगोत्रसिंधुदेशेश्वरदीप्तसुवर्णसदृशांगदीप्तचतुर्भुजदंडकमंडल्वक्ष
सूत्रवरदानांकितपीतांबरमाल्यानुलेपनपुष्परागमयाभरणारमणीयसम

२९

स्तविद्यापतेनमस्तेसन्नद्धपीतपताकोपशोभितेनपीताश्वरथवाहनेनमेरुंप्र
दक्षिणीकुर्वन्नागच्छेंद्रब्रह्मभ्यांसहपद्मोत्तरदलमध्येसुवर्णप्रतिमामुदङ्मु
खींदीर्घचतुरस्रपीठेधितिष्ठपूजार्थंत्वामावा०।तद्दक्षिणपार्श्वेव्याहृत्युच्चा
रणानंतरंइंद्रश्रेष्ठानीत्यस्यगृत्समदइंद्रस्त्रिष्टुप्।इमंमंत्रमुच्चार्य।चतुर्दंत
गजारूढंवज्रांकुशधरंप्राचीपतिंनानाभरणभूषितंबृहस्पत्यधिदेवतामिंद्र
मावा०।।तद्वामपार्श्वेव्याहृत्यनंतरंब्रह्मणस्पतेब्रह्मपुत्रेत्यस्यविश्वामित्रोब्र
ह्मास्त्रिष्टुप्।इमंमंत्रमुच्चार्यपद्मासनस्थंजटिलंचतुर्मुखमक्षमालास्रु
चपुस्तककमंडलुधारिणंकृष्णाजिनवाससंपार्श्वस्थितहंसंबृहस्पतिप्र
त्यधिदेवतांब्रह्माणमावाह०।प्राग्दलेपूर्ववद्व्याहृत्यनंतरंशुक्रंतेअन्यद्दित्य
स्यभरद्वाजःशुक्रस्त्रिष्टुप्।इमंमंत्रमुच्चार्य।भगवन्भार्गवसमस्तदैत्यगुरोभा

र्गांधवगोत्रभोजकटदेशेश्वररजतोज्वलांगकांतिचतुर्भुजदंडकमंडलवक्षसूत्रवर
२२ दानांकितश्शुक्लांबरमाल्यानुलेपनवस्त्राभरणभूषितसर्वांगसमस्तनीतिनिपुण
मतेनमस्तेसन्नद्धशुक्लध्वजपताकोपशोभितेनशुक्लाश्वसंहितेनरथेनमेरुंप्रदक्षिणी
कुर्वन्नागच्छेंद्राणींद्राभ्यांसहपद्मदलपूर्वमध्येरजतप्रतिमांप्राङ्मुखीपंचकोणपीठस्थि
तेषुपूजार्थंमावा०।तद्दक्षिणपार्श्वेव्याहृत्यनंतरंइंद्राणीप्रास्थितस्यवृषाकपीरिंद्रा
णीपंक्तिः।इमंमंत्रमुच्चार्यसंतानमंजरीवरदानचराक्षसुत्रांशुक्लाधिदेवतामिंद्राणींआ०।
वामपार्श्वेव्याहृत्यनंतरंइंद्रमि[illegible]देवतामतमद्रस्यमेधातिथिरिंद्रःप्रगाथो
बृहती।इमंमंत्रमुच्चार्य।चतुर्दंतगजारूढंवज्रांकुशधरंशचीपतिंनानाभरणभूषितंभार्ग
वमत्याधिदेवतामिंद्रमा०।पश्चिमदलेपूर्ववद्व्याहृत्यनंतरंअग्निरित्यस्यविरिविरिःअ
ग्निरुष्णिक्।इमंमंत्रमुच्चार्यनागवन्हशानेश्वरभास्करतनयकाश्यपगोत्रसुराष्ट्रदेशेश्वर २२

नीरु

कनकवर्णांगकांतेचतुर्भुजचापरूपीकृतपाणीभयांकितनीलांबरमाल्यानुलेपननीलाभर
णभूषणालंकृतसर्वांगसमस्तभुवनभीषणामर्षमूर्तेनमस्तेसन्नद्धध्वजपताकोपशो
भितेननीलाश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छप्रजापतियमाभ्यांसहपद्मप
श्चिमदलमध्येकायसप्रतिमांप्रत्यङ्मुखींचापाकारपीठस्थितेषुपूजार्थंवामा०।त
द्दक्षिणपार्श्वेव्याहृत्यनंतरंप्रजापतेनत्वदित्यस्यहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्।इमंमंत्र
मुच्चार्य।पद्मोपरिस्थितंहंससंस्थंएकवक्रंअक्षमालास्रुवपुस्तककमंडलुसहितंचतुर्भुजं
शानेश्वराधिदेवतांप्रजापतिमा०।वामपार्श्वेव्याहृत्यनंतरंयमायसोममितिसुनुतेत्यस्यप्र
यमोनुष्टुप्।इमंमंत्रमुच्चार्यमहिषासीनंदंडहस्तंरक्तसदंशपाशचरंकृष्णवर्णमहिषारूढंसर्वा
भरणभूषितंशनिप्रत्यधिदेवतंयममा०।प्रत्यग्दक्षिणदलेपूर्ववद्व्याहृत्युच्चार
णानंतरंकयानश्चित्रइत्यस्यवामदेवोराहुर्गायत्री।इमंमंत्रमुच्चार्यनागवन्हरालेपविसोम
मर्दनसिंहिकानंदनपैठीनसिगोत्रबर्बरदेशेश्वरकालकमेघछुतेधूम्रवदनचतुर्

खड्गचर्मशूलवरदानांकितकृष्णांबरमाल्यानुलेपनगोमेदिकाभरणभूषितसर्वांग
२३ सौर्पदेशोद्भव नमस्ते सन्नद्धकृष्णध्वजपताकोपशोभितेन कृष्णसिंहरथवाहनेन मेरुं प्रद
क्षिणीकुर्वन्नागच्छ सर्पकालाभ्यां सह पश्चिमनैऋत्यदलमध्यासीस्व प्रतिमादक्षिणाभिमुखं
शूर्पाकारपीठे तिष्ठ पूजार्थं आवाहयामि । तद्दक्षिणपार्श्वे व्याहृत्युच्चारणानंतरं आ
यं गौरित्यस्य सर्पराज्ञः सर्पो गायत्री । इमं मंत्रमुच्चार्य अक्षसूत्रधरान्कुंडिकाकारपुच्छ
युक्तानेकभोगांस्त्रिभोगान्भीषणाकारान्राहोरधिदेवताः सर्पानावाहयामि । सौम्ये वा पार्श्वे व्याहृ
ती रुक्त्वा परंमृत्योइत्यस्य संकुसुको मृत्युस्त्रिष्टुप् । इमं मंत्रमुच्चार्य करालवदनं नित्यसंभीष
णं पाशदंडधरं सर्पवृश्चिकरोमाणं राहुप्रत्यधिदेवतां कालमावाहयामि । प्रत्यगुत्तरदले पूर्व
वद्व्याहृतीरुक्त्वा केतुं कृण्वन्नित्यस्य मधुच्छंदाः केतुर्गायत्री । इमं मंत्रमुच्चार्य । भगवन्केतो कामरू
पजैमिनिगोत्र मध्यदेशोद्भव धूम्रवर्ण ध्वजाकृते द्विभुज गदावरदानांकितचित्रांबरमाल्यानु
लेपनवैडूर्यमयाभरणभूषितसर्वांग चित्रगात्रेण मुक्तिसन्नद्धचित्रध्वजपताकोपशोभितेन चि
त्रकपोतरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ ब्रह्मचित्रगुप्ताभ्यां सह वायव्यदलमध्यकोस्य प्र २३
मिते

तिमां दक्षिणाभिमुखीं ध्वजाकारपीठे तिष्ठ पूजार्थं सामावा० । तद्दक्षिणपार्श्वे । व्याहृतीरुक्त्वा आ
ब्रह्मजज्ञानमित्यस्य नकुलो ब्रह्मा त्रिष्टुप् । इमं मंत्रमुच्चार्य पद्मासनस्थं जटिलं चतुर्मुखं अक्ष
मालास्रुचपुस्तककमंडलुधरं कृष्णाजिनवाससं पार्श्वस्थितहंसं केत्वधिदेवतां ब्रह्माणमा
वा० । वामपार्श्वे । व्याहृतीरुक्त्वा सचित्र चित्रमित्यस्य भरद्वाज चित्रगुप्तस्त्रिष्टुप् । इमं मं
त्रमुक्त्वा उदीच्यवेषं सौम्यदर्शनं लेखनीपत्रोपेतं द्विभुजं केतुप्रत्यधिदेवतां चित्रगुप्तमा
वाहयामि । अथ कर्मसाद्गुण्यकरदेवतावाहनं शुक्लतंदुलपीठेषु कुर्यात् । शानेर्चाप्रदे
शे व्याहृत्यनंतरं आतूनइत्यस्य कण्वः कुसीदी विनायको गायत्री । इमं मंत्रमुक्त्वा चतु
र्भुजं त्रिनेत्रं गजाननं नागयज्ञोपवीतिनं चंद्रधरं दंताक्षमालापरशुमोदकोपेतं चतु
र्भुजं विनायकमा० । तद्दक्षिणतो व्याहृत्यनंतरं जातवेदसे इत्यस्य कश्यपो दुर्गा त्रिष्टु
प् । इमं मंत्रमुक्त्वा शक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटककपालभुकरंकोपेतदश
भुजां । सिंहारूढां दुर्गां स्वाधिदेवत्यां सुरहारिणीं दुर्गामावा० । तद्दक्षिणतो व्याहृत्यनंतरं क्षे

त्रस्य पतिनेत्यस्य वामदेवः क्षेत्रपतिरनुष्टुप्। इमं मंत्रमुक्त्वा श्याम वर्णं त्रिलोचनमूर्ध्वकेशं सुदं
ष्ट्रोत्कटकुटिलकुटिलाननं नूपुरालंकृतांघ्रिं सर्पमेखलया युतं सर्वांगमतिकुंदक्षुद्रघंटाबद्धगुल्फा
२४ वलंबिकरोटिकामालाधारिणं उरगकोपीनं चंद्रमौलिं दक्षिणहस्तेः शूलवेतालखट्वांगडुंडुभी
न्दधानं वामहस्तेः कपालघंटाचर्मचापान्दधानं भीमं दिग्वाससमसितद्युतिं क्षेत्रपालमा
वा०। तद्दक्षिणतो व्याहृत्यनंतरं क्षाणानिवृत्तिरित्यस्य चितो वायुरुष्णिक्। इमं मंत्रमुक्त्वा। भा
वरूपमपरष्टगतं ध्वजवरंधारिणं धूम्रवर्णं वायुमावाहयामि। तद्दक्षिणतो व्याहृतीरुक्त्वा आ
दित्प्रत्नस्येत्यस्य वत्सो नारिक्षं गायत्री। इमं मंत्रमुक्त्वा नीलोत्पलाभं नीलांबरधारिणं चंद्रार्को
पेतं द्विभुजं षडंगमाकाशमावा०। तद्दक्षिणतो व्याहृत्यनंतरं आश्विनावर्तिरित्यस्य राहूग
णो गोतमो श्विनावुष्णिक्। इमं मंत्रमुक्त्वा प्रत्येकमोषधीपुस्तकोपेतं दक्षिणवामे
हस्तावन्योन्यसंयुक्तौ देहावेकस्य दक्षिणपार्श्वे परस्य मोवा पार्श्वे रत्नभूषणकरं शुक्लां
बरधारिनारीयुग्मोपेतौ देवभिषजावश्विनौ वा०। अथ क्रतुसंरक्षकदेवतावाहनं पू

वा २४

ग्र

र्ववत्तंडलपीठे कुर्यात्॥ तद्यथा। तत्र प्राच्यां दलाग्रे पूर्ववद्व्याहृतीरुक्त्वा इंद्रं वइत्य
स्य मधुच्छंदा इंद्रो गायत्री। इमं मंत्रमुक्त्वा। स्वर्णाभ सहस्राक्षं वज्रपाणिं शचीप्रिय
मिंद्रमावा०। आग्नेयदले व्याहृतीरुक्त्वा अग्निमीळे इत्यस्य मधुच्छंदा अग्निर्गायत्री।
इमं मंत्रमुक्त्वा स्वर्णवर्णं मेषवाहनं अग्निमावा०। याम्यदलाग्रे व्याहृतीरुक्त्वा यमाय सो
यमो ममित्यस्य यमोऽनुष्टुप्॥ रक्तवर्णं दंडधरं महिषवाहनं इंद्राप्रियं यमं मा०। नैरृत्यदला य
ग्रे व्याहृत्यनंतरं मोषुण इत्यस्य घोरः कण्वो निरृतिर्गायत्री। इमं मंत्रमुक्त्वा नील
वर्णं खड्गचर्मधरं ऊर्ध्वकेशं नरवाहनं कालिकाप्रियं निरृतिमावाह०। पश्चिमदला
ग्रे व्याहृत्यनंतरं उरुं राजानमुच्छिन्न इत्यस्य शुनःशेपो वरुणो गायत्री। रक्तभूषणं ना
गपाशधरं मकरवाहनं प[redacted]पिनीप्रियं वरुणमावाहयामि। वायव्यदलाग्रे
व्याहृत्यनंतरं तव वायवित्यस्य आंगिरसो व्यश्वो वायुर्गायत्री। श्यामवर्णं हिमदंडधरं
कृष्णमृगवाहनं जगत्प्राणरूपं मोहिनीप्रियं वायुमावा०। उत्तरदलाग्रे व्याहृत्यनंतरं सो

२५

त्वंनः सोमविश्वतइत्यस्य रहूगणो गौतमः सोमो गायत्री

सोमो धेनुं गौतमः सोमस्त्रिष्टुप्। इमं मंत्रमुक्त्वा। स्वर्णवर्णाभिनीम्बरं कुंतपाणिं अश्ववाहनं
चित्रिणीप्रियं कुबेरमावा०। २ ऐशानदक्षामिव्याहृत्यनंतरं कद्रुद्रायेत्यस्य कण्वो रुद्रो
गायत्री। इमं मंत्रमुक्त्वा शुद्धस्फटिकवर्णं वरदाभयपद्म क्षाक्षसूत्रधरं वृष
वाहनं गौरीप्रियं ईशानमावाहयामि। एवमेकचत्वारिंशद्देवताः आवाहनमंते चतुर्थ्यं
तैः स्वस्वनामभिः क्रमेण पूर्वोक्तद्रव्यैः पुष्पसमर्प० णपर्यंतं ग्रहदेवतापूजां कृत्वा कर्म
साद्गुण्यदेवता क्रतुसंरक्षक देवतावरणं च मक्षयजगं च शातपत्रस्य नपूजयेत्॥
॥ ॥ ६९॥ अथ होमः। स च समिच्चर्वाज्यैः प्रतिद्रव्यं प्रतिग्रहं एकाष्टराभिः सहस्रपरा
भिः राहुतिभिर्निमित्तशास्त्रानुसारेण प्रधानदेशांशेन पार्श्वदेवतानां तदर्धेन
इतरेषां स्वाहांतैर्नामभिस्तत्तन्मंत्रैर्वा पाणि नैव सकृद्वदाने न चरुहोमः॥ तत्रावा
र्यः। प्रत्यगग्नेरासीनः प्राणानायम्य एवं वत्सं कल्प्याग्निमुखं वक्ष्यमाणप्रकारेण प्रा २५

गुक्तलक्षणे कुंडे स्थंडिले वोपलेपनाद्यग्निप्रतिष्ठापनांतं कृत्वा कृत्विगन्वारब्धः समिद्द्वयमादाय
दशोकाले निर्दिश्य वक्ष्यमाणग्रहहोमदेवतापरिग्रहार्थं अन्वाधानं करिष्ये। अस्मिन्नन्वा
हितेऽग्नौ इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवतामादित्यमधिदेवतामग्निं प्रत्यधिदे
वं रुद्रं अर्कसमिच्चर्वाज्यैः। प्रधानदेवं सोमं अधिदेवतामपः प्रत्यधिदेवता गौरीं पलाशसमि
च्चर्वाज्यैः। प्रधानदेवमंगारकमधिदेवतां भूमिं प्रत्यधिदेवतां स्कंदं खदिरसमिच्चर्वाज्यैः॥
प्रधानदेवं बुधं अधिदेवं विष्णुं प्रत्यधिदेवं पुरुषमपामार्गसमिच्चर्वाज्यैः॥ प्रधानदेवं बृ
हस्पतिमधिदेवं इंद्रं प्रत्यधिदेवं ब्रह्माणं अश्वत्थसमिच्चर्वाज्यैः॥ प्रधानदेवं शुक्रं अ
धिदेवतामिंद्राणीं प्रत्यधिदेवमिंद्रं उदुंबरसमिच्चर्वाज्यैः॥ प्रधानदेवं शनैश्चरमधि
देवं प्रजापतिं प्रत्यधिदेवं यमं शमीसमिच्चर्वाज्यैः॥ प्रधानदेवं राहुं अधिदेवं सर्पान् प्रत्य
धिदेवं कालं दूर्वाचर्वाज्यैः॥ प्रधानदेवं केतुमधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कु

४माज्येन

॥२६॥ द्राच वर्ज्यैः। विवक्षितसंख्याकैः पार्श्वदेवताप्रधानदन्नमांन्नेन॥ क्रतुसाद्गुण्यदेवतास्तु वि
नायकं दुर्गां क्षेत्रपालं वायुमाकाशमश्विनौ॥ क्रतुसंरक्षकदेवता वा एनं इंद्रमग्नेय
मं निर्ऋतिं वरुणं वायुं कुबेरमीशानं प्रधानाविन्नाज्येन अग्निं वायुं सूर्यं प्रजापतिं ति
माज्येन लव्रीह्यादिभिर्विवक्षितसंख्याभ्याः॥ सूर्यमाज्येन त्रयोदन्नावारं अग्निं चतुस्त्रिंशद्वाररुद्रं वा ग्रेश
द्वार रन्नोषेणाविष्टकृतमित्यादिवसर्वोयक्ष्ये इत्युक्त्वा भूर्भुवः स्वः स्वाहेत्यन्वाधाय
यप्रजापतयइदन्नममेति उद्देशत्यागौ कुर्यात्॥ ततो बर्हिः संनहनाद्याज्यदर्भाग्रय
निधानांतं कृत्वा लौकिकसिद्धान्नातिलव्रीह्यादिभिः सहाज्यपात्रैः पर्यग्निकृत्वाज्यमुद्वास्य
बर्हिषि निधाय स्रुवं संमार्जनं कृत्वाऽन्नपात्रांतरे त्यान्नावधिश्रितस्य
वेपामिघार्योदगुद्वास्याज्याद्दक्षिणतो बर्हिष्यासाद्य प्रत्यभिघार्याग्न्यलंकरणा २६
ज्यभागांतं कृत्वा क्रमेणादित्यादीन्नानांतेभ्यः एकचत्वारिंशद्देवेभ्य आवाहनोक्तैः

MEMORIAL

तत्तन्मंत्रैः समिच्चर्वाज्यैः प्रागुक्तसंख्याका आहुतीर्जुहुयात्। तत्रायं प्रकारः। समिधं चेत्स्रुक्
तो द्व्यंगुलविहापवेत्मानामिकांगुष्ठैर्जुहुयात्। चरुं गत्यास समं पाणिनैव। आज्यं स्रुवे
णैवा तदभावेऽश्वत्थपर्णेन वा। ततो व्यस्तैः समस्तैर्व्याहृतिभिः प्रभूततिलव्रीहीन्पाणि
नाहुत्वा सूर्यपावकरुद्रानाज्येनजुहुयान्मंत्रैः॥ तेच मंत्राः। सूर्योनइति पंचर्चस्य सूक्तस्य सूर्य
पुत्रश्चक्षुः सूर्यो गायत्री। उदुत्यमिति मंत्रस्य कण्वपुत्रः प्रस्कण्वः सूर्यो गायत्री। नमोमि
त्रस्येति मंत्रस्य सूर्यपुत्रोऽभितपाः सूर्यो जगती। चित्रं देवानामिति मंत्रस्यांगिरसः
सूर्यस्त्रिष्टुप्। उदुद्वेति सुभगइति पंचर्चस्य मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप्॥ त्वमग्ने
प्रथमइत्यष्टादशर्चस्य सूक्तस्यांगिरसो हिरण्यस्तूपोऽग्निर्जगती अंत्याष्टमी षोड
श्यस्त्रिष्टुभः। त्वमग्नेद्युभिरिति षोडशर्चस्य सूक्तस्य गृत्समदोऽग्निर्जगती। कद्रुद्रायेति
षलृचस्य सूक्तस्य घोरः कण्वो रुद्रो गायत्री। त्र्यंतीमा मैत्रावरुणी। इमा रुद्रायतवसे इति एक।

दशार्चस्य कुत्सो रुद्रो जगती। अंत्ये द्वे त्रिष्टुभौ। आ ते पितरिति पंचदशर्चस्य सूक्तस्य गृत्स
२८ मदो रुद्रस्त्रिष्टुप्। एतैरेकोनाशीति मंत्रैः प्रतिमंत्रस्वाहांतैराज्यं हुत्वा पंचरा दिवा दिशां वेधा श्रीः
मारधितैक चत्वारिंशा देवताभ्यो वरुणाय च धूप दीप नैवेद्य फल तांबूलादीन् समर्प्य प्रसी
दंतु भवंतइति तान् संप्रार्थ्य ऋत्विग न्वारब्ध श्वरु तिलव्रीहिरो षेजास्विष्टकृतं हुत्वा इध्मसं
नहनप्रायश्चित्तादि होमशेषं समाप्य यजमानान्वारब्ध आचार्यः पूर्णाहुतिं स्थालीपाके
वक्ष्यमाणप्रकारेण हुत्वा विश्वेदेवेभ्यः संस्रावं हुत्वा पूर्णपात्रं निनीयोपस्थानप्रासरिस्त
रणविसर्जनपरिसमूहनपर्युक्षणाभ्यर्चनैर्पात्रोत्सर्जनादि कुर्यात्। अथ मंडपईशानदे
शे पंचरंगैः स्वस्तिकं कृत्वा चतुष्पादं दीर्घचतुरस्रं सोत्तरछदं तत्र पीठं निधाय तत्रोदग
ग्रान् समस्तकान् हरितदर्भानास्तीर्य तत्र साक्षतं यजमानं प्राङ्मुखमुपवेश्याचार्य ऋत्वि
ग्भ्यः सह मंगलवाद्यघोरभिषेककुंभोदकं पात्रांतरे आदाय प्रत्यङ्मुखः तिष्ठन् सपल्लवाश्वत्थदु २८

१ र्वया कुशाग्रया सहिरण्यपवित्रया सकुशादूर्वापल्लवया सहभकुंतचोयोदकं एषधिरश्लिं
गाभिर्वारुणीभिः पावमानीभिरन्याभिश्च शांति पवित्रलिंगाभिर्गृहाभिषेकमंत्रैः सुरास्त्वा
भिषिंचंत्विति सूक्तेनेमा आपः शिवतमा इति त्र्यचेन देवस्यत्वेति च यजुषा भूर्भुवः स्वरिति च व्याहृति
भिरभिषिंचेत्। ते च मंत्राः। आपो हिष्ठेति नवर्चस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री
पंचमी वर्धमाना सप्तमी प्रतिष्ठा त्ये द्वे अनुष्टुभौ। प्र सम्राजमित्यष्टर्चस्य सूक्तस्याग्नि
र्वरुणस्त्रिष्टुप्। स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुच्छंदाः पवमानसोमो गायत्री।
शं न इंद्राग्नी इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवाः त्रिष्टुप्। पवित्रं ते विततं
इति पंचर्चस्य सूक्तस्यांगिरसः पवित्रः पवमानसोमो जगती। ॥ अथ ग्रहमंत्राः।
ग्रहाणामादिरादित्यो लोकरक्षणकारकः। विषमस्थानसंभूतां पीडां हरतु ते रविः॥१॥
रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः। विषमस्थानसंभूतां पीडां दहतु ते विधुः॥२॥
भूमिपुत्रो महातेजा जगतां भयकृत्सदा। वृष्टिकृद्वृष्टिहर्ता च पीडां ०॥३॥ उत्पातरूपो जगतां च
४ चनस्य देवमादनो वि० दू० प्रसो० अस्यं मः प्रतआग्र चः० पंचवर्गी॥

गुरु:२ बुध:१

र्य

द्रपुत्रो महाद्युतिः ॥ सौम्यप्रियकरो विद्वान्पीडां० ॥४ ॥ देवमंत्री विशालाक्षः सदालोकहितेरतः ॥
अनेकशास्त्रसंपूर्णः पीडां० ॥५ दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः । प्रभुस्ताराग्रहाणां
उ.म.गु: चपीडां० ॥६ ॥ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः । मंदचारः प्रसन्नात्मा पीडांद
२८ हतु शनिः ॥७ ॥ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः । अतनुश्चोर्ध्वकेशश्च पीडांद उ
हतु तमः ॥८ ॥ अनेकरूपवर्णैश्च शतशोथ सहस्रशः । उत्पातरूपो जगतः पीडांदहतु ते
शिखी ॥ ९ ॥ अथ देवमंत्रः । सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्त
थासंकर्षणो विभुः ॥१० ॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते । आखंडलोग्निर्भगवान्यमो
नैरृतिस्तथा । ११ । वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः सर्वे दि
क्पालाः पांतु ते सदा १२ । कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शांतिः
कांतिः पुष्टिश्च मातरः ॥१३ ॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः । आदित्यश्चंद्रमा भौमो बु
धजीवसितार्कजाः ॥१४ । ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः । देवदानवगंधर्वा यक्ष

२८

राक्षसपन्नगाः । ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चा
प्सरसां गणाः । अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि
कालस्यावयवाश्च ये । सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एतास्त्वामभिषि
चंतु सर्वकामार्थसिद्धये । एतैर्मंत्रैः प्रतिमंत्रमभिषिच्य श्रीसूक्तेन हिरण्यवर्णामित्या
दिना इमा आपः शिवतमा इत्येतेन तच्चक्षुर्देवस्य त्वेति यजुषा भूर्भुवः स्वरिति व्या
हृतिभिश्चाभिषिंचेत् ॥ एवमभिषिक्तो यजमानः श्वेताहतवस्त्रं सुगंधं च माल्यं जर
पंचविंशत्यात् । ततआचार्यो दिक्षु विदिक्षु बलीन्सुक्षिप्य सुवासिनीभिर्नीराज
नं कारयेत् । अथ यजमानो ग्रहदेवताभ्यश्चतुर्थ्यंतदेवतानामभिः पुष्पाणि समर्प्य
वाचर्येणाव्याहृत्यु धारणपूर्वकं ग्रहोद्वासनं कारयित्वा आचार्यप्रभृतिभ्यः जपहोमफलं गृ
हीत्वा तेभ्यो दक्षिणां दद्यात् । गौः शंखो रक्तोनड्वान्हिरण्यं पीतवासः श्वेताश्वः कृष्णा गौः कालायसं
हस्ती छागो वेति ग्रहक्रमेण । अत्रान्यून । दक्षिणाभावे दक्षिणायां हिरण्येन समा कार्या । आद्यग

चारा। एतदभावे सर्वेभ्यो यथाशक्ति हिरण्यं दद्यात्। आचार्याय द्विगुणं अन्येभ्यश्च यथा
शक्ति भूयसीं ततः कांस्यपात्रगतमाज्ये रूपं रूपं प्रतिरूपो बभूवेति मंत्रेण स्वकुटुंबस्वप्रतिरू
पं प्रेक्ष्य आज्ये तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं।। आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः। २९
इति मंत्रं पठित्वा तदाज्यं सदक्षिणं ब्राह्मणाय दद्यात्। ततो भूरिदक्षिणां दद्यात् संकल्प्य वा एकस्या
आहुतेरेकं शतस्यैकं सहस्रे वा एकं यथाशक्ति ब्राह्मणान्भोजयिष्ये तेभ्यः शांतिः पुष्टिस्तुष्टि
श्चास्त्वित्याशिषो गृहीत्वा तान्संप्रार्थ्य प्रणिपत्य यस्य स्मृत्येति मंत्रं पठित्वा प्रमादात्कुर्वतां
कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरित्युक्त्वा न्यूनातिरि
क्तादिद्व्यार्थं यथाशक्ति अच्युतानंतगोविंदेति नामत्रयजपं कृत्वा अनेन कर्मफलं श्रीविष्णो
वे समर्पये स्वयं हृष्टमना बंधुभिः सह भुंजीत। अयं चाश्वलायनगृह्य परिशिष्टोक्तो
गृह्ययत्नः आश्वलायनानामेव। बह्वृच्यं नास्वगृह्योक्तं यस्य कर्म प्रचोदितं। तस्य तावति
शास्त्रार्थे कृते सर्वः कृतो भवेदिति वचनात्।। एवमन्येषामपि स्वगृह्यादनुक्तस्त
दास एव। येषां तु गृह्यादौ नोक्तस्तेषां याज्ञवल्क्यादिस्मृत्युक्तो मत्स्यपुराणाद्युक्तो वानु २९

त्रि

ष्ठेयः।। स्मृत्यादेः सदाचारण्यादिकं।। ।।इति श्रीनारायणभट्टकृते प्रयोगरत्ने गृहस्थप्रयोगः
।।छ।। छ।। अथ विवाहोत्तरकर्तव्योपि स्थालीपाकः प्रथममुच्यते।। तत्रांगानामुक्तानामन्येषामपि
दिशोनप्राप्तः। स च विवाहानंतरकर्तव्यगृहप्रवेशनीयहोमोत्तरमाविन्यापौर्णमास्यामारंभणी
यः। न त्वमावास्यायां।। चतुर्थीहोमान्तरागापि पौर्णमासी चेत्तत्रारंभः। यदि चारंभकाले मलमा
स गुरुशुक्रास्तबाल्यवार्धक्य गुरुहणपौषमासादि भवति तदापि प्रारंभः कार्यः।। यानि तु
आरंभनिषेधकानि।। उपरागो धिमासश्च यदि प्रथमपर्वणि। तथा मलिम्लुचे पौषे त्वारंभणमि
ष्यते।। गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे तथेत्यादीनि संग्रहकारादिवचनानि तानि आवश्य
दिनात्स्वकालानुपक्रांतस्थालीपाकादिप्रारंभविषयाणीति प्रयोगपारिजातकारः। तथा चा
परार्कः स्वगार्ग्यवचनमुदाजहार। नामकर्मचतुर्थ्यादि यथाकालं समाचरेत्। अतिपाते सति तथा
प्रशस्ते मासि पुण्यभे इति। इति स्थालीपाकारंभकालः।। अथ पर्वनिर्णयः। पौर्णमासी दर्शश्च पर्व
तत्रान्वाधानं प्रतिपदीष्टिरित्युत्सर्गः। तत्र पर्वचतुर्थांशाः प्रतिपदश्चाद्यास्त्रयोंशाः सूर्योद

योत्तरेमुहूर्त्तत्रये विषमानो यागकालः। स्पर्शास्नानपर्यंतं यत्र पर्वाखंडं तत्र न संदेहः॥ यदि तु
३० खंडपर्वं तत्र निर्णयः॥ अन्वाधानं ततः पूर्वं वा पूर्वं प्रतिपदोः संधौ तदहर्यागः पूर्वेद्युः अन्वाधा
नं॥ मध्यात्परतः संधौ तदहरन्वाधानं परेद्युर्याग इति॥ संधिश्च प्रतिपदो ह्रासवृद्ध्योश्चतुर्थांशप
र्वणि प्रक्षिप्य ज्ञेयः। दृष्टेः पर्वणि समाप्तौ पुनरिष्टिकर्त्तव्यतापत्तेः सा प्रतिपद्येव समापनीया न
क पर्वमध्ये। अपराह्णे संधौ परेद्युः प्रतिपच्चतुर्थांशेपि यागे न दोषः। चंद्रदर्शनदिने इष्टि
निषेधवचनानि निर्णायकानि संभवे योज्यानि॥ यातु पौर्णमासी संगवादूर्ध्वं आवर्त्तना
त्पूर्वं संधिमती सा सद्यस्कालेति तस्यामेव अन्वाधानं यागश्च॥ अथ विकृतौ निर्णयः॥ आ
वर्त्तनेन ततः पूर्वं वा पर्वसंधौ तदहः सादेः प्रकृतियागवत्सापश्वाद्यागयवाग्वादि विकृतिः कार्या॥
परतः संधौ तु विकृतियाग एव संधिदिने प्रकृतिस्तु तदुत्तरदिने इति॥ अथ स्थंडिलकरणा
दिनिर्णयः। तत्र चौलादिहोमो लौकिकाग्नौ पार्वणस्थालीपाकश्च गृह्यकर्माणि होमो गृ
ह्याग्नौ। तत्र लौकिकाग्नौ होमे स्थंडिलकरणादिरग्निप्रतिष्ठापनांतो विधिर्नियतः। गृह्या ३०

ग्निहोमेपि गृहप्रवेशवास्तुहोमअष्टकागवान्वष्टक्यादिषु नियतः॥ प्रायणीयतत्तदसं
भवात्। यदापि समिद्दाहेन अग्निः समारोपस्तदा गृह्याग्निकर्त्तव्येपि स्थालीपा
कादौ नियतः। एतत्सर्वमभिप्रेत्य यत्र क्व च होष्यन्स्यादिति गृह्याकाग्निप्रतिष्ठापनवि
धेर्विषयं प्रदर्शयितुमाह कारिकाकारः। प्रतिष्ठाप्याथ लेखासु होमार्यश्चेद्धविर्न च भु
जं॥ एतदंतं प्रकुर्वीत होष्यन्संस्थापितेनले इति। अन्यथा संस्थापितेन च होष्यन्नितिवि
र्स्यात्। एवं स्थंडिलकरणादिविषयं निर्णीय स्थंडिलादि कुर्यात्। तत्र यजमानः कृ
तनित्यक्रियः प्राङ्मुखो वाग्यतो दिराचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्व
रप्रीत्यर्थं अमुकं कर्म करिष्ये॥ तदंगहोमं कर्त्तुं स्थंडिलादिकिं करिष्ये इति संकल्प्य
गोमयादि लिप्ते शुद्धदेशे शुद्धरूप्यदाईशान्यारंभमुदक्संस्थं चतुरंगुलोन्नतं च
तुरश्रमिषुमितं लिखित्वाद्धसप्तत्यंगुलपरिमितं कंफाकितमष्टादशांगुलविस्तृतं होमाङ्ग

५ मूले भंद दक्षिण हस्तेनोल्लिख्य लेखासु तत्कर्म सुद ...

॥

सारेण तद्दैर्घ्यकं वा न तु न्यूनं प्रत्यग्न्नतं स्थंडिलं कुर्यात् ॥ तद्गोमयेन प्रदक्षिणमुपलि
३१ प्य दक्षिणेऽष्टौ उदीच्यां द्वे प्राच्यां अर्चमित्यंगुल्यो नित्यकाद्दक्षिणोपक्रमामुदक्संस्थां
प्रादेशमात्रां पूर्वे कोले लेखां तस्याद्दक्षिणोत्तरयोः प्रागायते एव रेखे यथाऽसंस्पृष्टे प्रा
देशसंमिते द्वे लेखे लिखित्वा तयोर्मध्ये परस्परमसंस्पृष्टा उदक्संस्थाः प्रागाय
ताः प्रादेशसंमिताः तिस्रः इति षट्लेखा यज्ञियशकलेनाग्नेय्यां निरस्य पाणिं प्रक्षाल्य वा
ग्यतो भवेत् । छेदने भेदने चैव पतिते रौद्रराक्षसे ॥ आत्माभिमर्शने चैव निरस्याप उप
स्पृशेत् ॥ ततस्तैजसेनासंभवे मृन्मयेन वा पात्रद्वयेन संपुटीकृत्य सुवासिन्या श्रोत्रि न
यागाराद्वह्निमाहृत्य तं स्थंडिलादाग्नेय्यां निधाय जुष्टो दम
ना आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् ॥ अग्न्यावाहने विनियोगः । ॐ जुष्टो दमूना अ
तिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्ने अभियुजो विहत्या शत्रूय ३

यतामाभरा भोजनानि ॥ एह्यग्ने राहुगणो गोतमोऽग्निस्त्रिष्टुप् । पिप्पलादोद्धरणे विनियो
गः ॥ ॐ एह्यग्न इह होता नि षीद० इत्यक्षतैरावाह्य घोदनं दूरीकृत्य समस्तव्याहृ
तीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती ॥ अग्निप्रतिष्ठापने विनियोगः । ॐ भूर्भु
वः स्वरित्यात्माभिमुखं स्वपाणिभ्यां प्रज्वलेखा सुतत्कर्म सुकर्महित नामकमग्निमुक
नामकमग्निं प्रतिष्ठापयामीति प्रोक्षिते चनानिप्रक्षिप्यैव पुनश्च मन्त्रा प्रबोध्य ध्यायेदि य
दं ॥ चत्वारि शृंगा वामदेवोऽग्निस्त्रिष्टुप् ॥ अग्निध्याने विनियोगः । चत्वारि शृंगा त्र
यो अस्य० रुद्रतिमे त्राश्रृ ॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः ॥ त्रिपात्प्रसन्न
वदनः सुखासीनः शुचिस्मितः ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ॥ बि
भ्रद्दक्षिणहस्ते स्तु शक्तिमन्नं स्रुचं स्रुवं । तोमरं व्यजनं वामे घृतपात्रं च धारयन् । आत्मा
भिमुखमासीन एवंरूपो हुताशनः ॥ इति ततो यदि समिदादिसमारोपितोऽग्निस्तर्हि
॥

प्रत्यवरोहणानंतरमुक्तिं ०पाक्षी

३२ प्रत्यवरोहणं कार्यं॥ तच्चैवं। प्रत्यवरोहेत्यस्य मंत्रस्य हिरण्यगर्भोऽग्निस्त्रिष्टुप्॥ अग्निप्रत्य-
वरोहणे विनियोगः। ॐ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्।
प्रजां पुष्टिं रयिमस्मासु धेह्यथाभव यजमानाय शंयोः। इति मंत्रेण समारोपिताग्निः स-
मिधस्यापि तेग्नौ प्रक्षिपेदिति। एतदंतस्यापि तेग्नौ होमे कार्यं। नित्यधारितहोमे निर्-
मेनाचरेत्॥ ततः पार्वणस्थालीपाकप्रधानदिनात्पूर्वदिने सद्यस्कालायां पौर्णमास्यां
अशक्तौ वा प्रधानदिन एव प्रातरौपासनं हुत्वान्वाधानं कुर्यात्। तच्चेत्थं। आचम्य
प्राणानायम्य समिद्धयं त्र्ययं वादाय देशकालौ स्मृत्वा ममोपात्तदुरितक्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्ये। तत्रेदानीं पौर्ण-
मासेन यक्ष्ये। दर्शे तु पूर्वसंकल्पिते न दर्शस्थालीपाकेन यक्ष्य इति विशेषः
तत्र देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्यास्मिन्नन्वाहितेग्नौ ३२

MEMORIAL

जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं वाघारदेवते आज्येनाग्नीषोमौ चक्षुषी आ-
ज्येनात्र प्रधानं॥ अग्निमग्नीषोमौ प्रधानदेवते चरुद्रव्येण दर्शे तु अग्निमिंद्राग्नी प्रधा-
नदेवते चरुद्रव्येणेति विशेषः। शेषेण स्विष्टकृतमिध्मसंनहनेन रुद्रमयासमग्निं
देवां विष्णुमग्निं वायुं सूर्यं प्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन विश्वान्देवान्संस्रा-
वेणाज्ञाताज्ञातदोषनिबर्हणार्थं त्रिरग्निं मरुतश्चाज्येन यक्ष्ये। अंगदेवताः प्रधा-
नदेवताः सर्वाः संनिहिताः संतु एवं सांगोपांगेन कर्मणा सद्यश्वो वा यक्ष्ये। सद्यस्काले
तु सद्यो यक्ष्य इति संकल्प्य तूष्णीं समस्तव्याहृतिभिर्वा समिद्धोमं कुर्यात्॥ व्याहृति-
पक्षे तु व्याहृतीनामित्यादि पूर्ववत्। अन्वाधानसमिद्धोमे विनियोगः। ॐ भूर्भुवःस्वा स्व
हेति। प्रजापतय इदं न ममेति त्यागः। तं चाग्निं धारयेत्। संकटे तु तुभ्यं ताद त्यृचाज्यं हुत्वा
समारोपयेत्। तद्यथा। तुभ्यं ता वि विरूपोग्निर्गायत्री। कृतान्वाधानाग्नेः समारोपा-
धिकारार्थं प्रायश्चित्ताज्यहोमे विनियोगः॥ ॐ तुभ्यं ता॰ येमिरे स्वाहा॥ अग्नय इदं न ममेति॥

भः

ततस्त्रिभिस्त्रिभिः कुशादेकैः सव्यपाणिमध्ये दक्षिणं चोपरि कुर्वन्नेकैकं दक्षिणेन तदग्रं कन्यैकैश्च
त्रिसंधिं द्विगुणां रज्जुं कृत्वा पुनर्दक्षिणपाणिमध्ये च सव्यं चोपरि कुर्वन्तथैव त्रिगुणयेत्। अंते
३३ प्रदक्षिणं ग्रंथिं दद्यात्। एवं षट्त्रिंशद्दर्भदलैरेका रज्जुर्भवति॥ ततस्तस्यामुदगग्रायां प्रादे-
शमात्रान्मुष्टिपरिमितान्दर्भानन्यांश्चायतया बर्हिर्द्वैरावेष्ट्य रज्ज्वग्रेण रज्जुमूलं सकृदा-
वेष्ट्य तदग्रं शेषं पूर्ववद्वेष्टितरज्ज्वा अधस्तान्निनीय परिस्तरणार्थदर्भैः सहाग्न्यायतनात्पश्चा-
द्वागेव उपरि निदध्यात्। ततोऽन्यया तादृश्यैव कृतया रज्ज्वा उदगग्रया पालाशं खादिरं वा सं-
भवे शमीवत्थपैः यज्ञियवृक्षसमयमरत्निमात्रं पंचदश दारुकं रध्मं प्रागग्रं सकृदावेष्ट्य
रज्जुमूलं सकृदावेष्ट्य पूर्ववन्निदध्यात्। अत्र चाबर्हिषोर्वेष्टने केचिन्मंत्रान्विदधति
॥ तत्र बर्हिषि। इंद्राणेय सन्नहनं पूषा ते ग्रंथिं ग्रथ्नातु स ते मास्थादिति। इध्मे। पक्षणोरू-
पकं कृत्वा प्राविशास्त्वं वनस्पतीन्॥ अतस्त्वा पंचदशीं चासंनराभिसुसंनता इति एकविंश-
चेत्यत्र पंचदश चेत्यूहेन। अन्ये त्वनूहमाहुः। अपरे तु मंत्रोन पठंति। ततः पत्नी आन्यापत ३३

नालंकरणं कुर्यात्॥ ततो दंपती गंध्यादिभिः स्वशरीरे अलंकृत्य तद्दिने क्रयविक्रय
प्रहासानृतबहुभाषणचौर्यादिव्यसनपर्यंकशयनदंतधावनकरंभकुलध्यस्थकोद्रवचण-
कमसूरवंताकक्षारलवणाकोरदूषकमाषमांसमधुपरान्नोपवासतैलमैथुनादि
वर्ज्यं मंतौदधिघृतपयोभिश्रंहविष्यान्नं दिवैव सकृद्भुंजीयातां॥ श्राद्धकर्त्ता तु श्राद्धशेषं
माषाद्यन्नं भुंजीत। व्रतलोपप्राप्तौ सहसंवेशने वा उपोषितः त्वमग्ने व्रतपा इत्याज्याहु-
तिं जुहुयात्। त्वमग्ने ८ इत्यस्याग्नेः सोग्निर्गायत्री। व्रतलोपदोषपरिहारार्थे आज्यहोमे वि-
नियोगः॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः स्वाहा। व्रतपाग्नये इदं न मम।
यक्षानिर्वापादि पूर्वकं व्रतपाग्नये पार्वणस्थालीपाकेन समानतंत्रेण चरुं प्रधानं नान्यूनं
जुहुयात्। ततः प्रतिपदि प्रातरौपासनं हुत्वाग्निं परिसमुह्य परिस्तरणी यात्। तत्रेत्थं।
अग्नेरष्टांगुलपरिमिते देशे ऐशान्यां दिशमारभ्य प्रदक्षिणं समंतात्सोदकेन पाणि-
ना त्रिः परिसमूह्य पूर्वमुपरि निहितदर्भैः दशांगुलिमिते देशे प्राच्यादिषु परिस्त-

३४ णीपात्॥ तत्र प्राच्यां प्रतीच्यां चोऽग्निर्दर्भाः। अवाच्यामुदीच्यां च प्रागग्राः। पूर्वपश्चात्परिस्त
रणान्त [illegible] योरुपरि दक्षिणपरिस्तरणं। उत्तरपरिस्तरणं तु तदग्रमधस्तात्स्यात्। ते च दर्भा अभि
मतसंख्याः। एकैकस्यां दिशि त्रिचत्वारस्त्येवं षोडश वा। ततोऽग्नेर्दक्षिणतो ब्रह्मासनार्थं उत्तरत
श्च पात्रासादनार्थं [illegible] प्रागग्रान्दर्भान्स्तृणीयात्॥ अग्नेरीशानतः [illegible] स्त्रिं स्रुवायप
रिषिच्य उत्तरास्तीर्णेषु दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण चरुस्थाली प्रोक्षणीपा
दर्वीस्रुवो प्रणीताज्यपात्रे इध्माबर्हिः। धीशूर्पकृष्णाजिनमुलूखलमुसलं चेति द्वे
द्वे उदगपवर्ग प्राक्संस्थं न्यासा सीदमेत्॥ आज्यहोमे तु प्रोक्षणी स्रुवो प्रणीताज्य
पात्रे इध्माबर्हिषी चेत्येतावतामेवासादनं। ततः प्रोक्षणीपात्रमुत्तानं कृत्वा तत्रानं तर्गर्भि
तसाग्र समस्य [illegible] प्रादेशमात्र कुशद्वयरूपपवित्रे निधाय शुद्धाभिरद्भिस्तत्पात्रं पूरयित्वा
रूपेण पात्री व्युत्तानानि कृत्वा इध्मं विस्रस्य सर्वाणि त्रिः प्रोक्षयेत्। उत्तानेन तु हस्तेन ३४

कर्त्तव्यं प्रोक्षणं भवेत्॥ अर्वाचीनेन हस्तेन कर्त्तव्यं स्याद्वोक्षणं॥ मुष्टीकरो
तिथ तोयमभ्युक्षणमितिस्मृतं। ता आपः किंचित्कमंडलौ निक्षिपेदित्येके। तातो
यथोक्तं लक्षणमीशानदिग्गवस्थितं ब्राह्मणमस्मिन्कर्मणि ब्रह्माणं त्वां
वारति तत्पाणिं गृहीत्वा वृणुयात्। ततो ब्रह्मा वृतो स्मीत्युक्त्वा प्राङ्मुखो यज्ञ
ज्ञोपवीती आचम्य समस्तपाण्यंगुष्ठो भूत्वाग्नेर्णाग्निं परीत्य दक्षिणतो
दङ्मुखः स्थित्वा आसनार्थं दर्भं पुमच्छ्येदक्षिणभागस्थमेकं दर्भं अंगुष्ठोप
कानिष्ठिकाभ्यां गृहीत्वा निरस्तः परावसुरिति नैरृत्यां निरस्यापः स्पृष्ट्वा
तु इदमहमर्वावसोः सदने सीदामी [illegible] दङ्मुख एव वामोरूपरि दक्षिणपा
दं संस्थाप्योपविश्य गंधाक्षतादिभिरर्चितः सन्। ॐ बृहस्पते ब्रह्मा ब्रह्म
सदन आशिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स मां पा

हीति जपित्वा सदाय तम्मना एव वर्त्तेत। ततो यजमानः। प्रणीतापात्रमग्नेः प्रत्यङ्नि
धाय तत्र पवित्रे निधायोत्पूताभिरद्भिः पूरयित्वा गंधपुष्पाक्षतान्निक्षिप्य मुख
३५ सममुद्धृत्यानिरुत्तरतो दर्भेषु निधाय पवित्रे गृहीत्वान्यैर्दर्भैराच्छादयेत्॥ ए
ततः प्रत्यगग्नेः शूर्पमुपनिधाय तत्र प्रागग्रे पवित्रे निधाय अग्नये त्वा जुष्टं नि
र्वपामीति मंत्रावृत्त्या व्रीहीणां यवानां वा चतुरो मुष्टीन्निरूप्याग्नीषोमाभ्यां
त्वा जुष्टं निर्वपामीति तथैव निरूप्य ते पवित्रे व्रीहीणामुपरि निधायोत्पूता
भिरद्भिरग्नये त्वा जुष्टं निर्वपामीति निर्वापसंख्यया उत्पूताभिरद्भिः प्रोक्षेत्॥
भ्यां एवमग्नीषोमाभ्यां जुष्टं प्रोक्षामीति तथैव प्रोक्षेत्। दर्शे तु इंद्राग्नीभ्यां त्वा इति
अग्नीषोमपदस्थाने इति विशेषः। एवं नाममंत्रकहोमे निर्वापः प्रोक्षणं च यथाप्रधा
नदेवतं देवतानामग्रहणेनु कार्यं॥ समंत्रकहोमे तु श्रवणाकर्मादौ तूष्णीं चतुर
श्चतुरो मुष्टीन्निर्वपेत् प्रोक्षेच्च॥ ततः पात्राणामुत्तरतः प्रागग्नी कृष्णाजीनमु ३५

र्ध्वलोम्निरूप्य अजिने निहितेनुलूखले मुसलेनावहन्यात्। त्रिः शुक्लीकुर्यात्। तां
स्त्रिः प्रक्षाल्य तान्स्थालीपात्रे एकपात्रे वा अरण्यमनवस्त्राविते अंतरूष्मपकं सु
शृतं चरुं पचेत्। ततः पवित्रे आज्यपात्रे निधाय तत्पात्रं पुरतः संस्थाप्य तस्मिन्नाज्यमा
सिच्याग्नेरुत्तरतः स्थितांगारान्भस्मना सहाग्नेरुदकपरिस्तरणाद्बहिर्निरूह्य तेष्वा
ज्यपात्रमधिश्रित्य ज्वलता दर्भोल्मुकेनाच ज्वाल्य अंगुष्ठपर्वमात्रं प्रक्षाल्य तं दर्भा
ग्रद्वयमाज्ये प्रक्षिप्य पुनर्ज्वलता तेनैव दर्भोल्मुकेन चरुणा सहाज्यं त्रिः पर्यग्नि
कृत्वा तदुल्मुकमपास्यापः स्पृष्ट्वाज्यपात्रं भुवि कर्षन्निवोदगुद्वास्यांगारान्नोत्रस
स्पस्य स्यापः स्पृष्ट्वा तत्रस्थमेवाज्यं। सवितुष्ट्वा हिरण्यस्तूपः सविता पुरउष्णिक्। आज्योत्प
वने विनियोगः। ॐ सवितुष्ट्वा प्रसव० रश्मिभिरिति मंत्रेण कृत्वा वारितेनैकवारं द्वि
स्तूष्णीं उत्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यां ओतयोरसंस्पृष्टगृहीताभ्यामुदगग्र
भ्यां पवित्राभ्यां प्रागुत्पूय ते पवित्रे अद्भिः प्रोक्ष्याग्नौ प्रहरेत्। तूष्णीं स्कंदाय स्वाहे

नी० म० ल

ति मंत्रेणेति केचित्। अथाग्नेः पश्चात्परिस्तरणाद्बहिरात्मनोऽग्रतो स्रुवं प्रोक्ष्य तत्र ब
र्हिः सन्नहनीं रज्जुं उदगग्रां प्रसार्य॥ तस्यां बर्हिः प्रागग्रमुदगपवर्गमाबिरमास्तीर्य तास्मि
॥३६॥ न्नाज्यपात्रं निधाय स्रुवादि संमार्जयेत्॥ तद्यथा। दक्षिणेन हस्तेन स्रुवं स्रुवं गृही
त्वा सव्येन कोशिद्दर्भानादाय सहैवाग्नौ प्रताप्य स्रुवं निधाय दक्षिणहस्तेन स्रुव
स्य बिलं दर्भाग्रैः प्रागादि प्रागपवर्गं त्रिः संमृज्याथ तस्ताद्दर्भमूलेन वाभ्यासं बिलं
।त्रि पृष्ठं त्रिः संमृज्य ततो दर्भाणां मूलैर्दंडस्याधस्तात् बिलपृष्ठादारभ्य यावदुपरिष्टात् बिलं
तावत् त्रिः संमृज्याद्भिः प्रोक्ष्य स्वस्थलं निष्टप्याज्यस्थाल्या उत्तरतः स्रुवं निधाय तं कंसं
त् प्लातैरेव दर्भैः जुहूमेव संमृज्य स्रुवादुत्तरतो निधाय दर्भान् अद्भिः प्रक्षाल्याग्नावनुप्रहरेत्। त्वा
ततः शृतं चरुं स्रुवगृहीतेनाज्येनाभिघार्योदगुद्वास्याग्नेराज्ययोर्मध्येन नीत्वाज्याद्द
क्षिणतो बर्हिषि सांतरमासाद्य पुनरप्यभिघार्य न वाभिघार्येति विः पृथक्करणाय पात्रांतरं
चर्वाज्ययोर्मध्ये निधाय कादर्शांगुलिमितं देशं गंधाक्षतपुष्पैरग्निं समंत्रमर्चयेत्॥ ॥३६॥

तत्र मंत्रो। विश्वानि नस्त्वनयो वसुक्रतोऽग्निस्त्रिष्टुप्। अग्न्यर्चने विनियोगः। विश्वा
नि नो दुर्गहा जात० पर्षि। अग्ने अत्रिवन्न० यस्मोहृदं० जातवेदो०। तत्र आत्मानं चा
क्रं कृत्वा हस्तं प्रक्षाल्य इध्मबंधनरज्जुं इध्मस्थानेन निधाय पाणिना इध्ममादाय मूल
मध्याग्रेषु स्रुवेण त्रिरभिघार्य मूलमध्ययोर्मध्यभागे गृहीत्वा। यं ते वामदेवो जा
तवेदाग्निस्त्रिष्टुप्। इध्माहवने विनियोगः। ॐ अयं त इध्म० समिधचय स्वाहेति इध्ममग्ना इ
वाधाय जातवेदसे अग्नय इदं न ममेति त्यजेत्। ततः स्रुवेणाज्यमादायाग्नेरायतन
स्य वायव्यकोणमारभ्याग्नेयकोणपर्यंतं प्रजापतय इति मनसा स्मरन् स्वाहेत्युच्चार्यनैर
न्तर्येणाज्यधारामग्नावविच्छेदारूपरिहुत्वा पुनराज्यमादाय नैरृत्ये कोणतः ईशानीपर्यं
तं तथैव हुत्वा त्यक्त्वा पुनः स्रुवेणाज्यमादायाग्नये स्वाहेत्यग्नेरुत्तरपार्श्वे पूर्वभागे हुत्वा
पुनराज्यमादाय सोमाय स्वाहेत्यग्निदक्षिणपार्श्वे तत्समप्रदेशे हुत्वा पूर्वं निहितपात्रे चरु
मुद्धृत्य पृथक्कृत्य इदमग्नये इदमग्नीषोमाभ्यामिति चरुभागद्वयमुत्तरसंस्थमभिमृ

सोमाय

स्यावदानधर्मेण जुहुयात् ॥ एवं नाममंत्रकहोमे यथादैवतं विभक्तस्य चरोरभिमर्शः ॥ समंत्रक
३८ होमे तु न विभागाभिमर्शौ स्तः । अथावदानधर्मः । स्रुवेण स्रुच्यामाज्यमुपस्तीर्य प्रथमप्रधानदेवता
चरुभागमध्यादंगुष्ठपर्वमात्रं तिरश्चीनाभिरंगुष्ठमध्यमानामिकाभिरुदग्याभिभिर्नखसंस्प
र्शं मूलं कुर्वन्नवदायावदानं स्रुच्यां निधाय । ततश्चरुपूर्वभागं प्रागग्राभिस्ताभिस्तथैवावदायावदानं निधाय पात्रस्थं ह
विरभिघार्यावदानं स्थमवत्तं चाभिघार्य विधूमाग्निमध्यदेशे वाग्नये स्वाहा इत्याज्यभागयोर्मध्य
देशे निरस्य होमो वा आघारयोर्निर्देशे पार्श्वे वा हुत्वा अग्नये इदं न मम इति त्यागः पुनः पूर्ववदुत्तरहविर्भागादव
दाय ॐ अग्नीषोमाभ्यां स्वाहेति पूर्वाहुतेः प्रागग्नेर्वा अग्नीषोमाभ्यामिदं न ममेति त्यजेत् । पंचावत्ती तु द्व्या
मुपस्तीर्य मध्यात्पूर्वार्धात्पश्चार्धाच्च त्रिर्हविषावदायाभिघार्य जुहुयात् । पंचावत्तिनस्तु जामदग्न्या वत्स
विदा आर्ष्टिषेणा रसश्चैव च । भार्गवश्चावना आर्ष्टिषेणाः पंचावत्तिन ईरिताः ॥ शौनकादयोऽन्ये स्वाहेति वि
शेषः । ततः पुनर्द्व्यामुपस्तीर्य प्रथमहविर्भागस्योत्तरार्धतः पूर्ववदवदानतो भूयो न्यूनांगुष्ठ
मिरवदायावदानं निधाय द्वितीयहविर्भागस्य तथैवावदाय पंचावत्ती तु हविर्भागद्वयेऽपि पुनरुत्तरार्धात्पू
र्वार्धादिद्विरवदाय पात्रस्थमनभिघार्यावत्तं तु द्विरभिघार्य पदस्योति हिरण्यगर्भोऽग्निः स्विष्ट
कृद्देवता त्रिष्टुप् । स्विष्टकृद्धोमे विनियोगः । ॐ यदस्य कर्मणो० समर्धय स्वाहेत्येकश्रुत्या ऋचा ३८

मर्धाग्नावीशानदेशे जुहुयात् । स्विष्टकृतेऽग्नय इदं न ममेति त्यागः । ततो निरुत्तरतः स्थितमिध्मबंधनं जुहुयाद्विरूप
स्परुद्राय पशुपतये स्वाहेति हुत्वापः स्पृष्ट्वा स्रुवेण समस्तप्रायश्चित्ताज्याहुतीर्जुहुयात् । तत्र मंत्राः अया
श्चेति विमदो अयाग्निः पंक्तिः प्रायश्चित्ताज्यहोमे विनियोगः । ॐ अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्य
मित्त्वमया असि । अयासा वयसा कृतोया सन्हव्यमूहिषेऽया नो धेहि भेषजं स्वाहेत्येकश्रुत्या जुहुयात् ॥ अ
ग्नयेऽयस इदं न मम । अतो देवा मेधातिथिर्देवा गायत्री । विनियोगः प्राग्वत् । ॐ अतो देवा० स्वाहा देवेभ्य इदं न मम । इ
दं विष्णुः कण्वो मेधातिथिर्विष्णुर्गायत्री । ॐ इदं विष्णुर्विचक्रमे० । विष्णव इदं न मम । व्यस्तसमस्तव्याहृतीनां विश्वामित्र
जमदग्निभरद्वाजप्रजापतयोऽग्निर्वायुः सूर्यः प्रजापतयो गायत्र्युष्णिगनुष्टुब्बृहत्यः । ॐ भूः स्वाहा । अग्नय इ
दं । ॐ भुवः स्वाहा वायव इदं । ॐ स्वः स्वाहा सूर्याय इदं । ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम । ततो [illegible] कर्ता
रं परीत्याग्नेर्नैरृत्यदेशे तिष्ठन्नेता एव समस्ताहुतीर्जुहुयात् । त्यागं यजमानोऽत्र कुर्यात् । ततस्तत्रस्थो [illegible]
वमंत्रविपर्यासादिनिमित्तनिमित्तसांति । यद्वो देवा अतिपातयानि त्रितः स्वराट् । मंत्रविपर्यासादिनिमित्ते
कप्रायश्चित्ताज्यहोमे विनियोगः । ॐ यद्वो देवा अतिपातयानि वाचा च प्रयुती देवहेडनं । रायो अस्मां
अभिदुच्छुनायतेऽन्यत्रास्मन्मरुतस्तन्निधेतन स्वाहा । यजमानः मरुद्भ्य इदं न मम । अज्ञातज्ञात
मिति मंत्रे हृदयस्य हिरण्यगर्भोऽग्निरनुष्टुप् । ज्ञाताज्ञातदोषनिबर्हणार्थं प्रायश्चित्ताज्यहोमे विनि० ।

३८ ॐ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा। यजमा
नः अग्नय इदं न मम। ॐ पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथा
तथं स्वाहा। यजम० अग्नय इदं०। यत्पाकत्रेत्यस्य वामदेव ऋषिः अग्निर्देवता त्रिष्टुप्। ॐ यत्पाकत्रा मनसा दी
नदक्षा न यज्ञस्य मन्वते मर्त्यासः। अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो
यजाति स्वाहा। यज०। अग्नय इदं न मम०। स्कन्नभिन्नो घ्नियुतनिमित्तेत्स्वतिवक्ष्यमाणप्रकारे
णानन्त्यातिपदोक्तजपहोमान्कुर्यादनुज्ञा। ब्राह्मणोऽभावे यजमानेनैतान्प्रायश्चित्तादीन्कृत्वान्यस्मै
वरं दद्यात्। ततो यजमानः सर्वकर्मप्रपूरणीं भद्रद्व्यदा पूर्णाहुतिं जुहुयात्। तद्यथा। स्रुवेणा
ज्यं गृहीत्वा स्रुचं समबिलीपूरयित्वा तस्यां स्रुचं नम्रधी विलं निधाय एनरजो बिलं निक्षिप्य स्रुव
स्य कुसुमाक्षतं निधाय सव्यपाणिना स्रुक्स्रुवमूले च त्वा दक्षिणपाणिना स्रुवं चाग्रेव मुद्गा गृही
त्वा तिष्ठन्समपातं दद्यात् ऋतुका यः स्रुवाग्रे न्यस्तदृष्टिः प्रसन्नात्मा समुद्रादूर्मिरित्येकादशर्चस्य सू
क्तस्य वामदेव आपस्त्रिष्टुप्। अंत्या जगती। पूर्णाहुतिहोमे विनियोगः। समुद्रादूर्मिरित्यादि म
तं नु तुर्भि स्वाहेति पठन्ने घ व परिमितो धारां संततां स्रुगग्रेण सशेषं हुत्वाग्नये इदं न ममेति त्युहि ३८

MEMORIAL

त्यक्त्वा विश्वोतिषेत्यस्य प्रजानोऽरुषो विश्वेदेवास्त्रिष्टुप्। ॐ विश्वो तिषे बृहते त्यने न च तथैवा ब
र्हि रं हुत्वा अग्नय इदं न ममेति त्यक्त्वा। विश्वेभ्यो देवेभ्यः स्वाहेति संस्रावं हुत्वा विश्वेभ्यो दे
भ्य इदं न ममेति। ततस्तंडक करणात्समिद्गणेश्वाकलान्यद्भिः प्रोक्ष्याग्नौ प्रहरेत्। पूर्णाहुत्या
घेत इदं तं समूलं प्रयोगपारिजातकारेणालिखितमपि इदानीं शिष्टाः न कुर्वंति॥ अथाव
श्यस्य तानीयं पूर्णपात्रजलेन मार्जनं कुर्यात् तत्तद्यथा। पूर्वासादितं पूर्णपात्रमास्तीर्णे
न बर्हिषि दक्षिणपाणिनानिधाय तत्र गंगादिपुण्यनदीः स्मरन्दक्षिणपाणिनास्पृशन् पू
र्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अ
क्षितिरसि मा मे क्षेष्ठा इति जपित्वा कुशाग्रैः प्रागादि पंचदिक्षु जलं मंत्रैर्यथालिंगं सिंचेत्। ते च
मंत्राः। प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां। दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां। प्रती
च्यां दिशि गृहाः पशवो मार्जयंतां। उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां। ऊ
र्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतामित्येकैकस्या पठन्प्रतिदिशं सिक्त्वा कुशा
नैस्वशिरसि मार्जयेत्। तत्र मंत्राः। आपो अस्मान्नित्यस्य देवश्रवा आपस्त्रिष्टुप्। मा

र्जने० ॐ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु । विश्वं हि रिप्रं प्रवहंति देवीरु
दिदाभ्यः शुचिरा पूत एमि । इदमापः सिंधुद्वीप आपोनुदिव्य । मार्जने विं० इदमापः प्रवहत य
३९ त्किंचिदुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं । सुमित्र्या न आप ओषधयः संतु
इत्येतैर्मंत्रैर्मार्जनं कृत्वा दुर्मित्रिया स्तस्मै संतु यो अस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मी
ति निऋतिदेशे कुशाग्रैरपः सिंचेत् । ततो ब्रह्मा यजमानवामपार्श्वे स्थित्वा पत्न्यंजलौ पूर्ण
पात्रस्थजलं० ॐ माहं प्रजां परासिचं या नः सयावरी स्थन । समुद्रे वो निनयानि स्वं पाथो
अपीथेति मंत्रमेकर्ऋत्वा पत्न्या वाचयन् स्वयं वा पठन्प्रत्यङ्मुखं निषिंच्यांजलिस्थजलैः
पापनोदाय मात्मानं यजमानं पत्नीं च प्रोक्षयेत् । पत्नी तज्जलं बर्हिषि निषिंचेत् । अ
थवा यजमानएव स्ववामपाणौ वृत्तोने बर्हिषि निचाय तत्र दक्षिणपाणिना पूर्णपात्रमा
दाय माहं प्रजामित्यनेन तज्जलं प्रत्यङ्मुखं निषिच्य ता आपः समुद्रं गच्छंतीति ध्यात्वा पाणि
स्थजलेनात्मानं पत्नीं च प्रोक्षेत् । ततः कर्त्ताग्नेर्वायव्यां स्थितः संस्थाजपेनोपतिष्ठेत । तद्यथा
३९

अग्ने त्वमिति चतुर्ऋचस्य गोपायनालोपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकैकर्चा ऋ
षयः अग्निर्देवता द्विपदा विराट् छंदः । अग्न्युपस्थाने० । अग्ने त्वं नो अंतम उत त्राता शिवो भ
वा वरूथ्यः । वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः । स नो बोधि श्रुधी हव० । प्रजापु
तेन त्वदेता० । हिरण्यगर्भः समवर्त्तता० ४ । ॐ च मे स्वरश्च मे यज्ञोपचते नमश्च । यत्ते न्यूनं तस्मै
त उपयत्ते ति रिक्तं तस्मै ते नमः । अग्नये नमः । स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं
आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन नो देहि मे हव्यवाहनो नमः । ततो ब्रह्मोपि तत्रैवस्थित्वाग्ने तेरवो
पतिष्ठेत । ततः कर्त्ता आचार्यात्मानस्तोकेति कुत्सो रुद्रो जगती । विभूतिग्रहणे वि० मा नस्तोके० इ
ति स्रुवबिलस्थेन विभूतिं गृहीत्वा ॐ त्र्यायुषं जमदग्नेरिति ललाटे । कश्यपस्य त्र्यायुषमिति कं
ठे । अगस्त्यस्य त्र्यायुषमिति नाभ्यां । यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे । तन्मे अस्तु त्र्या
युषमिति वामस्कंधे । शतायुषमिति शिरसि धारयेत् । कुर्चनोपस्थानात्पूर्वं विभूतिधारण
माहुरिति । ततः कर्त्ता परिस्तरणानि विसृज्याग्निं परिसमुह्य पर्युक्ष्य पुष्पादिभिरलंकृ
त्याग्नेर्वेद्यंतो बर्हिश्च निवेश्य पथोक्तां दक्षिणां दाक्षिणात्याबहुतरां घृतादिसहिरण्यं दद्यात्

४० स्मा ४.। भावेन्यस्मै ब्राह्मणाय त्वा पात्राणि प्रक्षाल्य पूर्वक्रमेण द्वंद्वं पुत्सृज्य यस्य स्मृत्या
च नेन्पुत्वा विष्णुं नत्वाचम्य एतत्पवित्रग्रंथिं विस्रस्य शुद्धे देशे क्षिपेत्। दर्शे तु अग्निषोम
पदस्थाने इंद्राग्नी। इतरत्सर्वं समानं। तच्च दर्शितमेव। सद्यस्कालायां पौर्णमास्यामगत्या
यत्र वा पागोदिन एव प्रातर्होमानंतरं अन्वाधायेष्ट्यानर्हिं ष्टिसंतत होष्टिप्रयोगं कुर्यात्। न
चूल्यानायासेपात्रेन भूमौ न चर्मसर्परे। स्थालीपाकं तु कुर्वीत स्थंडिले कुंडलेपि वा॥
इति श्रीमद्विद्वन्मुकुटमाणिक्य श्रीमद्रामेश्वरसूरिसूनु श्रीनारायणभट्टविरचिते
प्रयोगरत्ने पार्वणस्थालीपाकः॥ ॥अथेष्टिप्रायश्चित्तानि॥ ॥प्रमादादन्याग्नेर्वेत्त
य पजेत स्वाग्नावन्यो वा यजेत चेत्तत्र प्रायश्चित्तं पथिकृच्चरुहोमं कृत्वा पुनस्तत्तीया
दितिथिषु अन्वाधानपूर्वकमिष्टिं कुर्यात्। अथातिपन्नेष्टिप्रयोगः। अन्वाधानात्पू
र्वं चेत्स्त्रीरजस्वला भवति तदा पंचमादिदिने सद्यस्कालान्वाधानपूर्वकं जुहुयात्। ४०

तरे न्या

अन्वाधानात्परतो रजस्वला चेत्तां गृहाद्बहिः स्थापयित्वा प्रतिपद्येव जुहुयात्। सूतकादिदिने इष्टि
रतीता चेदागामिपर्वपूर्वतिथिषु द्वितीयां चतुर्थीं नवमीं चतुर्दशीं विहायान्यासु अतिपन्नेष्टिं
कुर्यात्। तास्वप्यतिक्रमे अनंतरे पर्वणि पथिकृद्यागपूर्वकमतिपन्नयागं कृत्वा तत्पार्वणे
न्वाधानं कुर्यात्। तत्राप्यतिक्रमे अतिपन्नस्य पादकृच्छ्रप्रायश्चित्तं कृत्वा कालप्राप्तां प्र
तिपदीष्टिं सद्यस्कालान्वाधानपूर्वकं कुर्यात्। द्वितीयपर्वातिक्रमे पूर्ववदागामिपर्वमध्ये
कुर्यात्। तत्राप्यतिक्रमे तत्पर्वणि पथिकृत्पूर्वकं कार्ये। पथिकृदिष्टिं स्वतंत्रां प्राक्कृत्वैष्या स
मानतंत्रां वा कुर्यात्। तस्याप्यतिक्रमे तृतीयप्रतिपदि अतिपन्नद्वयप्रायश्चित्तं कृच्छ्रं
चरित्वा प्राप्तकालमिष्टिं कुर्यात्। तस्याप्यतिक्रमे आगामिपर्वपर्यंतं पूर्वोक्तवत्कुर्यात्। त
त्राप्यतिक्रमे स्मार्ताग्निर्नश्यति। तेन विधिना पुनःसंधानं कृत्वा प्राप्ते पर्वणि तदि
ष्टिं कुर्यात्। अन्वाधाने इष्टिमध्ये च दुग्धहरणे चोदितदिने हविरासादनांतं कृत्वा अन्वाधा
ने इष्टिमध्ये च दुग्धहरणदोषप्रायश्चित्तार्थमाज्यहोमं करिष्य इति संकल्प्य नवो नवो भ

४०

वतीत्यस्य सूर्या सावित्रीचंद्रमास्त्रिष्टुप्। नवोनवोभवति०। यमादित्या अंशुमाप्याययंतियम
क्षितमक्षितयः पिबंति। तेन नोराजावरुणो बृहस्पतिराप्याययंतु भुवनस्य गोपाः। आ
प्यायस्व समेतु ते। इत्येताभ्यां आहुती हुत्वा आग्नेय स्थालीपाकं कुर्यात्। सूर्यग्रहणे चंद्रविरासाद
नांते तिस्र आज्याहुतयः। चित्रं देवानामित्यस्य आंगिरसः कुत्सस्त्रिष्टुप्। चित्रं देवानां॥
उदुत्यं जा०। तवेदस्व मित्यस्य काण्वः प्रस्कण्वः सूर्यो गायत्री। ॐ उदुत्यं० उद्वयंतमसः
इत्यस्य काण्वः सूर्योनुष्टुप्। उद्वयं तम०। एतैर्हुत्वा आग्नेय स्थालीपाकं रणादि तत्रशेषं समापये
त्। इदं प्रयोगपारिजाते संग्रहोक्तं प्रायश्चित्तं। गंधांतरे तु शौनकोक्तमुक्तं। तद्यथा। दृष्टिदि
ने हविरासादनांते अन्वाधानेष्टिमध्ये चंद्रग्रहणजनितदौष्ट्यगुण्यपरिहारार्थं शौन
कोक्तामाज्याहुतिमुपस्थानं च करिष्ये इति संकल्प्य अत्राहगो इत्यस्य राहूगण
गौतमश्चंद्रमा गायत्री। इष्टिमध्ये चंद्रग्रहणजनितवैगुण्यपरिहारार्थमाज्य
होमे विनियोगः। अत्राहगो० स्वाहा। चंद्रमसइदं न मम॥ नवोनवती०चं

४१

द्रोपस्थाने विनियोगः। नवोनवाती० सूर्यग्रहेतु संकल्पादौ चंद्रपस्थाने सूर्यायेदं उदुत्यमित्यस्य क
चित्रमित्यस्य कुत्सः सूर्यस्त्रिष्टुप्। सूर्योपस्थाने०। चित्रं देवानां। इति दृष्टिमध्येग्रहणेनि
र्णयः। अन्वाधानेष्टि मध्ये ग्न्यनुगतौ अयाश्चेति मंत्रेणावक्ष्यमाणावन्तुनः संधानं
कृत्वा भूर्भुवः स्वः स्वाहेति मंत्रेण संकल्पपूर्वकं प्रायश्चित्तं संस्कृताज्येन हुत्वा पुनर
न्वाधानपूर्वकमिष्टिं। कुर्यात्। अन्वाधानेष्टिमध्ये प्रयाणोपस्थितौ तु भ्यं ता अंगि
रस्तमेति संकल्पपूर्वकं संस्कृताज्यं हुत्वा अरण्यादिषु समारोप्य होमकाले प्रतिष्ठाप्य
प्रातर्होमपूर्वकमिष्टिं कुर्यात्। अन्वाधायप्रतिपदि प्रमादादिष्ट्यकरणे त्यौत्तती
यादिति थिषु प्रातरोपासनोत्तरं संकल्पपूर्वकं संस्कृताज्यं व्यस्तसमस्तव्याहृतिभि
र्हुत्वा पुनरन्वाधाय यागं कुर्यात्। अथ प्रसंगादत्रैव नैमित्तिकप्रायश्चित्तानि उच्यं
ते। साम्यापरिमितदेशादर्वाग्बहिरायतनाहृतश्चेदग्निः स च प्रायश्चित्तसमाप्तिप

अमुत्र प्रस्कण्व
ऋषिः सूर्यो देवता गा
यत्री छंदः सूर्या
यतिसागः॥

४८ यंतां स्विष्टकृदिति योऽयमपस्तु दारुदंतर एकामिति मंत्रेणायतने प्रक्षिप्य व्याहृतिभिराज्याहुतीर्जुहुयात्।
अत्र कारिका। अनीकृशाम्या परासा तु बहिरायतनाद्गत। प्रायश्चित्तसमासेन समर्थो जीवि
तोपरि। इदं तइत्यचा तस्य स्थाने निप्रक्षिपेत्पुनः। आज्याहुर्जुहुयाद्व्याहृत्याथ स्थे त्रवृद्
वेर्चत। शाम्या षड्दश उच्चाद गुके त्यापस्तंबः। शाम्या परिमितदेशाद्बहिरायतनाद्गतेऽग्नौ पथिकृ
तेऽग्नये चरुं निर्वपेत्। योऽग्नि द्वादशाहे गृहीतेनाज्येन स्रुवं पूरयित्वाग्नये पथिकृते स्वाहेति
पूर्णाहुतिं जुहुयात्। स्रुवाहुतिं वा। तदुक्तं कारिकायां। अतिक्रांतो यदा शाम्या परासमनलो भवे
त्। चरुः पथिकृते कार्यः पूर्णाहुतिरथापि वा। पूर्णाहुतिलक्षणं कारिकायां। आज्यं द्वादशकृ
त्वस्तु गृहीत्वा पूरयेत्स्रुचं। तया वाज्याहुतिः कार्या सा पूर्णाहुतिरिष्यते। स्रुवं पूर्णाहुतिं वा ४९
स्यादित्येके याज्ञिकाविदः। यद्यग्निः स्वयं ज्वलति तदा उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं
मम। पशूंश्च मह्यमावह जीवनं च दिशो दश। मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत्।
अबिभ्रदग्न आगहि श्रिया मा परिपालय इति मंत्राभ्यां समिद्द्वयमादध्याद्व्याहृत्य। अ
ग्निश्चेत्कर्मसु उपशांते पुनस्तादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः॥

घृतेन त्वं तन्वो वर्धयस्व सत्याः संतु यजमानस्य कामाः। इति समिधमादध्यात्। तदुक्तं कारिकायां। स्व
यं त्वेके तु उद्दीप्यस्वेति द्वाभ्यां समिद्द्वयं। आ चेद्यमुपशांते तु पुनस्त्वेत्यनया समित्। हूयमानाद्बहि ति
यं दिबर्हिः स्कंदेत्तदा देवा जनामित्यनेन तदभिमंत्र्य द्रप्सश्चस्कंदेत्याज्याहुतीर्जुहुयाद्व्याहृतिभिश्च॥
ततः स्कन्नमनग्नौ क्षिपेत्। मंत्रो च। देवाजनमगन्यज्ञस्तस्य माशीरवश्च तु वर्धतां भूरिष्ट्वा तेन मं
चतु यज्ञोपयज्ञपतिमंहसः स्पतये स्वाहा। भुवनपतये स्वाहा। भूतानांपतये स्वाहा। यज्ञस्य त्वाप्र
मया न्ममया क्षिपया प्रतिमया। द्रप्सश्चस्कंद प्रथमा अनुष्टुप् १०।१७। अत्र कारिका। आहुतिर्हूय
माना तु बहिः स्कंदेत वै यदा। देवाजनमगन्यज्ञ इत्यनेनाभिमंत्र्य तां। द्रप्सश्चेत्याहुतिं हुत्वा प्रक्षि
पेदनले पुनः। देवाजनेति सर्वत्र स्कन्नं त्वभिमंत्रयो हविः। होतव्या आज्याहुतिस्तत्र व्याहृतिभिरेव स
मुच्चयात्। यागत्यागान्वाधान निर्वापादिषु जातो देवताव्यतिक्रमो यदा जातस्तदा व्याहृतिभि
र्हुत्वा विहितदेवतां यजेत्। यागादूर्ध्वं देवताव्यतिक्रमज्ञाने तु व्याहृतिभिर्हुत्वा तं यागं नावर्तयेत्।
यदा प्रकृतां कांचिद्देवतां यजेत्तदा व्याहृतिभिर्हुत्वा प्रकृतदेवतायै यागमावर्तयेत्। अत्र कारिका।

प्रायश्चित्तं कृत्वा ततो जपेत्तदा। अविज्ञाते विपर्यासे विहितां देवतां स्मरेत्। इष्ट्वा वास्तु
तु वृत्ते तु चैवान्त्येऽस्ति। प्रायश्चित्तमिदं कृत्वा पाणि नावर्त्तयेत्तदा। यदा स्वविहिता काचिद्देवताभि
एवं तस्य तदा। प्रायश्चित्तमिदं कृत्वा पागं तावर्त्तयेत्कृतं। इदं अप्रकृतिहोमारब्धे। अन्यान्याधेप्रा
यश्चित्तानि कारिकायां। यनित्रं यपिनद्धमञ्चे तस्यापि त्रवते चरुः। यदाहविरपक्कं स्यात्तेने
व हविषा यजेत्। चतुःशरावमात्रे तु यथा बहुभिरोदनं [illegible] तोऽजमयेन्ते नृचान्तेन चतुरो ब्राह्म
णानथ। बहु वृद्धञ्च तदन्नं वा। केचिदेव यदुक्तविः। शिष्टेनेष्टा पुनर्याग स्यादारब्धादि
तस्तदा। हृतं स्कन्नं दग्धं यद्यान्तत्पात्पुनः कृत्वाऽवयेद्धविः। स एव याग कर्तव्यः पुनर्यागस्तु
नेष्यते। यस्मात्पूर्वोचितो वृत्तं यदि दुष्टं हविर्भवेत्। तस्यैव हविषोऽवशेषं म = तं ~ भौ म्रु वी र्
तः पुनः। इध्माधानेऽकृते रतं दुष्टप्रधानेह विस्त्रवेत्। तत्स्थाने तु जुहुयादाज्यं यदुष्टं च जुहोत्य
था। एवं समाप्य यद्दुष्टं तदप्सु प्रक्षिपेत्पुनः। अन्वाध्यानादिको याग पुनः कर्तव्य एव तु।
प्राग्निध्माधानतो दुष्टे प्रधाने हविषि तथा। तद्धविः पुनरुत्पाद्य एवं चैव समापयेत्। श्रं

गान्तं चेद्धविर्दुष्टं तदप्सु प्रक्षिपेत्पुनः। स्विष्टकृद्विषो दोष आज्येनैव समापयेत्। प्रचरते स्क्रुन रैवे
केशैः कीटैर्वा मृत्यासे विश्रि। वा सास्य कृशुक्र मज्जास्थि मूत्र विट् स्वेदद्दूषिकैः। श्लेष्मा वेर्घ रपि
वीमन्वेऽदुष्टा निस्तुर्हविषी चेत्। भिन्नानि चैवक्षितानि दृष्टा। निस्तुः क्षिपेज्जले। स्रुक्स्रुवेऽद्वि
धे ततः ऽवन्यामाहृत्य जुहुयाद्धविः। वानस्पत्यानि भिन्नानि प्राग्दं न्यन्नक्षिपेत्। अन्यस्तु
शुचि संबद्धं मन्त्रं पंपि ज्ञमेव च। भूमि र्भूमिं तु मंत्रेण प्रक्षिपेद्येत जले। मंत्रः। भूमिर्भूमिम
गान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति। संसृष्टे चास्य
गत्वा ग्निरन्यगृह्याग्निना यदि। चरुर्विविचयेत्कार्यो मध्यापूर्णा हुतिर्भवेत्। अग्निर्गुणी
भवेदेषु विविधित्वादिको गुणाः। चरुः क्षामा पक्कर्त्तव्यो गृहदाहे पुवै भवेत्। शवाग्निना तु
संसर्गे कुर्वीत शुचये। पचनाग्नेः संसर्गे संवर्गाय चरुर्भवेत्। वैघृतेन तु संसर्गे कुर्या
दप्सुमतेऽचरुं। प्रायश्चित्तचरुस्थाने वा पूर्णाहुतिरिष्यते।। पर्वण्यमावास्यापातेन कुर्या प्रन
मतेचरुं। पर्वणि व्रतलोपे तु कुर्याद्व्रतपते चरुं। समानतंत्रं कुर्वीत यावत्पौनं तु कर्मणा

ना०

अरूत्राग्नमयणोश्नीयान्नवान्नं यस्तोवे ततः। वैश्वानराय कर्त्तव्यश्चरुः पूर्णाहुतिस्तथा॥ हि
दा षद्न्नं यो भुक्तं तद्दैतत्राप्येष चरुर्भवेत्। कूष्माण्डनाशेप्येतस्याप्युक्तं यणा कर्मनामनि। कूष्मा
४४ तद्रवेद्भिन्ने प्रागेव श्रवणाद्यदि। तदा वंतं जीतकमंत्रेण कूष्माण्डं संदध्यात्ते त्वथ। अग्नि
न्तोपयन्नवत्पान्या मत्स्तुत प्रक्षिपेदथ। तच्चेद्भुक्तिसेव यमाभ्यामेवक्षिपेज्जलु
के॥ निधेर्यदि पुरोडाशं तु दुघेस्थनापदि। क्षितुत्पतासिमंत्रेण बर्हिष्येनं निधापये॥
अभिमन्त्र्य तेतेतु मा हिंसीरितिमंत्रतः। श्रूयते मृतक्काद्ग्रे यजमाने तु जीवति। अ
ग्नये सुरभिमते चरुः पूर्णाहुतिस्तथा। अथ यस्य वच्छ गौर्वा जननेय समोततः। समनस
श्च रुक्षुपांत्पूर्णाहुतिमथापिवा। समारोपसमि ज्ज्ञाशे पुनराधेयमिष्यते। श्रोतोतेस्म
विराद्येन्य नष्टापि तु ज्ञातन्त्रास्वेदं। प्रायश्चित्तविशेषस्य यत्र नोक्तो भवेद्विधिः। हो
तव्याहुतिस्तत्र भूर्भुवस्वरितीह तु। निमित्तानन्तरं सर्वे प्रायश्चित्तं भवेदिह॥ प्रा ४४

MEMORIAL

गीवोत्पद्यते दोष आज्यस्य संस्कारतो यदि। प्रायश्चित्तं भवेदाज्यसंस्कारानन्तरं तदा॥
युक्रमो देवतानां तु सकृत्स्यादो भवेद्यदि। मंत्राणां व्युक्रमस्तद्वद्धोमादौ तु भवेद्यदि॥
मच्चान्पूर्वार्चितश्चेति व्युक्रमोस्य भवेद्यदि। द्रव्याणां व्युक्रमः स्याच्चेत्तथा। निर्व
पणादिषु यदा देवाक्रमो ब्रह्मा जुहुयात्तु स्त्रुवाहुतिं। यन्तुरव्यस्व ग्पेहे द्रव्यं होमक
र्त्रैर्ददातिनत्। यजमानस्तु जुहुयाद्ब्रह्मा भावे स्त्रुवाहुतिं॥ कस्मैचिद्ब्रह्मणाय
स्मिन्पक्षे द्रव्यं ददातितत्। होतव्यैकाहुतिस्तत्र व्याहृत्या स्वरैः समुच्चयात्॥
सर्वत्रैव प्रायश्चित्तरूपजपंहोमे वा ब्रह्मैव कुर्यात्॥ जुहोति जपतीति प्रायश्चि
त्तं ब्राह्मणमितिसूत्र दृदुक्तेः। तदभावे तु यजमानः समानन्यायत्वात्। न त्रस्वका
के कर्मीकरणनिमित्तं प्रायश्चित्तमुक्तं तस्मिन्प्रायश्चित्ते कृते तीतं कर्मकार्यं न वे
तिमतभेदः। तदुक्तं कारिकायां। प्रायश्चित्ते कृते पश्चाद्दनीतमपि कर्मवै। कार्यमित्ये
कआचार्यो नेत्यन्ये तु विपश्चितः। कार्पसमासिसमये, गलोपे शाते अशातेवा

४५ गलोपेप्रजापतिःप्रायश्चित्तमाह। प्रमादाकुर्वतांकर्मप्रच्यवेताध्वरेषुयत्। स्मरणादेव
तद्विष्णोःसंपूर्णंस्यादितिश्रुतिरिति। एवमन्यान्यपिप्रायश्चित्तानिग्रंथांतरतोवगं
तव्यानि। इतिश्रीनारायणभट्टविरचितेप्रयोगरत्नेदृष्टप्रायश्चित्तानिनैमित्तिकप्रायश्चि
त्तानि॥ ॥अथसकलकर्मसाधारणपरिभाषा। तत्रकारिका। आज्यैकद्रव्यकेहोमेस्य
थेदाज्यपरिग्रहः। स्यात्परिस्तरणंतत्रकृताकृतमितिस्थितिः। नोच्चारयतियआज्यपदं
कर्मसुसूत्रकृत्। अनादिष्टाज्यहोमेषुतत्रनित्यापरिस्तृतिः। सर्वस्मिन्पाकयज्ञेतुआ
ज्यभागौकृताकृतौ। सर्वेषुपाकयज्ञेषुभवेद्धुत्वाकृताकृतः। चन्वंतरिमरेवब्रह्मानि
त्यश्चलगवत्तथा। उच्चेहोमंक्वचिन्नाम्नाक्वचिन्मंत्रेणसूत्रकृत्। नोभयंपत्रतत्रैवंह्व
नंनामधेयतः। नैकेकांचनपक्षोयंचोलादावाश्रितोयदा। तदाग्निरिंद्रइत्यात्ह्याहोत
व्याइतिवृत्तिकृत्। अनेकेपाकयज्ञास्युरेकस्मिन्कालएवतु। समानतंत्रकाःकार्यान
तुतंत्रावृत्तिरिष्यते। पात्रासादनमिध्मात आज्याधिश्रयणादिच॥ स्रुवादिमार्जनेनै
वेध्मेरश्रुप्रहरणंतथा। पूर्णपात्रंभवेन्नित्यमाज्यस्योत्पवनंतथा। दैवानादेशआ ४५
दृ

ज्यंस्यादस्तुतेःसादनेस्रुवः। जपानुमंत्रणोपमंत्रोपस्थानाभिमंत्रणे। मंत्रोपःकर्मकरणेग
ध्रकर्मण्युपोत्राषट्। इदंकार्यममनेनेतिनक्वचिद्रूपतेविधिः। लिंगादेवेदमर्थत्वंमेषांतेम
त्रसंज्ञिताः। मंत्रांतेकर्मकर्तव्यंमंत्रस्यकरणत्वतः। कर्मादौतुमंत्रस्यापावृत्तिर्गृह्यकर्मणि।
मंत्रोक्तदेवतानांतुतूष्णीमेवावनिर्वपेत्। चतुरश्चतुरोमुष्टीन्प्रोक्षणंचतथाभवेत्। सहैव
श्रपयेत्तत्रनास्तिव्युद्धरणंतथा॥ आदिष्टमंत्रहोमेषुसर्वत्रैवंप्रतीयतामिति। कृताकृतंवैकल्पि
कुचरत्नेगृह्यसूत्रकारैः। क्वचिन्नाम्नाहोममाह। यथासावित्र्यैब्रह्मणइति। क्वचिन्मंत्रेणाह॥ य
था। अग्नेनयसुपथारायेअस्मानितिव्रतस्रभिरिति। तत्रतुननामतोनवामंत्रतोहोमउच्यते॥
केवलंतद्धितादिनादेवताविधानं। यथाप्राजापत्यस्यस्थालीपाकस्यहुत्वाकाम्यार्थएवश्चरु
इत्यादौ॥ तत्रचतुर्थ्यंतेनदेवतानाम्नाहोमइत्यर्थः। अनेकइति। अथाग्रयणाश्वयुजीकर्मणो
पदाश्वयुज्यां। किमतेतत्रतयोरेककालताजपेति। जपादिषुषट्सुयस्तृतीयोमंत्रउक्तस्तस्य
लक्षणमेतत्। लिंगादर्थप्रकाशनसामर्थ्यात्॥ इदमर्थत्वेनतत्कार्यार्थत्वं॥ नतुमंत्रस्तासामान्य

ना०

५०

लक्षणमिदं। अव्याप्त्यतिव्याप्त्यादिदोषाभावात्। तस्मादिदं मधुस्यैव मंत्रस्य लक्षणं। एवं च मं
८५ त्राः स्मृत्यर्थाः। सामान्योऽर्थो विशेषार्थश्चेति। भगवान्। यथोपदिश्यते कर्मक कर्तुरं॰ गंन
न्तस्यते। दक्षिणस्तत्र चरित्रेण पः कर्मणां पारगः क्रूरः। पत्रादि प्रथमो नोक्तोऽजपहोमादिकर्मसु।।
तिसृषु स्वस्त्यादिशः शास्ता ऐन्द्री सौम्या पराजिता। अपराजिता ऐशानी। आसीनः पूर्वः प्र
ह्वः को वा नियमोऽपत्रनोच्यते। तदासीनेन कर्त्तव्यं न प्रह्वे न नेति एना। तथा। अन्ता
देवो स्वयं कर्त्ता सर्वेषु क्षिक्पुरोहितः। प्राक्कृतास्ताच नानोप्राक्तं स्वधत्वं च कर्मणां।।
तथा। अविज्ञातः स्वरा मंत्राः प्रयोक्तव्याः प्रयोक्तृभिः। एकश्चेत्प्रबलो मेषु विज्ञाताश्च
किल्पिताः॥८। यस्मिन्मंत्रेण पठितः स्वाहाकारो न वेद्यदि। स्वाहांतेन प्रयोक्तव्यो हो
मेषु प्रणवादिकः। मंत्रस्यात्यन्तं चेद्राद्धस्तत्रैव होम इष्यते। अगंतेत्र होतव्यं स्वा
हाकारं पठेत्ततः। जानीयान्मंत्रं चं मंत्रं तदन्यात्तु पदे कृतः। ॐ भूर्भुवः स्वश्चेति स्वा
व्याहृतयो जपेत्। आर्षिश्च होमे तिसृभिश्चतुर्थी स्वाहासमासतः। अथ प्रयोगमंत्रा ८५

णां षड्विधं लक्षणं स्मृतं। जपानुमंत्रणाप्यायनाभिमंत्राः स्तथैव च। उपस्थाकर्मकरणोप
उपांशुप्रयोगतः। जपस्तु स्मरणं विद्याक्रतर्थमपि तद्भवेत्। अर्थतः कायपलात्स्मरदर्थ एव क्र
तो भवेत्। मंत्रस्तु स्मारयन्नेव मंत्रार्थत्वेन संस्मरेत्। वीक्षणं तन्मनाः लासस्याद तदनुमंत्र
णं। एतदेवाभिमंत्रस्य न लक्षणं वीक्षणादिकं। अद्भिः संस्पर्शनाधिक्या तदेवाप्यायनं
स्मृतं। उपस्थानं तदेवस्यात्राणति स्थानसंयुतं। बाह्यं कर्म यदेतेषु कर्मकाले क्रियेत त
त्। कर्मणः करणं तस्य विहितार्थप्रकाशनं। मंत्रेणाव्यामंत्रोते क्रियते कर्मयेषु तु। तथा।
प्राजापत्यमुपांशुस्यान्मध्यसावित्रमेन च। कृताकृतं ब्रह्मवरणं ब्रह्मा चाज्यस्य संस्कृ
तिः। संमार्गः स्रुवदर्व्योश्च आज्यभागौ परिस्तृतिः। व्रीहीणामवघातश्च तंडुलश्च स्थालीकृतः॥
दुर्वीकृत घृतस्यापि विलापनविधिस्तथेति। अत्र विहितं कर्म पवित्रपाणिः कुर्वीत। यदाह हा
रीतः। जपहोमहरायेते असुरादिक्षयस्विपाः। पवित्रकृतहस्तस्य विद्रवंतीति दिग्दशा।। अत्रे
कुशाभ्यां पिपाणिभ्यां विरोर्द्धमपवित्रकं। पाणिरसापित्वा प्रपद्ये न ब्राह्मणं गंधिसमन्वितं।

ब्रह्मग्रंथिलक्षणं गरुडपुराणे। अस्मन्यावेष्टनं वामार्गो ब्रह्मग्रंथिर्विनिर्मितः। सकृत्प्रदक्षिणीकृत्य
पवित्रमभिधीयते। तेन कृत्वा ग्रंथिमुक्तं कपवित्रं वेदवादिभिः। पवित्रकस्तु रामे मुखप्रदेशात् प्र
४८ स्मार्गतः। पवित्रद्वये संख्या चतत्रैव समभिः कुशापिंजूलैः कुर्याद् ब्रह्मग्रंथिपवित्रकं। पंचभिः क्ष
त्रियस्यैव चतुर्भिश्च यथाविधाः। द्वाभ्यां शूद्रस्य विज्ञेयं तराणां तथैव च। मार्कंडेयपुराणे। च
तुर्भिर्दर्भपिंजूलैः ब्राह्मणस्य पवित्रकं। एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। सर्वेषां वा भ
वेद्द्वाभ्यां पवित्रं ग्रंथितं नवा। त्रिभिः शांतिकं कार्यं पौष्टिकं पंचभिस्तथा। चतुर्भिरभि
चारार्थं कुर्वन् कुर्यात्पवित्रकं॥ हेमपवित्रे विशेष प्रशस्तमुक्तं हेमाद्रौ। अन्यान्यपि पवित्राणि
कुशाद्दूर्वात्मकानि च। हेमात्मकपवित्रस्य कलां नार्हंति षोडशीमिति। द्रव्यभेदेनाहुतिप्रमा
णभेदोक्तः सिद्धांतशेखरे। कर्षप्रमाणमाज्यस्य पयस्याम्ल दुग्धक्षीरं च तत्समं। तंडुकानां भुक्तिमा
त्रं पायसं प्रसृतेसमं। ३ कर्षमात्रं वक्ष्यामि लाजानां ४ मितां मताः। अन्नं ग्राससमं ग्रा
सं ग्रासमासाम्रपर्वकं। म्लकानां तु त्रिभाग स्यात्केदानां मष्टमांशकः। इक्षुः पर्वप्रमाणं स्यात् ४८

दंगुष्ठाद्वितयं लता। प्रादेशमात्राः समिधो व्रीहिणां मंजरीसमाः॥ तिलसर्षपकर्पादीनां मृगीमुद्र
प्रमाणतः। पत्रपुष्पफलानां तु स्वप्रमाणा न हीयते। चंद्रश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः॥
अरिमेदसमाः प्रोक्ताः गुग्गुलु बदरीसमः। आहुतीनां प्रमाणं कथितं वेदवादिभिरिति॥ हरि
मेधपुराणे। मृगीमुद्रालक्षणमुक्तं तत्रैव। स्यात् त्रिमुद्रा मृगीमुद्रा होमे सेव्या। विनर्मध्यमः
स्पर्शकांतकः। उत्तमः प्रोक्ता त्रिमार्गारान्मध्यमः स्वगृह्यादिजः। एतमग्निं तामसो वर्णरा
गजनादिपात्रात्मा प्रणयेत्। नृपाचाग्निः। पात्रांतरेण पिहितेताम्रपात्रादिके शुभे। अ
ग्निप्रणयनं कुर्याद्घरायेत्तादृशं पिवा। आपस्तंबः। नाप्रासितमभि चने माज्ञनादद्यात्
बर्हिरर्थं कुशालाभे प्रतिनिधयः स्मृत्यर्थसारे। बर्हिः काशाः सपंगाला नलनन्येते कुशा मीर
काः शीरा मुंचध्वा श्व बाल्वजार्जुनकाश्च। सुगंधितेजुनादारदूर्वाक्षीरद्रुमा अपि।
पद्मासु वत्सपो भ्योपि चाषस्तं बर्हिः पर्थिप्रसितं। शुष्क मूलवल्कलरूप्यागमूलकेदर्गां चतत्पावर्जितं।
शातातपः। समित्कुशापकादीनि ब्राह्मणाः स्वयमाहरेत्। शूद्रानीतैः क्रयक्रीतैः कर्म

कुर्वन्त्र जत्पच ॥ विष्णुः ॥ दर्भाः श्रावणमासस्य समंत्रोत्पाटिताः कुशाः । आयातयामास्ते ज्ञेया
नियोज्याः सर्वकर्मसु । वर्षमित्रिशेषः । कुशोत्पाटनमंत्रमाह कश्यपः । शुचौ देशे शुचिर्भूत्वा
स्थित्वा पूर्वोत्तरामुखः । ॐकारेणैव मंत्रेण कुशान्स्पृष्ट्वा द्विजोत्तमः । विरिंचिना सहोत्पन्न
४९ परमेष्ठिनिसर्गज । नुद सर्वाणि पापानि दर्भ स्वस्तिकरो मम । इमं मंत्रं समुच्चार्य ततः पू
र्वोत्तरामुखः । हुं फट्कारेण दर्भोस्तु सकृच्छित्वा समुद्धरेत् । हारीतः । अच्छिन्नाग्रानन्यधि
ष्ण्यांश्च समस्तान्कामिकान्कुशान् । पितृदेवद्विजार्थेहि समादद्यात्कुशान्द्विजः । इध्म
रक्षार्थमाह मरीचिः । पलाशः खदिरोश्वत्थः शमीवटोदुंबरः । अपामार्गार्कदूर्वाश्च कु
शाश्चेत्यपरे विदुः । दश द्वादश वांगुल्यः समाः पंचदश स्मृताः । नांगुष्ठाः सत्वचश्चै
सार्द्रा इध्मा इहोत्तमाः । ब्रह्मपुराणेपि । शमिपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः ॥ अ
श्वत्थोदुंबरौ बिल्वश्चंदनः सरलस्तथा ॥ सालश्च देवदारुश्च खदिरश्चेति याज्ञि
याः । दक्षिणायां विशेष उक्तो महाभारते । वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा । सर्व म—

क्रतुप्रचोदिता भूमिर्गावो थ कांचनं । बीजवापः । शास्त्रे त्रोद्भवं यस्मात्तस्मात्तत्सिद्धवल्लभं । अमं
गलं तस्माक्तेन दैवकार्ये विवर्जितं । अन्यच्च । यज्ञोपवीतं देयाच्चार्ये श्रौते स्मार्ते च कर्मणि । तृती
यमुत्तरीयार्थं वस्त्राभावे तदिष्यते । सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो
व्युपवीतश्च यत्करोति न तत्कृतमिति । अत्र सर्वाङ्गं न सदा शब्दवशात्पुरुषार्थता । उत्तरा
र्धेन विपर्यये निंदाद्वारेण शिखयोपवीतादिनां कर्त्तव्यं कर्मेति कीर्त्तनात्कर्मार्थता । एवं
च कर्मकाले शिखाबंधोपवीताभावे कर्मांगलोपनिमित्तं पुरुषार्थलोपनिमित्तं चेति प्राय
श्चित्तं न निमित्तं भवति । दर्शपूर्णमासयोरिवान्तवदने । कर्मणो बहिस्तु पुरुषार्थ
मे लोपनिमित्तकमेवेति विवेकः । संग्रहे । प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्तते । स ना
प्नोति फलं तस्य परत्रेह च श्रुतिस्मृतिः । न बकल्पं वास्तु गत्वा यो यस्य कर्म प्रचोदितं । तस्य
तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ ॥ कर्मविशेषेग्निनामानि । पावको लौकि
कोह्यग्निः प्रथमः संप्रकीर्त्तितः । अग्निस्तु मारुतो नाम गर्भाधाने विधीयते । ततः पुंसवने

ग्निः पवमानस्तथैव च। सीमन्ते मंगलो नाम प्रगल्भो जातकर्मणि। नाम्नि वै पार्थिवो ह्यग्निः
प्राशने शुचिः स्मृतः। सभ्यो नाम सवौ केतु व्रतादेशे समुद्भवः। गोदाने सूर्यनामा ग्निर्वि
४१ वाहे योजको मतः। आवसथ्यो द्विजैर्ज्ञेयो वैश्वदेवे तु रुक्मकः। प्रायश्चित्ते विट् चैव पाकय
ज्ञेषु पावकः। देवानां हव्यवाहश्च पितॄणां कव्यवाहनः। शान्तिके वरदः प्रोक्तः पौष्टिके
बलवर्द्धनः। पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारिके। वश्यार्थे कामदो नाम वन
दाहे तु दूषकः। कुक्षौ तु जाठरो ज्ञेयः क्रव्यादो मृतदाहके। वह्निनामा लक्षहोमे कोटिहोमे हुता
शनः। समुद्रे वाडवो ह्यग्निः क्षये संवर्त्तकस्तथा। ब्रह्मा वै गार्हपत्यश्च ईश्वरो दक्षिणा
स्तथा। विष्णुराहवनीयः स्यादग्निहोत्रे त्रयोऽग्नयः। ज्ञात्वैवमग्निनामानि गृह्यकर्म स
मारभेत। स्मृत्यर्थसारे। बहुसु स्थंडिलेष्वग्नेः समिद्धेषु चरुमेकं। संगारे लेलिहाने च
होतव्यं नान्यथा क्वचित्। ऋचे स्रुवादि प्रकृतिरक्षाः स्मृत्यर्थसारे। जुहुः पालाशस्युप
भृदश्वत्थी वैकंकती ध्रुवा। यद्वा सर्वा स्रुचः कार्या एतेषामन्यवृक्षजाः। शमीमय्यः स्रुचः ४१

कार्याः सर्वा वा यज्ञवृक्षजाः। तदभावे यथालाभमन्यवृक्षजाः। खादिरस्तु स्रुवः कार्यः शम्या
प्राशित्रमेक्षणे। खादिरो मुसलः कार्यः पालाशः स्यादुलूखलः। यद्वा भो वारणौ कार्यौ तदभा
वेन्यवृक्षजौ। मुख्याभावे तु सद्वंशं संप्रतिनिधीयते। यावद्वा वस्तु सद्धानं तत्तद्वहिर्गृह्य
ते। संग्रहे। प्रणीतापात्रार्थे दारुकांस्यमयो मरवा। खादिरेण स्रुवः कार्यः पलाशेन जुहूर्भवेत्।
तदभावे बिल्वः स्यात् तामन्यैर्वा यज्ञियद्रुमैः। तदभावे पलाशस्य पर्णाभ्यां हूयते हविः। प
लाशपर्णाभावे तु पर्णो वा पिप्पलोद्भवः। पर्णपत्रमयाभावे मध्यमेन पर्णेन जुहोतीति श्रुतेः। च
मसं वा प्रणीतायाः कांस्यपात्रमथापि वा। घटनामप्रकारः। संग्रहे। आयामं पंचचात्वा
द्विनागं पात्रमुच्यते। त्रिभागं दक्षिणेत्याहुरेतदायामलक्षणं। पात्रायामोऽर्धतः पात्रविस्ता
रोऽथ तदर्धतः। नीवा विस्तारस्तस्यार्द्धो द्विलस्यापि प्रकीर्त्यते। विस्ताराद्द्विगुणपात्र नीवा
विस्तारदैर्घ्यतः। अन्यानि तु लक्षणानि विस्तीर्णपात्राणि तथा। काम्यप्रतिनिधिर्नास्ति
नित्ये नैमित्तिके च सः। काम्येप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः। न स्यात् प्रतिनिधिर्मंत्रस्वा

ना० ५०

मि देवा। गिनकर्मसु। सदेश कालकर्माणां स्तितारेणरग्निरेव सा। नाभावस्य प्रतिनिधिरस्त्यावरं
रमिष्यते। नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। इत्यादि। तथा। स्वकालादुत्तरो गौणः कालः
सर्वस्य कर्मणः। तथा। कुशादर्व्यादयो मंत्रा ब्राह्मणाश्च बहुश्रुताः। न ते निर्माल्यतां यांति विनियो
ज्याः पुनः पुनः। कुशाः। अह्रस्तु निर्माल्याः दर्व्याद्या आभिचारिके। मंत्रास्तत्र च शूद्रार्थं ब्राह्मणा श्र
न भोजनात्। षट्सु तर्पणे श्राद्धे स्नाने भोजने मूत्रपुरीषकाले चारिणेषु। तत्राभिचारिके
कृतं विहितं कर्म विष्णवर्पणं कार्यं। तथा च बह्वृचं नारदीये। विष्णुर्पितानि कर्माणि सफलानि भ
वंति हि। अनर्पितानि कर्माणि भस्मनि न्यस्त हव्यवत्। नित्यं नैमित्तिकं काम्यं यच्चान्यन्मोक्ष
साधनं। विष्णोः समर्पितं सर्वं सात्विकं सफलं भवेत्। गीतायां। यत्करोषि यदश्नासि यज्जु
होषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति। विहितमसिद्धो षः इत्यादि
यमन्यो अपि परिभाषा ज्ञेया॥ ॥ छ॥ ॥ छ॥ इति श्रीनारायणभट्टकृते प्रयोगरत्ने प
रिभाषाप्रकरणं॥ ॥ छ॥ छ॥ अथ गर्भाधानादयः संस्कारा उच्यंते॥ छ॥ छ॥

प्र० ५०

MEMORIAL

प्रथमे रजसि चैत्रज्येष्ठाषाढभाद्रपदकार्त्तिकपौषा अशुभाः। आश्विनो मध्यमः। शेषाः शु
भाः। केचिद्देशाख्यफाल्गुनपूर्वा च मार्गं च मध्यमत्वमुक्तं। तिथिषु प्रतिपच्चतुर्थी षष्ठ्यष्टमी द्वादशी
चतुर्दशी पौर्णिमास्यमावास्या अशुभाः। शेषाः शुभाः। केचित्सप्तम्येकादश्यावशुभे। अष्टमी
द्वादश्यौ शुभे इत्युक्तं। आसां शुभाशुभत्वाभावो मध्यमत्वमिति सांप्रदायिकाः। वारेषु रवि भौम मंद
वारा अशुभाः। अन्ये शुभाः। केचित्सोमस्याप्यशुभत्वमुक्तं। नक्षत्रेषु। भरण्याद्री पुष्याश्लेषा पूर्वाज्येष्ठा
मूलपूर्वाषाढापूर्वाभाद्रपदारेवत्यो अशुभाः। चित्राविशाखाश्रवणा। श्विनी मघा स्वाती मध्य
माः। अन्यानि शुभानि। केचित्तु कृत्तिका पुनर्वस्वनुराधा रेवत्योप्यशुभा उक्ताः। एवं तासां म
ध्यमत्वं। एवमन्यत्रापि। योगेषु व्याघातस्याद्या नव नाड्यः गंडातिगंडयोः षट् षट् शूलस्य पंचदश
परिघपूर्वार्द्धं। वैधृति व्यतीपातश्चेत्यशुभाः। वज्रं मध्यमं। अन्ये शुभाः। करणानि विष्टिवर्जितानि स
र्वाणि शुभानि। अपि केचित् शकुनि नागाः शुभाः। द्वितीयो मध्यमः। तृतीयादय एव। रात्रौ। सं
र्वादयास्तमयावप्यशुभौ। रवि संक्रमणाद पाञ्च नाडीचतुष्टयं सर्वे चात्यशुभं। संक्रांत्यादिदा

५१ दिनेष्वशुभं। रविचंद्रोपरागयोरप्यशुभं। संध्योपापूर्वशावाशौचेषु मार्त्तंडात्मजश्चचतुर्थाष्टमद्वादश
स्थचंद्रे जीर्णरक्तनीलमलिनरूक्षाद्यवस्त्रेषु परिहितेषु नशुभं। संमार्जनीकाष्ठमृत्स्पर्शानिनशूर्प
तुषभस्मकपालसितलोहपाषाणशस्त्रादिधारिण्यां यतेर्मुक्तकेशा वाऽशुभं। देहलीद्वाररथ्यापितृमातृगृहे
ष्वशुभं। उच्चैः स्थितायां निद्रितायां चाशुभं। शय्यादौ शुभं। पित्रादि सखिस्वजनैर्दृष्टमशुभं। इ
त्यादि ज्ञेयं। दुष्टमासादौ प्रथमरजोदर्शने तांबूलभक्षणादि मंगलाचारं न कुर्यात्। द्वितीये तु शु
भे तत्र कुर्यादिति केचित्। प्रथमदुष्टरजोदर्शने द्वितीयं प्रतीक्ष्य तस्मिन्नप्यशुभे वक्ष्यमाणविस्ता
रेण शांतिं कुर्यादित्यपि केचित्। प्रथम एव यथाशक्ति शांतिं चरेदित्यपरे। अत्रैकस्मिन्नप्यशु
भे वक्ष्यमाणा शांतिः कार्या। द्वित्राद्यशुभसंनिपाते तु तत्समुचितबहुशुभनिरासार्थं वक्ष्यमाणा
हुतिसंख्यादिविवृद्ध्या कार्या यथाशक्त्यादि ज्ञेयं। इति शुभाशुभविचारः॥ अथ शांतिरुच्य
ते॥ तत्र॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति। इति याज्ञवल्क्ये
न कर्मफलसिद्धावविघ्नार्थत्वेन ग्रहयज्ञस्यावश्यकत्वोक्तेरिह च शौनकेन आर्त्तवानांतु ५१

नारीणां शांतिं वक्ष्यामि शौनकः इत्युपक्रम्य ग्रहातिथ्यपुरःसरमिति प्रकरणे नैरावश्यकत्वादेकदेश
कालकर्तृकाणां च विशेषवचनाभावे तंत्रेण कर्तव्यत्वाद् ग्रहमखपूर्वकस्तंत्रेण शांतिकप्रयोग उच्यते।
रजोदर्शनानंतरं पंचमादिदिने चंद्रताराद्यानुकूल्ये शुभे देशे सुस्नातपत्न्या पुतः पतिः प्राङ्मुख
उपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादि सूच
ित सकलारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौनकोक्तां शांतिं करिष्ये
इति संकल्प्य गणेशपूजनं पुण्याहवाचनं गौर्यादि षोडशमातृकापूजनं वस्त्यादि सप्तमातृ
कापूजनं नांदीश्राद्धानि च कृत्वा। शांतं दांतं कुटुंबिनं मंत्रतंत्रज्ञं आचार्यं ब्राह्मणं च जपहोमार्थम
ष्टौ षट् चतुरो वा ऋत्विजो। पूर्ववाग्यंत्रादिना पूजयेत्। ततो आचार्यो गृहेशानदेशे शुभे भूम
हीधोरिति भूमिं स्पृष्ट्वा ततद्दक्षिणोत्तरतस्तथैव मंत्रावृत्त्या भूमिं स्पृष्ट्वा। ॐ पंचपः संवहंत
इति द्रोणप्रमाणव्रीहीभिर्मध्ये तद्दक्षिणोत्तरतश्चास्पृष्टैर्देशे मंत्रावृत्त्या राशित्रयं कृत्वा। तेनैव
क्रमेण राशित्रये नवमकालकमन्नगंनकुंभत्रयमभाकलक्षितिमंत्रावृत्त्या स्थापयेत्। एवं सर्वं

५२ अंबत्रोग्निः। ततः प्रसुव आपइति मंत्रस्य रुक्मस्य सिंधुक्षित ऋषिः आपो देवता जगती। कलशे पुष्पद
कपूरणे विनियोगः। ॐ प्रसुव आपइत्यादि ऋक् ९। याः प्रवतइत्यस्य वसिष्ठ ऋषिः शाक्वरी। विनियोगः त्र्या
त्र वृत्। एवमग्रेपि तत्र तत्र विनियोगो ज्ञेयः। गंधद्वारामिति त्रिषु पिंगं च प्रक्षिप्य। या ओषधीरिति सर्वौ
षधीः। ॐ ओषधयः समितिमनाक्षिपेत्। ततो मध्यमकुंभे यव। व्रीहि। तिल। माष। कंगु। श्यामाक।
मुद्गान्क्षिप्त्वा। गोपत्र्या। उदुंबर। कुश। दूर्वा। रक्तोत्पल। चंपक। बिल्व। विष्णुक्रांता। तुलसी। बर्हि
षा। शंखपुष्पी। शतावरी। अश्वगंध। निर्गुंडी। रक्तपीत। सर्षप। अपामार्ग। पलाश। कार्पास। जीव
क। प्रियंगु। गोधूम। व्रीहि। अश्वत्थ। दधि। दुग्ध। घृत। पद्मपत्र। नीलोत्पल। सीत। रक्तपीत। कुरंटक
त्रय। गुंजा। वचा। भद्रमुस्तक। एतानि द्वात्रिंशदौषधानि सर्वाणि यथासंभवं वा क्षिपेत्। त
तस्त्रिषु कलशेषु कांडात्कांडादिति दूर्वाः। अश्वत्थेव इति पंचपल्लवान्। गज। अश्वस्थान। रथ्या।
वल्मीक। संगम। ह्रद। गोष्ठस्थान मृदः। स्योना पृथिवी भवेति क्षिप्त्वा। याः फलिनीरिति पूगीफलानि।
सप्तरत्नानि। कनक। कुलिश। नील। पद्मराग। मौक्तिकानि पंचरत्नानि। हिरण्यरूप इति हिर ५२

ण्यं च क्षिपेत्। युवा सुवासा इति सूत्रेण वाससा च कलशं पंच वेष्टयित्वा। गंधाक्षतपुष्पमाला
दिभिः कलशान् भूषयेत्। ततः कलशोपरि नैवेद्यं नेपथ्यस्थवर्णराजतं कांस्यमयं ताम्रमयं वे
णवं मृन्मयं वा यवादिपूरितं पात्रं च पूर्णा दर्वीति निधाय। तदुपरि श्वेतवस्त्रं न्यस्य तत्र
चंदनादिना दलानि कुर्यात्। तत्र मध्ये। ॐ गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री। भुव
नेश्वर्या वाहने विनियोगः। ॐ तत्सवितुः भुवनेश्वरीमावाहयामीति। यथाशक्ति सुवर्ण
निर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वं स्थापयेत्। तद्दक्षिणाकुंभे परिवत्सरा इंद्राणी
वृषाकपिरिंद्राणी पंक्तिः। इंद्राण्या वाहने विनियोगः। ॐ इंद्राणीमासु० इंद्राणीमावा
हयामीति तत्पार्श्वे सौवर्णीमिंद्राणीप्रतिमां संस्थाप्योत्तरकलशोपरि इंद्र इंद्रेत्वा विश्वा
मित्र इंद्रो गायत्री। इंद्र आवाहने विनियोगः। ॐ इंद्रत्वा० इंद्रमा० वाहयामीति। सौवर्णी
मिंद्रप्रतिमां स्थापयेत्। ततउक्तमंत्रैरुक्तक्रमेणादेवतात्रयस्य कांडानुसमयेन षोड
शोपचारपूजां कुर्यात्। ततो मध्यमकुंभे आचार्यो ष्टसहस्रमष्टशतं वा गायत्री जपेत्।

५३ श्रीसूक्तं जपेत्। तद्यथा। हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लि
तेंदिरासुता ऋषयः। श्रीर्देवता। आद्यास्तिस्रोनुष्टुभः। ततएकाबृहती। प्रस्तारपंक्तिः। ततो
द्वे त्रिष्टुभौ। ततोष्टावनुष्टुभोन्त्या प्रस्तारपंक्तिः। जपे विनियोगः। ॐ हिरण्यवर्णामित्यादि।
ततएकोनऋग्विधद्दक्षिणाकुंभे रुद्रसूक्तानि जपेत्। तद्यथा। कद्रुद्रायेति नवर्चस्य घोरः कण्वो
रुद्रो गायत्री जपे विनियोगः। इमा रुद्राय तवसे इत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्र आ
द्यान्नवजगत्यो अन्त्ये द्वे त्रिष्टुभौ जपे विनियोगः। आ ते पितरमिति पंचदशर्चस्य गृत्समदो
रुद्रस्त्रिष्टुप्। जपे विनियोगः। इमा रुद्राय स्थिरधन्वने इति तिसृणां वसिष्ठो रु
द्रस्तिस्रो जगत्यो अन्त्या त्रिष्टुप् जपे विनियोगः। आ वो राजानं वामदेवो रुद्रस्त्रिष्टुप्। जपे वि
त्रि नियोगः। तमु ष्टुहि क्षत्रो रुद्रस्त्रिष्टुप् जपे०। भुवनस्य पितरं रुतिश्वान्रुद्रस्त्रिष्टुप् ज
पे०। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् जपे०। अथान्योक्तमखिलोत्तरएकादशानात्तित्तिरिरुद्रं ५३
जपेत्। तत्रादौ न्यासाः कार्याः। ऋष्यादिस्मरेत्। तद्यथा। नमकानां प्रथमानुवाक आ

स्या।

घोयाः कश्यपः द्वितीयाआजयस्ततीयाद्याः कश्यपस्ततो द्वयोर्गौतमस्ततएकस्याः कण्वस्त
तो द्वयोर्मरुतां ततएकस्य भगवांस्ततस्तिसृणां नारदस्ततस्तिसृणां भगवान्। द्वितीयानुवा
कस्य मंडूकस्तृतीयानुवाकस्य भगवांश्चतुर्थानुवाकस्य दुर्वासाः पंचमषष्ठानुवाकयोर्भ
गवान् सप्तमानुवाकस्य हेमकोशोष्टमानुवाकस्य नवमोनुवाके च नमो वइति या
वद्गानान्भवः शेषस्याग्निरीशः दशमानुवाके प्रथमस्य पुलहो द्वितीयस्य स्कंदस्ततो द्वयोर्मर्
उन्यस्ततएकस्य दैवरातस्ततएकस्य भगवांस्ततएकस्यात्रिस्ततएकस्य वैण्यापघस्ततए
कस्य भगवांस्ततएकस्य वैराजस्ततएकस्य पुलहस्ततएकस्य नारदस्ततएकस्य दशानु
वाके आद्यानामनुवाकानां दुर्वासास्ततआसमाप्ति देवकइत्यृषयः। प्रथमानुवाके आद्यस्य
रुद्रस्ततएकस्य शंभुस्ततएकस्य स्कंदप्रमाः रुद्रस्ततो द्वयोरुद्रस्ततएकस्य शंभुस्ततो
द्वयोरादित्याः त्र्यारुद्रस्ततएकस्य शंभुस्ततस्तिसृणां रुद्रस्ततस्तिसृणां भगवा
स्ततो द्वितीयतृतीयानुवाकयो रुद्रश्चतुर्थपंचमषष्ठानुवाकानां शंभुः सप्तमा

नुवाकस्य रुद्रोऽष्टमानुवाकस्य नमो वः किरिकेभ्य इत्यंतस्य च नवमस्य भगवान्नवशिष्ट
५८ स्य रुद्राद्दशमानुके वा चतुर्णां रुद्रस्ततएकस्य नंदीश्वरात्मा रुद्रस्ततएकस्य भगवा
स्ततएकस्य शंभुस्ततएकस्य रुद्रस्ततएकस्य भगवांस्ततो द्वयोः शंभुः स्ततो वा सिष्ठान्नो
रुद्र इति देवताः। प्रथमानुवाके आद्येनुष्टुभौ ततएका स्वराडनुष्टुप्। ततएकाऽन्वानिदनु
ष्टुप्। ततएका प्रस्तारपंक्तिः। पंचपदा वा पंक्तिः। ततएकाष्टपदा जगती। ततः सप्तानु
ष्टुभः ततोऽष्टानुवाका यजूंषि ततएका प्रस्तारपंक्तिः पंचपदा पंक्तिः। ततएकानुष्टुप्।
ततश्च ततस्रो जगत्यो ततस्तिस्रः त्रिष्टुप् ततएका पंचपदा त्रिष्टुप् महाबृहती। ततो
द्वादशानुष्टुभस्ततस्त्रीणि यजूंषि ततस्तिस्रोऽनुष्टुभः ततएकं यजुरिति छंद
सि। अथ चैमकानां अग्निः कौत्स ऋषिः। आद्या अग्नाविष्णू गायत्री। शिष्टानां
यजुरादयो नानादिविशेषा देवताः यजुः जपे विनियोगः। एवं रुद्रं जप्त्वा। शं न इंद्राग्नी
तिसृक्तं जपेत्। शं न इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप् जपे वि ५८

निवोगः॥ शं न इंद्राग्नी तिसूक्तं जपेत्। ततः कुंभं पश्चिमदेशे स्थंडिलादिने प्रणीय
तदीशान्यां वेदी नवग्रहादीं स्थापितान्मंत्रैः राद्यावाह्य षोडशोपचारैः संपूज्य। तदीशान्यां
प्राग्वत् कुंभं संस्थाप्य तत्र वरुणमावाह्याग्निसमीपे मत्पान्वाधानं कुर्यात्। यथा
इसमिध्यावादाय देवता परिग्रहार्थमन्वाधानं करिष्ये। अस्मिन्नन्वाहिते ग्नावि
त्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा। नवग्रहान् प्रत्येकममुकसंख्याभिः समिधि
लाज्याहुतिभिर्भुवनेश्वरी प्रत्येकं अमुकसंख्याभिर्दुर्वातिलमिश्राग्नी रूम
पायसाज्याहुतिभिरिंद्राणीं इंद्रं च प्रत्येकममुकसंख्याभिर्दूर्वातिलमिश्राग्नी
रूमपायसाज्याहुतिभिरित्युक्त्वा। शेषेण स्विष्टकृतमित्यादि यक्ष्यइत्युक्त्वा
जुहुयात्। अन्ये तु गायत्र्यैव तुहोतव्यं हविरत्र चतुष्टयं ततः स्विष्टकृतं हुते
तिशानके नेंद्राणींद्रयोर्होमानभिधानात्। पर्यग्नि नास्तीत्याहुः। तन्मतेन्वा
धानादौ तत्कीर्तनाभावः। आहुतिसंख्या वक्ष्यते। ततः परिस्तरणादि पूर्णपात्रं

५५

भिधानां तं कृत्वा। भुवनेश्वरीं द्राणीं द्विस्त्र्यामुष्मै स्वेति मनसा ध्यायन्। तूष्णीं घ्रीं च
तुरः श्रातृ सोमुद्री न्निरूप्याहुति बहुत्वाच्चान्निरूप्य गोदुग्धे पायसं श्रपयित्वा। आ
ज्यसंस्काराद्याज्यभागांतं कुर्यात्। ततो यजमानो दक्षिणत उपविश्य होमार्थं च ज
पार्थं च वरयेत्। ऋत्विजो बहून् आचार्यो द्विजैः सहेति चोक्तेराचार्य ऋत्विजां होमावग
मात्तेषां च स्वत्वेन त्यागायोगात्तेभ्य ऋत्विग्भ्यो होमे यजमानेन प्रत्याहुतीत्यागस्याश
क्यत्वात्तदानीमेव यागप्रधानदेवतोद्देशपूर्वकं एताभ्य इदं न ममेति त्यजेत्। तत आचार्यः ऋ
त्विग्भिः कृत्वा नवग्रहेभ्योष्टशताष्टाविंशत्यष्टान्यतमसंख्याकान् घृताक्तानर्का
दि समिधः तिलाहुतीश्च हुत्वा। अधिदेवताप्रत्यधिदेवताविनायकादि पंचलो
कपालेभ्यस्तन्न्यूनसंख्यया जुहुयात्। एभ्यस्तु पालाशसमिधः। ग्रहाणां यथा
योतदन्येभ्यश्चेतस्त इति संप्रदायः। ततो भुवनेश्वर्यै गायत्र्यास्त्रिमधुप्लुता
नामिति त्रिरष्टभिर्दूर्वारोकाहुतिभिः त्र्यवमष्टसहस्रमष्टशतं वा दूर्वाहुतिप्र ५५

स्थ

[marginal notes:] ...नेसंकीर्तनं तस्य स्नपय हस्र ख स्व भुवनेश्वरीशायाख्ये कर्मणः साङ्गतासंसिध्यर्थं बलि प्र इंद्रं ... इंद्रप्रीत्यर्थं बलिहरणे वि इंद्रं ...
इंद्रायसांगाय सपरिवाराय सायुधाय सशक्तिकाय संसदीपमाषभक्तबलिं समर्पयामि। भो इंद्र इमं बलिं ... ममयजमानस्य वा सकुटुंबस्य आ
युः कर्त्ता शांतिकर्त्ता पुष्टिः ... क्षेम ... तीभिर्वा पुष्पाक्षतजलानि ... एवं सर्वत्र॥ बलि ... ॥ ॥

ताकृतिकमिश्रगोधूमाहुतीः पायसाहुतीर्घृताहुतीश्च जुहुयात्। एवमिंद्राणीद्वयोः प्रा
गुक्तमंत्राभ्यां क्रमेण हविश्चतुष्टयं प्रत्येकमष्टशतसंख्यं भुवनेश्वर्या अष्टस
हस्रपक्षे जुहुयात्। तस्या अष्टशतपक्षे तु तयोरष्टाविंशतिरिति संप्रदायः। पक्षे
तु तयोर्न होमः। ततः स्विष्टकृतादि प्रायश्चित्तहोमांतं कृत्वा इंद्रादिदिक्पालेभ्यो नवग्र
हेभ्यो भुवनेश्वरींद्राण्यादिभ्यः क्षेत्रपालाय च सदीपान्माषभक्तबलींस्तत्तन्मंत्रैर्दत्वा पू
र्णाहुतिं समुद्रादूर्मिरिति त्र्यृचेन जुहुयात्। अस्य गोतमो वामदेवोग्निस्त्रि
ष्टुप्। पूर्णाहुतिहोमे विनियोगः॥ ततः प्रणीताविमोकं कृत्वा॥ भुवनेश्वर्यादिकलशो
दकं ग्रहकलशोदकं च पात्रांतरे गृहीत्वा॥ तेन तत्तत्पल्लवैः केसरकुशदूर्वाभिः पतन
य सपत्नीकं यजमानं च ततनवपस्थ केतुकीवितहामस्थाने तुमतीसत्रं भगुरसुख आ
पो अभिषिंचेत् तैर्मंत्रैः। ते च॥ आपोहिष्ठेति नवर्चस्यांबरीषः सिंधुद्वीप आ
पो गायत्री। अंते द्वे अनुष्टुभौ। पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा। अभिषेके विनि

[marginal notes:] म ध्यो नंदिवोवार्ईस्य त्र्यास्त्रद्धोमिन्द्रष्टुप्। पुनस्त्वाग्निर्वसुरुद्रा आदित्य शतक्रतुरस्तु पुरुष सप्ततेऽग्ने स प्रवाभितिर्जगती॥ पामंते वामदेव आपो ज
पूर्णाहुति होमे वि॰ ॐ अग्निस्वाहा। इदमग्नये वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते अग्नये च इदं न मम॥ ॥

योगः। यएकइद्दिदयतइति गोतमराहुगणइंद्रस्त्रिष्टुप्। अभिषे०। त्रिभिष्ट्वंदेवसवित
५६ प्रर्चस्यसूक्तस्ये अनोसिष्ठ आद्यानांचयोणाम। अग्निस्तत श्चतुर्णां विश्वेदेवा। अ
न्नागायत्री। द्वितीयानुष्टुप्। ततस्तिस्रोगायत्र्यो। त्येदु अनुष्टुप्। अभिषेके वि०। उ
भयंश्रृणवच्च नेतिगर्भ इंद्रो बृहती अभिषेके०। स्वस्तिदाविशांपतिर्द्वौनुष्टुप्॥
सि अभि० त्र्यंबकं। वसिष्ठो रुद्रोनुष्टुप्॥ अभिषे०। जातवेदसेकश्यपोदुर्गा त्रिष्टु
प्। अभि० समुद्रज्येष्ठाइतिचतसृणां वसिष्ठ आपस्त्रिष्टुप्। अभिषे०। आपंगाभ
नीतितिसृणांसप्तर्षय आपोनुष्टुप्। अभिषे० इमा आपइतितिसृणां सप्तर्षय
य आपोनुष्टुप्। अभिषेके०॥ देवस्यत्वेत्यापस्तंबऋषिः रवागतोस्त्रिभिर्मंत्रैर्मं
गौतम त्रीशानंजगतइंद्रानोजगती। अभिषेके०। त्वमग्नेरुद्रइत्यापस्तंबऋषिरवागते
नैकेन। तमुष्टुहीत्यांगिरसस्त्रिरश्चीरुद्रस्त्रिष्टुप्। अभिषे०। भुवनस्यपितरंऋजि ५६

MEMORIAL

श्वारुद्रस्त्रिष्टुप्। अभिषेके०। यातेरुद्रइतिकश्यपोरुद्रः स्वराडनुष्टुप्। अभिषेके०। यज्जाग्र
तइति कण्वो शिवसंकल्पमंत्राणां प्रजापतिर्मनस्त्रिष्टुप्। अभिषे०। याजुष्यातेइन्द्रत्वा ६
वृषभंवयमितिपंचानां विश्वामित्रइंद्रोगायत्री। अभिषेके०। ततः सुरास्त्वामभिषिंच
न्विति नवभिः पौराणैर्मंत्रैरभिषिंचेत्। ततः कलशोदकेनान्येनचोदकेनसुस्नातो
दंपती शुक्लवाससौ गंधमाल्यादिच्छत्वोपविशेतां। तत्रपत्नीदक्षिणतः। ततो यज
मानोग्निंसंपूज्य विसृज्य तिलका आचार्यादीन् गंधपुष्पाणि वस्त्रालंकारादिभिः
यथाशक्ति संपूज्य। आचार्याय धेनुं दक्षिणां दद्यात्। दक्षिणात्वेन चास्यनदाक्षि
णांतरं अन्नवस्त्रप्रसंगात्। ततो ब्राह्मणेभ्यश्च यथाशक्ति दक्षिणां दत्वा। रुद्रजापितेस्व
दक्षिणामनुमान्देहेदक्षिणां दद्यात्। अत्र धेनुन्यायेनादक्षिणत्वे प्राप्ते सदक्षिणमनुमा
हेत्यसहद्गुणजा पितेइतिप्रतिप्रसवकरणात् सदक्षिणात्वे। ततोन्येभ्य ऋत्विक्भ्यो

न्येन्मयश्चब्रा० ह्मणेभ्यः स्वःस्वरूपं सीदक्षिणां दद्यात्। ततोग्रहपीठदेवतानां भुवनेश्व
र्यादीनां चोत्तरपूजां पंचोपचारैः कृत्वाक्षमाप्य। यांतु देवगणाः सर्वे पूजामादाय पा
५८ र्थिवात्। इष्टकामप्रसिध्यर्थं पुनरागमनाय च। यांतु देवगणा इति विसृज्य आचार्यहस्ते
प्रतिपाद्याग्निं संपूज्य। गंधं गंधेति विसर्जयेत्। ततो ब्राह्मणा महाशांतिं पठेयुः।
स्वापथा। आनो भद्रा इति दशानां गोतमो राहुगणो विश्वेदेवाः आद्याः पंच जगत्यः। ष
ष्ठी विराट्। सप्तमी जगती। ततस्त्रिष्टुभः। ॐ आनो भद्राः ०। ॐ स्वस्ति नो मिमीता
मिति पंचानां स्वस्त्यात्रेयो विश्वेदेवा आद्यास्तिस्रस्त्रिष्टुभः ततोनुष्टुभौ। शंन इंद्रा
ग्नीति पंचदशानां वसिष्ठो विश्वेदेवास्त्रिष्टुप्। त्यमुषु वाजिनमिति तिसृणां तार्क्ष्योरिष्टनेमिस्ता
र्क्ष्यस्त्रिष्टुप्। लघंपा शंपु विश्वेदेवा शाक्वरी। सर्वे शांतिपाठे विनियोगः। ततो यज
मानोग्नये ग्रहप्रीत्यर्थं त्रीन् भुवनेश्वरी द्राणी इत्री तमेव प्रत्येकं जो स्त्रीन् ब्राह्म ५८

णान् भोजयित्वा संकल्प्य वा। विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीत। एवं कृते सर्वारिष्टशांति
र्भवति। ततः शुभकाले गर्भाधानं कुर्यात्। इति दुष्टरजोदर्शनशांतिः॥ ॥ श्रीः॥ अथ चंद्रसूर्यो
परागकाले प्रथमरजोदर्शने शांतिविशेष उच्यते। सर्वोपरागस्य पौर्णमास्यमावास्याभ्या
मविनाभावात् तदतिरिक्तवारादेर्दुष्टदुष्टप्रागुक्तशांत्या समुच्चयतेन्निमित्तभेदात्। अदृष्टार्थ
त्वाच्च सत्यपक्षे विघ्नाभावे तत्कार्यकालिकत्वान्नवग्रहमेनामनहोमेनारिष्टहोमानाभिधानया
तोन्निवृत्तियोगात्। ग्रहणमात्रेतन्निमित्तमेव। अत्र च पुनः श्रवणाभावान्नवग्रहमखः
कृतो कृत इति विवेकः। तत्रके वक्ष्यामः प्रयोगः। पूर्वोक्तकाले सस्त्रीकः शुचिः प्राङ्मुख उपवि
श्य प्राणानायम्य देशकालौ स्मृत्वा। मम पत्न्याश्चंद्रोपरागे प्रथमरजोदर्शनेसूचि
तारिष्टनिरासद्वारा परमेश्वरप्रीत्यर्थं शांतिं करिष्ये। इति संकल्प्य प्राग्वदृत्विग्वरणं
तद्रूपीत्। नवग्रहपक्षे सनवग्रहमिति। सूर्योपरागे तु सूर्योपरागमध्ये इत्यादि वदेत्।
तत आचार्यः शुचिदेशे गोमयेनोपलिप्य। तत्र पंचवर्णैरजोभिरस्वदकपमं कृत्वा।। ते

दुग्धैरनवं श्वेतवस्त्रमुदग्दशं संस्थाप्य यथाशक्ति रजतनिर्मितां चंद्रप्रतिमां। आप्यायस्वेति गो
५८ तमः सोमो गायत्री चंद्रावाहने विनियोगः। आप्यायस्व० चंद्रं मावाहयामीति स्था
पयेत्। सूर्यग्रहे तु यथाशक्ति सुवर्णनिर्मितां मा० कृष्णेन हिरण्यस्तूपः सविता त्रि
ष्टुप्। सूर्यावाहने विनियोगः। ॐ आकृष्णेन सूर्यमावाहयामीति स्थापयेत्। ततो य
थाशक्ति सीसकनिर्मितां राहुप्रतिमां स्वर्भानोरत्रिराहुरनुष्टुप्। स्वर्भानो राहुमावा
हयामीति तत्स्नरतः स्थापयेत्। ततो यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां
यथाशक्ति सुवर्णनिर्मितां तत्तन्मंत्रैर्नाममंत्रैर्वा। ॐ अश्विनावावाहयामि। नम
इति प्रणवादिनमोन्तैः स्थापयेत्। मंत्रास्त्वा पुस्तं बा नामषष्ठी वाक्यानीति प्रसिद्धाः।
नामानि तु। अश्विनौ। यमः। अग्निः। प्रजापतिः। सोमः। रुद्रः। अदितिः। बृहस्पतिः। स
र्पाः। पितरः। भगः। अर्यमा। सविता। त्वष्टा। वायुः। इंद्राग्नी। मित्रः। इंद्रः। निर्ऋतिः। आ
पः। विश्वेदेवाः। विष्णुः। वसवः। वरुणः। अजएकपात्। अहिर्बुध्न्यः। पूषेति। एवं ५८

देवतात्रयमावाह्य भिरेवमंत्रैः। कांडानुसमयेन षोडशोपचारैः संपूज्य। तत्र चंद्रग्रहे चंद्र
पश्वेतानि वस्त्रगंधाक्षतमाल्यादि देयानि। राहवे कृष्णानि॥ नक्षत्रदेवताभ्यश्वेतानि।
ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य पक्षे नवग्रहानप्यावाहन एवं संपूज्यान्वाधानं कुर्या
त्। तथा। देसमिधो ग्रहीत्वा चक्षुषी आज्येनेत्यंतमुक्त्वा। पक्षे एवं नवग्रहानुद्दिश्याष्टश
ताष्टाविंशत्यन्यतमसंख्यामुद्दिश्य चंद्रममुकसंख्याभिः पलाशसमिदाज्यचरुतिला
ज्याहुतिः राहुममुकसंख्याभिर्दूर्वाज्यचरुतिलाहुतिभिर्नक्षत्रदेवताममुकसंख्यया
पलाशसमिदाज्यचरुतिलाहुतिभिर्यक्ष्ये। शेषेण स्विष्टकृत्यादि जुहुयात्। सूर्यग्रहे चंद्रस्था
ने सूर्यं परं वदेत्। एवमन्वाय प्रणीता प्रणयनांतं कृत्वा। त्रिभ्यो मुष्टींस्तु चेति चतुरश्चतुरो मुष्टी
न्निरूप्य चरुं श्रपयित्वाज्यभागांतं कुर्यात्। ततो प्रज्वमानो दक्षिणतो देवता उद्दिश्य समस्तं जेत्
ततो न्वाधानक्रमेण जुहुयात्। ततस्तिसृणां दूर्वाणामेकैकाहुतिः। समिधश्च त्रिमन्त्रकाः काः।
ततः स्विष्टकृतादि पूर्णाहुत्यंतं प्राग्वत्। तत आचार्यः कुंभस्मिन्कलशे जलपूर्णे पंच

गव्यानि पंचरत्नानि वराश्वस्थानदं बराम्रा। अ बिल्वानोलचपंचपल्लवान् सर्वौषधीक
५८ कुंदूर्वाः कुशा अक्षिप्य सकृत्तिकं वं दंपती ती पूर्ववदभिषिंचेत्। एतैर्मंत्रैः। आपो हिष्ठेति त्रि
सृ चस्या वरीषः सिंधुद्वीप आपो गायत्री। अभिषेके विनियोगः। इमं मे गंगे इति सिंधुक्षि
त्प्रियमेध आपो जगती। अभिषेके०। तत्त्वा यामि शुनःशेपो वरुणस्त्रिष्टुप्। अभिषे०॥
अन्यदपि समुद्रज्येष्ठा इत्यादयः। ततः स्नानदक्षिणादानप्रतिमाप्रतिपादनं पूर्ववत्। यदा
तु पूर्वशांति समुच्चयस्तदा कालेस्याकर्वैकस्याग्नेयादिक्त्तं त्र प्रयोगः। तत्र यजमानो देशा
कालौ स्मृत्वा मम अस्याः पत्न्याः प्रथमरजोदर्शनि मुक्त दुष्टमास तिथ्यादि अमुकग्रहसू
चितेत्यादि संकल्प्य त्विजं कुर्यात्। ततआचार्यो भुवनेश्वर्यादिपूजांतः प्राकृ
पश्चाद्ब्रह्मा तत उदीच्यांच इंद्राणी संपूज्य यथोपक्रमं प्रयापहोमाभिषेकान् कुर्यादिति
विशेषः। अन्यत्सर्वं पूर्ववत्समानं॥ इति प्रथमरजोदर्शनशांतिः। इति श्रीनारायणभट्टविर

५८

चिते प्रयोगरत्ने समज्येष्ठसुतरामकृष्णोन्नीता रजोदर्शनशांतिः समाप्ता। अथ ग
र्भलंभनाख्यगर्भाधानं। रजोदर्शनात्षोडशाहोरात्राणि ऋतुस्तस्मिन् आद्यरात्रि
चतुष्कपर्वादिनिषिद्धानि दिनानि च वर्जयित्वा मघामूलादिव्यतिरिक्ते दैवज्ञोक्ते शुभ
काले दंपत्योः चंद्रतारानुकूल्ये गर्भाधानं कार्यं। तत्रापि युग्मासु रात्रिषु पुत्रः। अयुग्मासु कन्या सु
जायत इत्यादि ज्ञेयं॥ तत्र प्रयोगः। कर्ता प्रातरभ्यंगस्नानं कृत्वा। पत्नीमपि नवोदकं नस
लिलैः ससमृत्तिकापंचपल्लवपंचरत्नकुसुमैः स्नापयित्वा। तया सह मंगलवस्त्राभरणा
दि धृत्वाचम्य स्वस्तिवाचनं मधुदधिपर्केकृत्वोपासनाग्निं मरुत्संज्ञं प्रतिष्ठाप्य। देशका
लौ स्मृत्वा अस्याः मम भार्यायाः प्रतिगर्भसंस्कारातिशयद्वारा स्यां जनिष्यमाणसर्वग
र्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं
कर्म करिष्य इति संकल्प्य। तन्निमित्तं गर्भाधान कर्तुं प्राजापत्यहोमं करिष्ये।
तत्र देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा। प्रजापतिं चरुणावि

घ्यां च वषट्कार माज्येन प्रजापतिं चाज्येन त्रीणि पेण स्विष्टकृत मित्यादि स घोय क्ष्मेइत्यंत मुक्त्वा।
६० स्रौभिद्रु पेम गनावा चाय परिसम्हनादि पूर्णपात्र निधानांते कृत्वा। प्रजापतये त्वे
जुष्टं निर्वपामीत्यादि आज्य भागांतं कृत्वा वदान धर्मेणावदाय। ॐ प्रजापतये त्वे
स्वाहेति चरुणे काहतिं हुत्वा। विष्णुर्योनिमितितिस्रणां त्वष्टा विष्णुरनुष्टुप्। प्रधाना
ज्यहोमे विनियोगः। ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजा
६१ पतिर्धाता गर्भं दधातु ते स्वाहा०। विष्णव इदं न मम। ॐ गर्भं धेहि सिनीवालि गर्भं धे
हि सरस्वती। गर्भं ते अश्विनौ देवा वाधत्तां पुष्कर स्रजा स्वाहा०। विष्णवे०। ॐ हिरण्ययी
अरणी यन्निर्मंथतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे। स्वाहा०। विष्णवे०।
नेजमेषेति तिस्रणां त्वष्टा विष्णुरनुष्टुप्॥ प्रधानाज्यहोमे विनियोगः॥ ॐ नेजमेष
परापत सुपुत्रः पुनरापत॥ अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान्॥ स्वाहा विष्णवे०॥

६०

पथेयं पृथिवी मह्युत्तानां गर्भमादधे। एवं तं गर्भमाधेहि दशमे मासि सूतवे स्वाहा। वि
ष्णवे। ॐ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां। पुमांसं पुत्रमाधेहि दशमे
मासि सूतवे। स्वाहा विष्णवे०। प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। प्रधा
नाज्यहोमे विनियोगः। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभू
व। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां। मीपां स्वाहा।
प्रजापतय इदं न मम। ६ एवं समष्टुती हुत्वा॥ अप नः शोशुचदघमित्यस्य कु ९८
त्स ऋषिः कुत्सोऽग्निर्गायत्री। पत्न्या मूर्द्धाभिमर्शने विनियोगः। अप नः शोशुचदद
घमग्ने शुशुग्ध्यारयिं। अप नः शोशुचदघं। सुक्षेत्रिया सुगातुया वसूया च
यजामहे। अप नः०। प्र यद्भंदिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः०।
प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं। अप नः०। प्र यदग्नेः सहस्वतो

विश्वतोयंति मान वः। अप नः०। त्वं हि विश्वतोमुख विश्वतः परिभूर सि। अप न०। द्विषो नो विश्वतोमुखाति नावेव पारय॥ अप नः०। स नः सिंधुमि

वनावयाति पर्षा स्वस्तये। अप नः०। याः फलिनीरित्यथर्वणो भिषग्गोचयो

६१ नुष्टुप्। जपे विनियोगः। ॐ याः फलिनीर्या अफलाऽ अपुष्पा याश्च

पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः। एतान्वऽपि चा। वये

नरस्य मिति षष्णावसुश्रुतो। निस्त्रिष्टुप्॥ अग्न्युपस्थाने विनियोगः।

ॐ वयेनरस्य प्रहि जातयस्व वयः रूपवान स्तन्ये ३ स्वाये॥ पिपर्षि य

सहसस्पुत्र देवान्सो अग्ने पाहि नृतमवाजे अस्मान्॥ वयंते अग्न

उक्थैर्विधेम वयं हव्यैः पावकनद्रशोचे। अस्मे रयिं विश्ववारं सम्मि

न्वास्मे विश्वानि द्रविणानि धेहि। अस्माकमग्ने अध्वरं जुष

६१

स्वसहसः सूनो त्रिषधस्थ हव्यं। वयं देवेषु सुकृतस्याम शर्मणा न स्त्री वरूथे

न पाहि। विश्वानि नो दुर्गहा जा० तवेदः सिंधुं न नावा दुरितातिपर्षि॥ अ

ग्ने अत्रिवंन मसा गृणानो ३ स्वाकं बोध्यविता तनूनं॥ यस्त्वा हृ

दा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मा

सु धेहि प्रजाभिरग्ने अमृतत्वमस्यां। यस्मै त्वं सुकृते जातवेद उ लो

कमग्ने कृणव स्योनं॥ अश्विनं पुत्रिणं वीरवंतं गोमंतं रयिं नशा

ते स्वास्ति। अग्निस्तिक विश्ववस्त्तमामिति द्वयो वसूयवो ग्निरनुष्टुप्॥

अग्न्युपस्थाने विनियोगः। अग्निस्तिक विश्ववस्त्तामं तुविब्रह्माणं

मुत्तमं अतूर्तं श्रावयेत्पतिं पुत्रं ददाति दाशुषे। अग्निर्ददा

६२ तु सत्पतिं स्वासाह्योपुत्रान्नभि ॥ अग्निरत्यं रघुष्यं दजेतारमपरा
जितान्नौं । इत्यष्टभिरग्निमुपस्थाय । स्विष्टकृदादि होमशेषं समा
प्य ॥ सूर्यो । दिवस्यात्विति पंचर्चस्य सूक्तस्य ॥ चक्षुः सूर्यो गायत्री
सूर्योपस्थाने विनियोगः ॥ ॐ सूर्यो नो दिवस्पातु वातो अंतरि
क्षात् । अग्निर्नः पार्थिवेभ्यः ॥ जोषा सवितर्यस्य ते हरः शतं सवाँ अ
र्हति । पाहि नो दिद्युतः पतन्त्याः ॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्व
पर्वतः । चक्षुर्धाता दधातु नः । चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै त
नूभ्यः । सं चेदं विच पश्येम ॥ सुसंदृशं त्वा वयं प्रति पश्येम सूर्य
विपश्येम नृचक्षसः ॥ अनेन सपत्नीकः सूर्यमुपस्थापयेत् ॥

MEMORIAL

णान्न्भोजयित्वा तेभ्यः स्वस्त्ययनपूर्वं माशिषो गृहीत्वा भुं
जीत ॥ ततः सायंकालीननित्यकर्म कृत्वौ भोशुक्लांबरानुलेप
नमाल्याभरणादिभिरलंकृतौ स्वलंकृतसुधूपितगंधमा
ल्यामलदीपयुक्तं गृहं प्रवेशितं । ततो भर्त्ता अन्नगनं जंतु वर्जि
तं सुसुखस्पर्शे वितानोपरिमंडितं पर्यंकमारुह्य प्रागुक्तशो
भने मुहूर्ते स्त्रियमारोप्याश्वगंधा कल्कं कदूर्वाकल्कं वा सू
क्ष्मवस्त्रे निक्षिप्य उदीर्ष्वातिद्वाभ्यां सूर्यां सावित्री सूर्या सा
वित्री आद्या स्त्रिष्टुप् अंत्यानुष्टुप् । भार्यायादक्षिणना
सापुटे श्वगंधारससेचने वि० ॥ ॐ उदीर्ष्वातः पतिव

३

तीर्थैषा विश्वावसुं नमसा गीर्भिरीळे ॥ अन्यामिच्छ पित्
षदं व्यक्तां सते भागो जनुषा तस्य विद्धि ॥१॥ उदीर्ष्वातो वि
श्वावसो नमसेळामहे त्वा ॥ अन्यामिच्छ प्रफर्व्यं सं जायां
६३ पत्या सृज ॥ स्वाहेति वामभागोपविष्टां भार्यां पाददक्षि
णेनाश्मानि विलेऽश्वगंध्यादिरसं सिक्त्वा तद्रसे तु दरंगते
तामाचमय्यापेयात् । इदानीं नस्यं दत्वे वसिष्ठ कृदादि
होमशेषं समापयति । उपगामेत्वापं कमं ४ ॥ गंधर्वस्य वि
श्वावसोर्मुखमसीति मंत्रेण होमोक्तं कषायादिभिर्वि
धानुपूर्व्यां निमिति तिस्त्रभिर्नेत्रमेवं तिचतस्त्रभिक्ति स्त्रभि
६३

रंगुलीभिर्योनिमभिमृश्य ॥ तां पूषन्नित्यस्य सूर्या सावि
त्री सूर्या सावित्री त्रिष्टुप् । जपे विनि० ॥ तां पूषञ्छिवतमां ॥ यो
गर्भमित्यस्य वसिष्ठः पर्जन्योपादहने त्रत् गायत्री जपे वि० ।
यो गर्भमोषधीनां ॥१॥ अहं गर्भ प्रजावान् प्रजुन्नत 'प्राजापत्यो
गर्भ इंद्रो वा त्रिष्टुप् जपे वि० ॐ अहं गर्भमदधामोषधीषु
इति त्रीन्मंत्रान् जपित्वा सकृदुपमगच्छेत् । ततः प्राणेतर
रतादध्याम्यसावित्यनुप्राणय यथाह्यभिरग्निगर्भा यथा
द्यौरिंद्रेण गर्भिणी वायुर्यथा दिशां गर्भ एवं ते गर्भं दधा
म्यसाविति स्त्री हृदयमभिमृश्य वामेत ॥ मंत्र हृदयपि असा

त्रिस्यस्थाने प्रथमैकवचनान्तं स्वनामकं वदेत्॥ अस्मिन्क
र्मणि भूतं ब्राह्मणान्भोजयित्वा॥ दक्षिणां वा॥ यदि प्रथमरजोद
६४॥ र्शनं दुष्टतिथिवारनक्षत्रादिषु जायते तदा दोषपरिहाराय
शौनकोक्तां शांतिं कृत्वा प्रशस्ततिथ्यादिषु ऋतुदर्शनपर्य
न्तं तस्यां गमनं वर्ज्यं॥ तदाह ज्योतिर्वसिष्ठः॥ प्रभूतदोषं यदि
दृश्यते तत्कुर्यं ततः शांतिककर्म कार्यं॥ विसर्जयेद्दैवतापे
क्षया वा द्वितीयदर्शनमिष्टे काले इति॥ एतत्कर्माकरणे प्रा
यश्चित्तमाहाचार्यः॥ गर्भाधानस्याकरणात्तस्यां जात
स्तु दुष्यति॥ अकृत्वा गां द्विजे कृत्वा कुर्यात्पुंसवनं पतिः॥ इति प्रयो ६४

गरत्ने गर्भाधानप्रयोगः॥ अथ पुंसवनानवलोभनयोः प्रयो
गः॥ गर्भमासप्रभृति तृतीयमासे गर्भाभिव्यक्तौ तदनभिव्यक्तौ
तु चतुर्थे षष्ठेऽष्टमे वा मासि अतिरिक्तादितिथौ पुष्यादिपुंसन
क्षत्रे गुरुशुक्रसोमबुधगुरुवारेषु विष्ट्यादिदोषरहिते
दैवज्ञोक्ते काले पुंसवनानवलोभने कुर्यात्॥ अत्रानियतकाल
त्वात्तद्गृह्यसूक्तास्तबाल्यवार्द्धक्यमलमासादिष्वपि न दोषो
दोषरहितकालालाभे तु इह तद्विहितकाललाभे तु शुक्रास्ता
दौ न कार्यं। सीमंतदिने वा कार्यं॥ एतत्करिष्यमाणः पतिः पूर्वे
द्युः पुंसवनार्थं समानरूपवत्सायां गोस्तदलाभेऽन्यस्या

वाक्षीरं दध्यर्थं पुष्पं वा माषषट्कं यवत्रयं च संपाद्य वृत्ताका-
रमविरलच्छायमश्वत्थकाशाग्रहं कं देशं कृत्वा विधिवत्स्वस्तिवा
चनगृह्ययज्ञाभ्युदयिकानि कृत्वा गर्भाभिवृद्ध्यविरोधिहविषा कृ
६५ तैकभक्तां भार्यां कृत्वा ब्रह्मचारी सन्परेद्युरनुकूलकाले मंगल
स्नातां परिहितांहतवाससं प्रावृतप्रावरणीयां भूषणभूषितां
भार्यां कृत्वा पूर्वं कृतदृशो स्वदक्षिणात उपवेश्य सधीवा कृतस्वस्ति
वाचनादि देशकालौ [illegible] स्मृत्वाऽस्यां भार्यायामुत्पत्स्यमा
नस्य गर्भस्य बैजिकगार्भिकदोषपरिहारपुंरूपताज्ञानो
दयप्रतिरोधिपरिहारद्वारा परमेश्वरप्रीत्यर्थं पुंसवनम ६५

नवलोभनं च तंत्रेण करिष्ये इति संकल्प्य विधिवत्कौतुकसू
त्रमाबध्य विधिवद्दोपासनाग्निं पवमानसंज्ञं प्रज्वाल्याघर्षो
पमाणे पुंसवनानवलोभनहोमदेवतापरिग्रहार्थं अन्वाध
धानं करिष्ये अस्मिन्नन्वाहितेग्नावित्यादि चक्षुषी आ
ज्येनेत्यंतमुक्त्वा प्रजापतिं चरुद्रव्येण शेषेण स्विष्टमित्याद्यु
क्त्वान्वाधाय परिस्तरणादि प्रणीताप्रणयनावधि प्राकृतं तत्र
कृत्वा प्रजापतये त्वा जुष्टं निर्वपामीति चतुरो व्रीहिमुष्टीन्निरु
प्य प्रोक्षणादि वधातादि बर्हिरासादनांतं कृत्वा स्वदक्षिणतः प्र
त्यक्ग्रीवमुत्तरलोमानडुहं चर्मास्तीर्य तस्मिन्नग्निं चांतरा

६६ पत्नीमाचांतसलिलामानीय चर्मण्युपवेश्यतमान्वारब्धं इ
ध्माधानाधान्यभागौ तं कृत्वा प्रक्षालिते प्रसृतीकृते दक्षि
णे पत्नीपाणौ प्रसृतिमितं तण्डुलं निक्षिप्य तदुपरि लिंग
वघवं तत्पार्श्वयोरं उपवन्माषद्वयं चनिधाय किंपिबसीति त्रिः
पतिः पत्नीं पृच्छेत्॥ सा च पुंसवनमिति त्रिर्ब्रूयात् सयवमाषं दत्त रा
द्धूचिनिःशेषं पीत्वा जलमाचम्य पुनरेवं द्विः प्रश्नप्रतिवच
नपूर्वकं प्राश्या चामेत्। एतत्पुंसवनं॥ अनवलोभनं तु दू
ञ्चले संगृह्य प्रजावदादि जीवसुत्र संज्ञकं च सूक्तं जपित्वा :॥ ६६

मंडलागारछायायामुपविष्टायाः प्राङ्मुख्याः स्त्रियः पश्चिमत
स्तिष्ठन् पतिस्तदाननमुन्नमय्य दक्षिणनासाबिले स्वांगुष्ठाग्रे
ण दूर्वारसमासिंचेत्। तत्र प्रजावदाद्यं सूक्तं। ॐ आ ते गर्भो यो
निमेतु पुमान्बाण इवेषुधिं। आ वीरो जायतां पुत्रस्ते दशमास्यः।
करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते॥ अन्नूनः पूर्णजा य
तामश्लोणोपिशाचधीतः। पुमांस्ते पुत्रो नारि तं पुमाननुजा
यजतां॥ तानि भद्राणि बीजान्यृषभा जनयंतु नौ॥ यानि भद्राणि बी
जान्यृषभा जनयंति नः। तैस्त्वं पुत्रान्विंदस्व सा प्रसूर्धेनुका
भव॥ कामः समृध्यतां॥ महामपराजितमेवमेवं काममपदेव तन्मे

६७ वा पाः समर्चयेत्॥ ॥अथ जीवपुत्राख्यं सूक्तं। ॐ अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभि प्रबुध्यतामियं॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु। मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यंती प्रजां सुमनस्यमाना। अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघं॥ शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं देवकृतं ब्राह्मणा कल्पमानं तेन ह नि ६७

पुंसवनानिबंधः

न्मि योनिषदः पिशाचान् क्रव्यादो मृत्यूनधरान्पातयामि दीर्घमायुस्तव जीवंतु पुत्राः। एते दशाभिमंत्रणे नैस्पष्टत्ते आचांतज लपापल्याः स्पष्टः प्राजापत्यचरुमवदानधर्मेणावदाय प्रजापतये स्वाहेत्येकामाहुतिं हुत्वा यत्ते सुशीम इति मंत्रेण पत्न्या हृदयदेशं पाणिनास्पृशेत्। यत्ते सुशीम इति मंत्रस्य हिरण्यगर्भ ऋषिः प्रजापतिर्देवता। अनुष्टुप्छंदः। भार्याहृदयालंबने विनि०॥ ॐ यत्ते सुशीमे हृदये हितमंतः प्रजापतौ। मन्येहं मां न द्विद्वांसं माहं पौत्रमघं न्नियां॥ ततः स्विष्टकृदादि होमशेषं समाप्य ब्राह्मणान्भोज्याः। इदं कर्म संस्कारत्वात्प्रतिगर्भं कार्यं॥ छ॥ दा

५८ प्रथमगर्भ एवेति केचित्‌॥ अस्य कर्त्ता पतिस्तदसंभवे देव
रो वा॥ इति पुंसवनानवलोभनकर्मणी॥ अथ सीमंतोन्नय
नं॥ तच्च गर्भमासापेक्षया चतुर्थे षष्ठे अष्टमे वा मासि असंभ
वे यावत्प्रसवं शुक्लपक्षे पुनर्वसुपुष्याभिजिद्धस्तप्रोष्ठपदा
नुराधाश्विनीमूलश्रवणरेवतीरोहिणीमृगशिरःसंज्ञ
कानां पुन्नक्षत्राणां चतुर्धा विभक्तानां प्रथमपादद्वये ष
ष्ठ्यष्टमी द्वादशी चतुर्थी नवमी चतुर्दश्यमावास्या व्यति
रिक्ततिथौ सोमबुधबृहस्पतिशुक्रवारे चंद्रानुकूल्ये ५८

विष्ट्यादिदोषाभावे शुभे शुभलग्नादौ कार्यं॥ अत्राधिकमास
गुरुशुक्रास्तादौ नायं दोषः कालानंतरसंभवे पर्ववन्नियतका
लत्वात्‌॥ अथ प्रयोगः॥ सीमंतकर्म करिष्यन्‌ पतिस्नानकुडहम
जिनमपक फलयुग्मयुतौदुंबरस्तबकौ वा त्रिशुक्लवर्णौ शल
ली॥ त्रीणि कुशपिंजूलानि च संपाद्य पुण्याहवाचनग्रहयज्ञा
भ्युदयिकानि तदहरेवानुष्ठाय मंगलस्नातां परिवृतप्रावृता
हतवाससो युगलामलंकृतां पत्नीं स्वदक्षिणत उपवेश्य देशका
लौ स्मृत्वा तन्नुरुधिरप्रियालक्ष्मीभूतराक्षसीगणाद्दूरनि

रक्षसनक्षेमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशा
नद्वाराप्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणजनकातिश
यद्वाराश्रीपरमेश्वरप्रीत्यर्थं स्त्रीसंस्काररूपं सीमंतोन्नय
नाख्यं कर्म करिष्ये इति संकल्प्य बद्धं कृतकौतुकबंधो अ
र्चितेष्टदेवतां कृत्वा शुभमुहूर्ते औपासनाग्निं मंगलनामानं
विधिवत्प्रति ष्ठाप्य समिद्द्वयमादाय पुनर्दर्शकालो स्मरत्वा
अकरिष्यमाणसीमंतोन्नयनहोमदेवतापरिग्रहार्थ
मित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वादि धातारादिःराका
१८ त्रिर्विष्णुप्रजापतिंचैताःप्रधानदेवता आज्येन शेषेण ६१

स्विष्टकृ तमित्यादि पूर्ववदुक्त्वाग्नाबाधाय परिसमूहनादिकृ
त्वा प्रत्यगग्नेःस्वदक्षिणतःप्राग्गीवमुत्तरलोमकमानडुहमजि
नमास्तीर्योदगग्रे दर्भेषु प्रोक्षणीपात्रस्रुवौ प्रणीताज्यपा
त्रइध्माबर्हिषी चक्रमादासाद्य पवित्रकरणाद्याज्यसंस्का
रांते कृते तस्मिन्नजिने माचांतोदकां प्राङ्मुखीं पत्नीमुपवेश्य
तयान्वारब्धाद्याज्यभागांतं कर्म कृत्वा धाता ददातु दाशुषइ
ति मंत्रद्वयस्य हिरण्यगर्भो धाता नुष्टुप्।द्वितीया त्रिष्टुप्॥
सीमंतोन्नयनप्रधानाज्यहोमे वि०।एवमग्रेपि।ॐ धाता
ददातु दाशुषे प्राचीं जीवातुमक्षितां।वयं देवस्य धीमहि सुम

तीव्रवाजिनीवतः स्वाहा। धात्र इदं। धाता प्रजानामुत राय ईशे धा
तेदं विश्वं भुवनं जजान। धाता कृष्टीरनिमिषाभि चष्टे धात्रे इद्
व्यं घृतवज्जुहोत धात्र इदं०॥२ राकामहमिति द्वयोः गृत्समद ऋ
७० कः जगती। विनियोगः प्राग्वत्॥ ॐ राकामहं सुहवां सुष्टुती हु
वे शृणोतु नः सुभगा बोधतु त्मना॥ सीव्यत्वपः सूच्याछिद्यमानया
ददातु वीरं शतदायमुक्थ्यं॥१ स्वाहा राकायै इदं०। ॐ यास्ते राके
सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य
सुमना उपागहि सहस्रपोषं सुभगे रराणा॥२ स्वाहा राका
यै इदं। नेजमेषेत्यादिमंत्रत्रयस्य त्वष्टा विष्णुर्नुष्टुप्॥ विष्णु ७०

र

[redacted]योगः प्राग्वत्॥ नेजमेषपरापत०। स्वाहा विष्णव इदं। यथेयं
पृथिवी मह्युत्ताना गर्भमादधे। एवं तं गर्भमाधेहि दशमे मासि
सूतवे स्वाहा विष्णव०। ॐ विष्णोः श्रेष्ठेन रूपेणा स्यां० स्वाहा वि
ष्णव इदं०। ७ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। विनियो
गः प्राग्वत्। प्रजापते न त्वत्०। स्वाहा प्रजापतय इदं०। एवमष्टा
ज्याहुतीः स्रुवेण हुत्वा पत्न्याः पश्चिमतः प्राङ्मुखस्तिष्ठन् अप
क्वफलयुग्मान्वितमौदुंबरस्तबकयुग्मं त्रिशुक्लां शललीं कुशां
कुरत्रयं चैकीकृत्य पाणिना गृहीत्वा तन्मूलेन पत्न्याः केशलला
टयोः संधिमारभ्यामूर्ध्वं प्रदेशात्॥ ॐ भूर्भुवः स्वरोमिति मं

त्रेण त्रिश्चतुर्वा प्रत्युन्नयनं मंत्रमावर्त्तयन् सीमंतमुन्नयेत्।
ॐ भूर्भुवः स्वरिति मंत्रस्य प्रजापतिः प्रजापतिर्बृहती सीमंत
मुन्नयने वि०। ततो यथाचारं सयवां सौदुंबरफलमालां तत्कं
७१ ठे निधाय वीणा[illegible] गाथिनौ द्विजौ सोमं राजानं संगायेतामि
ति प्रेषयेत्॥ तौ च। ॐ सोमो नो राजावतु मानुषीः प्रजा निवि
ष्टचक्रासाविति मंत्रे असाविति स्थाने गंगा इत्यादि समीप
स्थनद्याः संबुध्यंतं नाम निर्दिश्य तौ [illegible]पा गायेतां॥ साम गा
नापरिज्ञाने मंत्रमात्रं त्रिः पठेतां॥ ततः स्विष्टकृदादि होमशेषं
समाप्य ब्रह्मणे वृषभं दक्षिणां तदभावेऽन्यस्मै विदुषे ७१

ब्राह्मणाय दत्वा पतिपुत्रवतीभिर्वृद्धाभिरुपाविष्टं मंगलाचारं
२ कारयेत्॥ ३॥ ततो ब्राह्मणभोज्याः॥ इदं कर्म गर्भे वक्तार्यं। इदं च प्र
थमगर्भे नावर्तते। तथा च हारीतः॥ सकृच्च कृतसंस्काराः सीमं
तेन द्विजातयः। यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेत्। का
रिकायां नावर्त्तत इदं कर्म प्रतिगर्भमिति क्षिपक्षेरिति। अकृ
तसीमंतायाः प्रसवे विशेषः सत्यव्रतेनोक्तः। स्त्री यद्यकृत
सीमंता प्रसूयेत कथंचन॥ पुत्रं गृहीत्वा विधिवत्पुनः
संस्कारमर्हतीति॥ इति सीमंतोन्नयनप्रयोगः॥ ५॥ अथ
विष्णुबलिः॥ गर्भाष्टमे मासे पूर्वं दंपती स्नातौ धृता

हतवाससौ अलंकृतौ भवेतां। ततः पतिः प्रागुक्तवदाभ्युदयि
कं पुण्याहवाचनं च कृत्वा तदहरेव वा इदं कर्त्ता देशकालौ स्मृत्वा
गुर्विण्या मम पत्न्या गर्भस्य निर्बाध परिपोषण पूर्वक सुखप्र
७२ सूति। सिध्यर्थं गर्भाधिदेवता विष्णु प्रीति कामोहं विष्णुबलि
नाम कं कर्म करिष्ये इति संकल्प्य द्वितीयां सप्तमीं द्वादशीं श्रव
णरोहिणी पुष्येषु चंद्रबले विष्ट्यादिदोषाभावे पूर्वाह्णे गृह्यांग
णौ गृहेना स्थंडिले लौकाग्निं प्रतिष्ठाप्य पुनर्देशकालौ कुत्वा धक
रिष्यमाणविष्णुबलि होमे देवता परिग्रहार्थमित्यादि चक्षुषी
आज्येनेत्यंतमुक्त्वा विष्णुः प्रधानदेवता चतुःषष्टिवारं चरुणा
शेषेण स्विष्टकृतमित्याद्युक्त्वान्वाधाय परिसमूहनादि आज्य ७२

तं
दर्भाग्न्हदयप्रक्षेपांतं कृत्वा सिद्धान्नेन सहाज्यं त्रिः पर्यग्नि कृत्वा
ससुव संमार्जनांतं कृत्वा चरुं पात्रांतरे पृथक् कृत्वाग्नावधिश्रित्या
भिघार्योदगुद्वास्याज्यदक्षिणतो बर्हिष्यासाद्य प्रत्यभिघारणाद्याज्य
भागांतं कृत्वा दक्षिणतोग्नेः स्थंडिले ष्टदलपद्मे स्वस्तिकं वा प्रकल्प्य तत्र
विष्णुमावा[struck]ह्य षोडशाभिरूपचारैरभिपूज्य पुनर्यथासनमासि
त्वा पत्न्यन्वारब्धो वदानधर्मेण चरुमवदाय स्रुवा चतुःषष्टिमंत्रैश्चतुः
षष्ट्याहुतीर्जुहुयात्। तत्र मंत्रक्रमः। अतो देवा अवंतु न इत्यस्य सूक्तस्य मेधा
तिथिर्विष्णुर्गायत्री।। विष्णोर्नुकमिति सप्तदशर्चस्य सूक्तस्य औचथ्य
थ्यो दीर्घतमा विष्णुः प्रथम सूक्ते त्रैष्टुभं।। द्वितीय तृतीये जागते।। संवा
भित्य एवं स्य सूक्तस्य भरद्वाजो विष्णुस्त्रिष्टुप्। परो मात्रयेति वर्गद्वयस्य वासिष्ठो

विष्णुस्विष्टं । सहस्रशीर्षेति षोलशर्चस्य सूक्तस्य नारायणः पुरुषोनुष्टुबंत्या त्रिष्टु
प् । विष्णुर्देवता [illegible] मिति मंत्रत्रयस्य हिरण्येष्टप् ॥ सर्वत्र विष्णुबलिप्रधानहोमे विनि० । वि
ष्णव इदमिति सर्वत्रोद्देशत्यागो ॥ अनंतरमग्नेरैशान्यां द्वात्रिंशदंगुलायामविस्तारं
गोमयोपलिप्ते स्थंडिले चतुरंगक्रीडावत्समचतुरस्रं चतुरंगुलं चतुःषष्टिपदं सितेन रजसा
मंडलं कृत्वा तेषु पदेषु नैऋतिपदादिक्रमेण प्रथमं बाह्यावर्ते ततस्तथैवानंतरावर्ति
८३ षु च प्रागुक्तचतुःषष्टिमंत्रैः प्रणवाद्यैः स्वाहांतैः प्रादक्षिण्येन चरुशेषेण बलिं दत्वा सर्व
त्र विष्णव इदं न ममेत्युद्देशत्यागः ततो मंडलमध्ये । ॐ नमो नारायणायेति बलिं
दत्वा पूर्ववत्त्यक्त्वा तेनैव मंत्रेणार्घ्यं च दत्वा बलिशेषात्किंचिदन्नमादाय पिंड
द्वयं कृत्वा दंपती पृथक्प्राशनीयातां । ततः आचम्य पतिः स्विष्टकृदादिहोमशेषं समाप्य
गुरवे दक्षिणां दत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा दंपती भुंजीयातां । अयं वि
ष्णुबलिः प्रतिगर्भमावर्तते ॥ प्रतिगर्भं बलिः कार्यः सीमंतश्च प्रकाशस्पते इत्या ८३
श्वलायनवचनोक्तेः । इदं गृह्यसूत्रानुक्तत्वादिदानीं शिष्टा नाचरंति । इति विष्णुबलिः ॥

अथ जातकर्मप्रयोगः । जातमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादौ उदङ्मुखः स्नात्वा । आ
चम्य सितचंदनमाल्यादिभिरलंकृत्य ततो नालछेदनात्पूर्वं कृतकादिव्यतिरिक्तैरस्पृष्टमकृत
स्नानपानप्रक्षालितवत्के कुमारं मातुरुत्संगे प्राङ्मुखमवस्थाप्य ब्राह्मणैः सह पुण्याहवाचनं कृत्वा ।
देशकालौ संकीर्त्य मम अस्य कुमारस्य गर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धि बी
जगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्य इति संकल्प्याभ्युदयि
कं श्राद्धं हिरण्येन विधाय होमकरणपक्षे वा० [illegible] ततो लौकिकाग्निं प्रबलसंज्ञं विधि[illegible]
प्रतिष्ठाप्य देशकालौ संकीर्त्य । अस्मिन्जातकर्मणि होमे परिग्रहार्थं अन्वाधानं करिष्ये इत्यादि
चक्षुषी आज्येनेत्येतदंतमुक्त्वा अग्निं इंद्रं प्रजापतिं विश्वान्देवान्ब्रह्माणमाज्येन प्रक्षेपशेषेण
स्विष्टकृतमित्यादि सद्यो यक्ष्ये इत्यंतमुक्त्वा पापपरिसमूहनाद्याज्यभागांतं कृत्वा प्रधा
न देवता अग्न्यादि चतुर्थ्यंतनाममंत्रेणाज्यं हुत्वा देवतोद्देशेन त्यागं कुर्यात् । ततो विषमभागेन
मधुसर्पिषी मिश्रीकृत्य । ततो जातके । मेक्षिप्य तत्र सुवर्णरजो विमोक्य यावद्वक्ष्यमा

जश्चनेनिचाय।प्रबतेददामिमधुनोघृतस्यवेदंसवित्राप्रसूतिर्मघोनां।आयुष्मान्गुप्तो
देवताभिः शतंजीवशरदो लोके अस्मिन्नितिमंत्रेणानेनवहिरण्येनकुमारंप्राशयित्वा।त
द्धिरण्यंप्रक्षाल्यकुमारस्यदक्षिणकर्णेनिचाय।तन्मुखसमीपमभिमुखमानीय ॐ
७४ मेधांतेदेवः सवितामेधांदेवीसरस्वती।मेधांते अश्विनौदेवावाधत्तांपुष्करस्रजा
वितिकर्णेजपित्वा।पुनस्तद्धिरण्यंसव्यकर्णेनिचायैतामेवर्चंजपेत्।ततःशिशोरंसयोयु
गपदभिमृशेत्।ॐअश्माभवपरशुर्भवहिरण्यमस्तृतंभव।वेदोवैपुत्रनामासिसजी
वशरदःशतमितिमंत्रेण।इंद्रश्रेष्ठानि [illegible] स्मदइंद्रस्त्रिष्टुप्।अंसाभिमंत्रणेवि
नियोगः।ॐइंद्रश्रेष्ठानिद्रविणानिधेहि।चित्तिंदक्षस्यसुभगत्वमस्मे।पोषंरयीणामरि
ष्टिंतनूनांस्वाद्मानंवाचःसुदिनत्वमह्नां।अस्मेप्रयंधीतिविश्वामित्रइंद्रस्त्रिष्टु
प्।अस्मेप्रयंधिमघवन्नृजीषिन्निंद्ररायोविश्ववारस्यभूरेः।अस्मेशतंशरदोजी ७५

वसेधा।अस्मेवीरांछश्वतइंद्रशिप्रिन्।इतिमंत्राभ्यांचाभिमर्शः।ततोरक्षायुषोरभिवृद्ध्यर्थं ॐअं
गादंगात्संभवसिहृदयादधिजायसे।आत्मावैपुत्रनामासिसजीवशरदःशतमितिमंत्रमुच्चा
र्यमूर्द्धानंत्रिराजिघ्रेत्।ततःशिशोःकरिष्यमाणंनामतेदेवस्मरेत्।अथस्विष्टकृदादिहोमशे
षंसमाप्ययथाचारंहिरण्यादिकेनमातुर्दक्षिणस्तनंप्रक्षाल्य ॐइमंकुमारोजराधयतु
दीर्घमायुष्प्रजीवसे।।अस्यैस्तनेप्रपंजानाआयुर्वर्चोयशोबलमिति मंत्रेणमातुःकुमा
रंपाययित्वा।ब्राह्मणेभ्योगोभूतिलहिरण्यादिकर्माजितंयथाशक्तिदत्वाब्राह्मणेभ्यःआशि
षोवाचयेत्।जन्मलग्नेदुष्टस्थानस्थितग्रहजपीडानिवृत्त्येतत्प्रीत्यर्थंविशेषतोद
क्षिणादेयाः।तमर्वंतमितिपंचानांवामदेवोग्निर्गायत्री।तमर्वंतमितिपंचभिराज्य[illegible]ः।
होमोत्रस्तावत्तः।कुमारायश्रेतज्जातकर्ममंत्रकंकार्यं।रात्रौसंध्यायांग्रहणेजाताशौचां
तरमध्येपिदरंकार्यं।मृताशौचमध्येजातस्त्रेतस्वाशौचांतेकार्यं।।पितरिग्रामांतरंग

निपित्र्यादिगोत्रजोऽस्य एवं कर्मणाहं कुर्यात्॥ ॥इति श्रीनारायणभट्टकृते प्रयोगरत्ने
जातकर्मप्रयोगः॥॥ ॥२५॥ अथ षष्ठीपूजा॥ पंचमे षष्ठे च दिने षष्ठ एव वा पूर्वरात्रे पित्रा
दिः आचम्य प्राणानायम्य देशकालौ स्मृत्वास्य शिशोरायुरारोग्यसकलानिष्टशांतिद्वारा
 श्रीपरमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदानां षष्ठीदेव्या जीवंतिकायाश्च यथामीलितोप
पचारैः पूजनं करिष्य इति संकल्प्य षोडशोपचारैः स्वतंत्रेण पूजयेत्। पृथग्वा संकल्पे प्रत्ये
गेव पूजा कार्या। एतत्प्रतिमाश्च लेपनादिना कुड्ये लेखनीयाः॥ पीठादौ वाक्षतपुंजेषु
पूजा निवेश्याः पुरुषाः शस्त्रहस्ताः क्षिपश्च नृत्यगीतकारिण्यः। अस्यां रात्रौ जागरणं कु
र्युः सूतिकागृहे च धूमाग्निदीपशस्त्रमुसलादीन् बुविन्यसेत् पुत्रं कार्यं सर्षपाश्च सर्वतो वि
किरेत्। विप्रेभ्यश्च ताम्बूलं खाद्यदक्षिणादि दद्यात्। जननजननाशौचमध्येऽपि प्रथमषष्ठ
दशमदिनेषु दाने प्रतिग्रहे च न दोषः। अन्नं तु न देयम्॥ षष्ठी प्रार्थना गौरीपुत्रो यथा स्कं
दः शिशुत्वे रक्षितः पुरा। तथा ममाप्ययं बालः षष्ठीके रक्ष्यतां नमः॥ ॥इति नारायणभट्टकृते
रामेश्वरभट्टसुत
३ अन्यदपि यथाचारं कार्यं। जन्मदाभ्यो माषादिबलिर्देयाः॥

MEMORIAL

प्रयोगरत्ने षष्ठीपूजाविधिः॥ अथ नामकरणप्रयोगः॥ जन्मत एकादशे
द्वादशे वा यथाचारं नियतदिने वा नामकरणं कार्यं। नियतकाले विविष्टिवै
धृतिव्यतिपातग्रहणसंक्रान्त्यमावास्याश्राद्धदिने पुनः कार्यं। नियतकाले
क्रियमाणे गुरुशुक्रास्तबाल्यवार्द्धक्यवक्रातिचारमलमासादिनिषेधो नास्ति॥
नियतकालातिक्रमे ज्योतिःशास्त्रोक्ते शुभे काले कार्यं। सर्वथात्र पूर्वाह्णः
प्रशस्तः। अत्र होमः कृताकृतः। उक्तकाले शिशोर्नाम चिकीर्षुर्विप्रानाहूय
पूर्वेद्युस्तदहरेव वा स्वस्तिवाचनमुपक्रम्य पुण्याहत्रयमुक्त्वा करिष्यमाण
नाम वक्तुं धर्मं तमुक्त्वा अरेतन्नाम्नः स्वस्ति भवंतो ब्रुवंत्वित्युक्ते विप्रैरेतन्ना
म्नः स्वस्तीति प्रत्युक्ते शेषं स्वस्तिवाचनं समापयेत्। ततः कुमारस्य नाममा
तृविदधामीति विप्राननुज्ञाप्य तैर्धीयतामित्यनुज्ञातो देशकालौ

निर्दिष्टस्य शिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्री
परमेश्वरप्रीत्यर्थं नामकरणं करिष्ये ॥ ग्रहयज्ञाभ्युदयिकं यथाशक्ति कृत्वा यथाचा
७६ रं स्वकुलदेवताभक्तेत्यादि नाम कृत्वा जन्मकालीनमासे नाम कुर्यात् ॥ तच्च ॥ कृष्णो
नंतोऽच्युतश्चक्री वैकुंठोथ जनार्दनः ॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥ यो
गीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् ॥ अत्र यथा चैत्रादि मार्गशी
र्षादिक्रमः ॥ ततः स्त्रीपुरुषवाचि देवतावाचि वा स्वेष्टं युग्माक्षरं द्व्यक्षरं कुमा
रं प्रतिष्ठाकामस्य चतुरक्षरं ब्रह्मवर्चसकामो नाम कृत्वा ततोऽभिवादनी
यं विप्रादिवर्णक्रमेण शर्मवर्मगुप्तदासान्यतमपदांतमुपपाद्य कुर्यात् ॥
तच्च मौंजीबंधनान्मातापितरावेव जानीयातां उपनयनकाले चानेन ना ७६

म्नाभिवादयेति कुमारं प्रति वाच्यं ॥ अत्रायं शिष्टाचारः ॥ तंदुलान्कांस्यादिपात्रे प्रसा
र्य तदुपरि सुवर्णशलाकया कुलदेवताप्रयुक्तमादौ अमुकभक्त इति नाम ले
स्त्री ३ ख्यं ॥ ततो मासनाम ॥ ततो ज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मनक्षत्र
पादप्रयुक्ताक्षरादि नाम ॥ ततो व्यावहारिकं स्वेष्टं नामेति चतुष्टयं लिखि
त्वा नामदेवताभ्यो नम इति संपूज्यामुकनाम्ना त्वममुकोऽसीति स्वयं दक्षि
णस्या मातुरुत्संगस्थस्य शिशोर्दक्षिणकर्णे कथयित्वा तदस्तु मित्रेत्या
दि मंत्रपाठांते विप्रैर्नाम सुप्रतिष्ठितमस्त्वित्युक्ते अमुकनाम्ना अमुकनामा
यं भवतोऽभिवादयेतोऽसुतको नामकर्ता विप्रानभिवादयेत् ॥ ततः कर्त्ता देव
ताभ्यो ब्राह्मणेभ्यश्च नत्वा यथाविभवं विप्रान्भोजयेत् ॥ दक्षिणां दद्यात् ॥

विप्राशिषश्च गृह्याः ॥ कुमार्या अपि नामकरणममंत्रकं कार्यं विषमाक्षरं तु नाम ॥ हो
मपक्षे तु पार्थिवाग्नौ जातकर्मवदेव प्रधानाहुतीर्हुत्वा नामयथोक्तं धृत्वा स्वीष्टकृदा
दिशेषं तंत्रं कुर्यात् ॥ अत्र जातकर्मवत् सित्राद्याः क्रमेण कर्तारः ॥ ॥ छ ॥ इति ना
७७ मकरणप्रयोगः ॥ ॥ अथ पर्यंकारोपणं । तत्र नामकरणदिने षोडशे द्वाविंशे
न्यस्मिन्वा ज्योतिःशास्त्रोक्तमृदुक्षिप्रनक्षत्रादियुक्ते शुभकाले यथाचा
रं कुलदेवतापूजां विधाय अलंकृतं शिशुं हरिद्राद्यलंकृते पर्यंके मात्राद्याः
सौभाग्ययुक्ताः स्त्रियो योगशायिन्नेहरिं स्मरंत्यो गीतवाद्यादिसमकालं
प्राक्शिरसं न्यसेयुः । स्वस्वाचारप्राप्तं चान्यदपि कार्यं ॥ ॥ अथ दुग्धपानं ॥ ७७

एकत्रिंशे दिने द्वितीयजन्मनक्षत्रे चान्यस्मिन्वा नप्राशनेननक्षत्रयुक्ते शुभदिने
कुलदेवतापूजांते गोक्षीरं शंखेन धात्री माता अन्या वा सुभगालंकृतं कुमारं द
क्षिणशिरसं प्राक्शिरसं वा पाययेदिति ॥ अथ कर्णवेधः ॥ जन्मदिनात्
द्वादशे षोडशे वा दिने षष्ठसप्तमाष्टमदशममासान्यतममासे अन्यदा वा
दंतजननात्पूर्वमेव ज्योतिःशास्त्रोक्तमासशुक्लपक्षतिथिवारनक्षत्रादि
शुभकाले पूर्वाह्णे मध्याह्ने वा विष्णुशिवब्रह्मचंद्रदिगीशान्नासत्यसर
स्वती कुलदेवता गोब्राह्मणान् यथाविभवं संपूज्य मातुरुत्संगस्थ

पे शुभासनस्थस्य (चा) लंकृत १

स्यालंकृतेमौकुरस्य कर्णयोर्वेधस्थलम लक्तकरसेनांकयित्वा यथाविभवं
सुवर्णरूप्यताम्रलोहसूच्या मांगलिक द्विगुणपट्टादिसूत्रोपेतया सौचि
केनान्येन वा कुशलेन सुभगस्त्रिया वा प्राङ्मुखस्योदङ्मुखस्य वा कर्णौ
वेधयेत् स्नाते सूर्यरश्मिपातस्थलेंगणादौ पित्रादिः पूर्वं दक्षिणः कुमा
७८ र्यास्तु पूर्वं वामं४। कर्णौ वेध्यः४॥ वेधनक्षत्रात्तृतीयनक्षत्रे कर्णक्षालनमु ७८
ष्णवारिणा रोहणार्थं कार्यं॥ रूढे च कर्णौ यथाभरणधारणक्षमौ तावत्व
तिवर्धनीयौ॥ पुंसः सूर्यरश्मिप्रवेशयोग्यरंध्रपर्यंतं वर्धयेल्लंबकर्णता
तु निषिद्धा॥ स्त्रीणां यथेष्टं॥ ॥अथ सूर्यावलोकनं निष्क्रमणं च॥ ॥

जननात्तृतीये मासि जन्मदिने जन्मनक्षत्रे इष्टदेवतापूजनपूर्वकं अलंकृतेन
शिशुना सोत्सवं सूर्यदर्शनं कारयित्वा चतुर्थमासे शुभकाले अग्निं चंद्रं धेनु
च दर्शयेत्॥ केचित्तु०। स्वस्तिन इत्यस्य आत्रेयो विश्वेदेवास्त्रिष्टुप्॥ शिशोरंका
रोपणे विनियोगः४॥ ॐ स्वस्ति नो मिमीतां अनेन पित्रादिः शिशुमंकमारो
प्य॥ आशुः शिशान इति त्रयोदशर्चस्याप्रतिरथस्य सूक्तस्येंद्रोप्रतिरथ इं
द्रस्त्रिष्टुप्॥ चतुर्थी बृहस्पतिदेवत्या त्रयोदश्यनुष्टुप्। शिशोरायुष्याभिवृ
द्ध्यर्थं जपे विनि०॥ ॐ आशुः शिशानः १३ असौ या सेनेति द्वे परिशिष्टऋचौ
जपेत्॥ तच्चक्षुर्वसिष्ठः सूर्यः पुरउष्णिक्॥ कुमारस्यादित्यावेक्षणे विनियो
गः४। ॐ तच्चक्षुरिति सूर्यं निरीक्षयेदिति वदंति॥ तृतीयमासे सूर्यावलो

कर्नीनकारितं चेन्निष्क्रमणेन सह कार्यं॥ ततश्चतुर्थे मासि षष्ठे वा शुक्लप
क्षे शुभतिथ्यादौ पिता सभार्यः शिशुरुपगः स्नातः मम शिशोरायुः श्रीवृ
द्धि बीजगर्भसमुद्भवैनोनिबर्हण द्वारा श्रीपरमेश्वरप्रीत्यर्थं निष्क्रमणा
६८ ख्यं कर्म करिष्ये इति संकल्प्य मतदंगतया स्वस्तिवाचनाभ्युदयिकं गृहय
ज्ञान्कृत्वा इंद्राग्नियमनिरृतिवरुणवायुकुबेरेशानानां प्राच्यादिदिशा
चं द्वार्क वासुदेवगगनानां च यथाक्रमं पूजां कृत्वा ब्राह्मणान्भोजयित्वा
तैः स्वस्त्ययनं वाचयित्वा सायंसंध्यादिकं कृत्वा शिशुं सौवर्णैः कृतिरे
र्वा भरणैर्यथाशक्त्यलं कृत्य एवं नकृतं चेद्दिहानी शिशुनाग्निचंद्र ६८

धेन्दूनां दर्शनं कारयित्वाऽश्वादिवाहनस्थं शिशुं मातुले धात्र्या वा वाहयित्वा
भार्या पुत्र विद्व्राह्मण ज्ञाति बांधवपुरं श्रीगणदर्प पूर्णकलशायुक्तं क...
गण पुष्पहरिद्राक्षतदीपमालाध्वजलाजमंगलवाद्यघोषयुक्तः कनिक्र
दज्जनुषभित्यादि ॥ शाकुनादिसुमंगल्यसूक्तं पठन्गृहाद्बहि र्गीतामंत्र
मेनमुदीरयेत् ॥ चंद्रार्कयोर्दिगीशानां दिशां च वरुणस्य च ॥ निक्षेपा
र्थमिमं दद्मि ते त्वां रक्षंतु सर्वदा ॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रौ वृथा
पि वा ॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः ॥ एवं शिशुरक्षणार्थं दे
वान्संप्रार्थ्य विष्णु शिवालययोरन्यतरद्गुरुगृहं वा गत्वा तत्र देवं स

मंगलवाद्यघोषं पुष्पोपहारादिभिः पूज्य गोमयाद्यनुलिप्तचतुरस्रदेशे
धान्यादि निधाय तत्र शिशुमासयित्वा मंत्रेण रक्षां कुर्यात्॥ मंत्रश्च॥ त्र्यंब
कमित्यस्य मैत्रावरुणिर्वसिष्ठो मृत्युंजयस्त्र्यंबको ऽनुष्टुप्॥ शिशोरक्षा
यां विनियोगः॥ ॐ ऽमुकसह त्र्यंबकं यजामहे॰॥ ॐ सहजूं ॐ इत्येवं अमृतस
ञ्जीविनीमंत्रं जपन् विभूत्या स्वतेर्वा मूर्ध्नि ललाटे च रक्षां कृत्वा ऽपूपा
दिभिः तेषां नागरोत्रामदर्प्य शिशुं भक्ष्यादिभिः संतोषयित्वा आशी
षो वाचयित्वा देवतानम प्रदक्षिणा त्रयं च शिशुना कारयित्वा मातु
लाद्यासन्नबंधुगृहं गत्वा पूर्ववन्नीत्वा तत्र दानोपहारादिभिः। शिशुं

DR. BHAU DAJI MEMORIAL

तोषयित्वा ब्राह्मणैराशिषो वाचयित्वा स्वगृहं गत्वा तेभ्यः सुवासिनीभ्यश्च यथा
शक्ति दक्षिणां दत्वा बंधुभिः सह भुंजीत॥ कुमार्या अप्येतत्समानं॥ होमोत्र कृता
कृतः। होमपक्षे शिशोरलंकरणानंतरं लौकिकाग्निं प्रतिष्ठाप्य जातकर्मवद
नादेशादेवताभ्यो हुत्वा अग्निचंद्रदर्शनादि स्वगृहमागमनांतं कृत्वा स्वि
ष्टकृदादि होमशेषं समाप्य ब्राह्मणाशीर्वादादि कारयेदिति क्रमः॥ ॥इ
ति निष्क्रमणप्रयोगः॥ ॥अथोपवेशनविधिः॥ पंचमेमासे शुक्लपक्षे
ज्योतिःशास्त्रोक्तशुभतिथ्यादौ पूर्वाह्णे स्वस्तिवाचनं कृत्वा वराहं पृथि
वीगुरुदेवद्विजान् पूजयित्वा भूभागमुपलिप्य तत्र मंडलं कृत्वा तत्र त्रां

स्वस्त्यादिमांगलिकध्वनौ क्रियमाणे शिशुमुपवेशयेत् ॥ एतैर्मंत्रैः रक्षेनं वसु
धेद्दवि सर्वदा सर्वगं शुभे ॥ आयुःप्रमाणं निखिलं निक्षिपस्व हरिप्रिये ॥
अचिरादायुषस्त्वस्य ये केचित्परिपंथिनः । जीवितारोग्यवित्तेषु निर्दहस्वाचि
 रेण तान् । धात्रिण्यशेषभूतानां मातस्त्वमधिकासि । कुमारं पाहि मा
तस्य ब्रह्मा तदनुमन्यतामिति ॥ ततो ब्राह्मणानुपूजयित्वा शिषो वा
चयित्वा नीराजनाद्युत्सवं कुर्यात् ॥ ॥ एवं कुमार्या अपि ॥ ॥ अथान्न
प्राशनप्रयोगः ॥ ॥ जन्मतः षष्ठे मासेऽष्टमे वा दंतेषु जाते [illegible]पूर्वा
ज्योतिःशास्त्रोक्तशुभतिथिनक्षत्रादिशुभकाले पूर्वाह्णे पित्रादिः शि

शोरन्नप्राशनं कुर्यात् ॥ षष्ठमासे चेत्क्रियते तदा गुरुशुक्रमौढ्यादिदोषो
धिकमासादिदोषश्च नास्ति । पित्रादिः सभार्यो शिशुं मंगलस्नानं कृत्वा देशका
लौ स्मृत्वा ममास्य शिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्चसतेजइंद्रि
यायुर्लक्षणफलसिद्धि बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्य
र्थं अन्नप्राशनाख्यं कर्म करिष्ये इति संकल्प्य तदंगस्वस्तिवाचनाभ्युदयि
कं कृत्वा शिशुमलंकृत्य जातकर्मवल्लौकिकाग्निं प्रतिष्ठाप्यानादेशाज्या
हुती हुत्वा पूजोपहारादिभिरिष्टदेवतामभ्यर्च्य तत्पुरतः स्वदक्षिणे शुभ

वस्त्रोपरिस्थमातृत्संगे प्राङ्मुखोपविष्टस्य शिशोरन्नप्राशनं कुर्यात्। दधिम
धुमिश्रमन्नं शुभे भाजने प्रक्षिप्य। अन्नपतेन्नइत्यस्य नैलकूबरोन्नप
पतिर्जगती। शिशोर्बरन्नप्राशने विनि०। ॐ अन्नपतेन्नस्य नो धेह्यन
मीवस्य शुष्मिणः। प्रप्रदातारं तारिषऊर्जं नो धेहि द्विपदे चतुष्पदे इति
मंत्रेण ससुवर्णहस्तेनान्नमादाय प्रथमकवलं प्राशयित्वा यथेष्टं भो
जयित्वा मुखं प्रक्षाल्य बालं भूमावुपवेश्य तदग्ने पुस्तकशस्त्रवस्त्रादि
दात्या निविन्यस्य जीविका परीक्षां कुर्यात्। शिशुः स्वेच्छयातत्प्रथमं स्पृश

इस्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः। प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवः॥३

ति सास्य जीविके ति गृह्यात्। ततः स्विष्टकृदादि होमशेषं समाप्य। यथाशक्ति
ब्राह्मणान्भोजयित्वा दक्षिणां दत्वा शिशोर्वाच्य पित्राद्य बुधिः सह स्वयं भुंजी
त। होमोत्रकृताकृतः। होमपक्षे पुंवे धुधुर्नीदीभ्यां। कुमार्या अप्येतद्दमं त्रकं
कार्यं किंतु समसमे मासे। इत्यन्नप्राशनं। अथ वर्धापन विधिः। आदित्यपुरा
णे। सर्वैश्च जन्मदिवसे स्नातैर्मंगलवारिभिः॥ गुरुदेवताग्नि विप्राश्च पू
जनीयाः प्रयत्नतः॥ स्वनक्षत्रं स्वनक्षत्रदेवता। स्वनक्षत्रं वित्तपश्चेति क
चित्पाठः। तदा वित्तपः कुबेरः। अत्र प्रयोगः। प्रतिवर्षं जन्मदिने सौरमा
नेन जन्मनक्षत्रे वा यजमानः प्रत्वास्त्रेष्ट्यं बर्स्नात्वा सर्वौषधी युतजल

कृतिकलशांसं कृत्य तदुदकेन स्नातः शुक्लांबरधरो यथाविभवमलंकृतो विधिवत्स्वस्त
ययनं वाचयित्वा कौतुकमाबध्य दूर्वाहोमं कुर्यात्॥ तत्रायं क्रमः। देशकालौ स्मृत्वा ममा
त्तजन्मदिवसे आयुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं दूर्वाहोमं करिष्य इति संक
ल्प्य विधिवदग्निं प्रतिष्ठाप्य पुनर्देशकालौ संकीर्त्य समिधायादापास्मिन्दूर्वाहोमे
देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहितेग्नावित्यादि चक्षुषी आज्येने
८३ त्यंतमुक्त्वा प्रधानदेवतां मृत्युंजयमष्टोत्तरशतदूर्वाद्रव्येण शेषेण स्विष्टकृतमित्यादि
सद्योयक्ष्य इत्यंतमुक्त्वा समिधावग्नावाधाय परिसमूहनाद्याज्यभागांतं कृत्वा दधि
मधुघृताक्तं केवलाज्याक्तं वा दूर्वात्रयं त्र्यंबकमित्यस्य वसिष्ठो मृत्युंजयस्त्र्यंबको
नुष्टुप्॥ दूर्वाहोमे वि०॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं। उर्वारुकमिव बंध
नान्मृत्योर्मुक्षीय मामृतात् स्वाहा ॐ इति मंत्रेणाष्टोत्तरशतं हुत्वा स्विष्टकृतादि होम
शेषं समापयेत्। ततो विधिना मृत्युंजयं कृत्वा आयुष्यचरुहोमं संकल्पपूर्वकं कुर्यात्। त ८३

त्रायं क्रमः। देशकालौ संकीर्त्यास्मिन्होमे देवतापरिग्रहार्थमन्वाधानं करिष्य इत्यादि चक्षु
षी आज्येनेत्यंतमुक्त्वा विश्वान्देवान्दशवारमग्निं षोडशवारं जातवेदोग्निमेकवारं
चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वा समिधावग्नावाधाय प
रिसमूहनाद्याज्ये दर्भाग्रद्वयप्रक्षेपांतं कृत्वा सिद्धान्नमाज्यसमीपे निधायाज्येन सह
तदन्नं त्रिः पर्यग्नि कृत्वाज्योद्वासनादि स्रुवसंमार्जनांतं कृत्वान्नं पात्रे पृथक्कृत्वाग्नाव
धिश्रित्य स्रुवेणाभिघार्योदगुद्वास्याज्याद्दक्षिणतो बर्हिष्यासाद्य पुनरभिघार
णाद्याज्यभागांतं कृत्वा॥ आ नो भद्रा इति दशर्चस्य सूक्तस्य राहूगणो गौतमो विश्वे देवा
आद्यतः पंच सप्तमी च जगत्यः षष्ठी विराट्स्थाना अष्टम्याद्यास्तिस्रस्त्रिष्टुभः। इमं
स्तोममित्यस्य षोडशर्चस्य सूक्तस्यांगिरसः कुत्सोग्निराद्यतश्चतुर्दश जगत्यः अं
त्ये द्वे त्रिष्टुभौ। सर्वा देवाभवन्नित्यादि त्रयः पादा देवदेवत्याः। तन्नो मित्रोर्धर्चो। लिंगो
क्तदेवतोग्निर्देवत्यश्च। जातवेदस इत्यस्य मारीचः कश्यपो जातवेदोग्निस्त्रिष्टुप्॥

सर्वेषां चरुहोमेषु ०। एतैः सप्तविंशतिमंत्रैरवदानधर्मेणाहुत्वा। स्विष्टकृतादिहोमशेषं स
माप्य वासुदेवं नक्षत्रदेवतां चंद्रं स्वनक्षत्रं वरुणं च षोडशोपचारैरभ्यर्च्य तत्प्रकाशमंत्रै
र्घृतेन तेभ्यो यथाशक्तिहोमं कृत्वा गृह्यप्रोक्तविधिना भिषिक्तो यथाशक्ति गोभूहिर
ण्यादि दत्वा देवगुरुब्राह्मणसुहृद्बंधुपूजां स्ववाहनायुधपीठछत्रपूजां च कृत्वा विधि
वन्नांदीश्राद्धं कृत्वा ब्राह्मणान्भोजयित्वा शुभे मुहूर्ते गंधादिभिरलंकृतः स्वग्भूषणधा
८४ रणपूर्वकं सुवर्णमयकटिसूत्रं नूतनवस्त्रं च धृत्वा पतिपुत्रवतीभिः स्त्रीभिर्नीराजि
तो ब्राह्मणाशिषो गृहीत्वा स्वयं हविष्याशी जितेंद्रियो वर्त्तेतेति। इदं सर्वं यावद्बाल्यं पित्रा
दिभिः कार्यं॥ पश्चात्तु प्रतिवर्षं स्वयमेवेति॥ इत्यब्दपूर्त्तिविधिः॥ अन्यत्र तु वर्षपर्यंतं
प्रतिमासं॥ ॥ ततः प्रतिवर्षे मांगल्यस्नानं कृत्वा कुमुदादिदेवताः संपूज्य यथाशक्ति
ब्राह्मणभोजनं दक्षिणां च दत्वा सुवासिनीभिर्नीराजितो धृतनूतनवस्त्रो ब्राह्मणी ॥८४

भ्यश्चापूपपूरिकाः साज्याः कुमुदादिप्रीतये आयुष्याभिवृद्धये च वायनानि दद्या
त्। जन्मर्क्षदेवताप्रीत्यै च दद्यात्॥ वर्षांते तु सुखदं द्वादशपंचाशपेटिकासु मोदका
दिखाद्यं निधाय नूतनवस्त्राछादिताः पेटिका जीवत्पतिपुत्राभ्यो दत्वा तदाशिषो
गृह्णीयात्॥ इदं सर्वं जीवंती माता वा पत्या मुखे कुर्यात्॥ ग्रंथांतरे तु। गणेशं ग्रहा
निष्टदेवतां मार्कंडेयं च प्रपूज्य प्रार्थयेत्। मार्कंडेय नमस्तेस्तु सप्तकल्पांतजी
वन। आयुरारोग्यसिध्यर्थं प्रसीद भगवन्मुने॥ चिरजीवी यथा त्वं तु मुनीनां
प्रवर द्विज॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं॥ ततः मार्कंडेय महाभाग
सप्तकल्पांतजीवन॥ आयुरारोग्यसिध्यर्थमस्माकं वरदो भव॥ सतिलं गुड
संमिश्रमंजल्यर्धमितं पयः॥ मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये। इति सतिलगु
डमंजल्यर्द्धमितं दुग्धं पिबेत्॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः पर

DE ... AU... MEMORIAL

शुरामश्च सप्तैते चिरजीविनः। सप्तैतान्यः स्मरेन्नित्यं मार्कंडेयमथाष्टमं॥ जीवेद्वर्षश
तं साग्रं सर्वव्याधिविवर्जितः। इतिवचनान्मार्कंडेयं तान्नरो स्मरेत्॥ इदं च वर्धापनं यदि
जन्ममासोऽसंक्रांतस्तदा शुद्धमास एव कार्यं। न त्वधिके॥ इति वर्धापनप्रयोगः॥
अथ चौलं। तत्र कालस्तावत्प्रथमे द्वितीये तृतीये पंचमे सप्तमे वर्षे गते तृतीये भागे वा
॥ गते त्रिभागे वा उपनीत्या सह वा यथाकुलाचारं चौलं कार्यं॥ तत्रापि द्वितीयादौ
८५ वर्षे जन्मतो मुख्यं गर्भतो गौणं। उदगयने शुक्लपक्षे गुरुशुक्रयोर्बाल्यवार्धक्या
स्तमयाभावे अक्षये अनधिके च मासि ज्योतिःशास्त्रोक्तप्रशस्ततिथिवारनक्ष
त्रलग्ने शुभमुहूर्ते दिन एव न तु रात्रौ कार्यं। इदं कर्म लौकिकेऽग्नौ॥ तस्य सभ्य इ
ति नाम च॥ यदि गर्भाधानादिसंस्कारलोपस्तदा प्रायश्चित्तं कृत्वा कालात्यय
निमित्तं प्रायश्चित्तहोमं कृत्वा चौलहोमः कार्यः॥ तदाह भगवान्बौ॰ आरभ्या
धानमा चौलात्कालेऽतीते तु कर्मणां। व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथा ८५

तिमंत्रावृत्त्याऽहतं शुक्लं वासः परिधाप्यान्येन काषायवस्त्रेण प्रावृणुयात्॥ ततो यज्ञोपवी
तं समंत्रं धारयित्वा तमात्माग्न्योर्मध्येन पश्चात्पात्रोत्तरभागं गमयित्वा तत्र विधिवदा
चमय्य तथैवानीयोपवेश्य बर्हिष्याज्यासादनांतं कृत्वा ब्रह्मचारिणा दक्षिणहस्तेन
पृष्टः सन्नाघारांतं कृत्वाज्यभागवर्जं ~~कुर्यात्~~॥ अग्न आयूंषीत्यादिभिश्चतस्र आ
ज्याहुतीर्जुहुयात्॥ तत आचार्य उत्तरतोऽग्नेः प्राङ्मुखो ब्रह्मचारी चाचार्याग्न्यो
र्मध्येन गत्वाचार्यस्य पुरोऽभिमुखस्तिष्ठेत्॥ तत आचार्यः संपातः स्रुच्यामासंस्तस्य
शुचित्वसिद्धये सवितृतत्प्रयेवांजलिक्षारणं कुर्यात्॥ तत्र क्रमः। जलपात्रोदकेन
शिष्यांजलिमापूर्य स्वस्यांजलिमध्येन पूरयित्वा तत्सवितुरित्यस्य स्यत्रागवाश्वः सवि
तानुष्टुप्। अंजलिक्षारणे विनि॰। ॐ तत्सवितुर्वृणीमहे॰ १ इति स्वांजलिस्थोद
कं शिष्यांजलावासिच्य तज्जलं बटोरंजलिनैव क्षारयेत्। तत आचार्यो बटो
र्हस्तं गृह्णीयात्॥ तत्र मंत्रः। देवस्य त्वा॰ भ्यां। हस्तं गृह्णाम्यमुकशर्मन्निति बटोर

PAGE(S)MISSING

NOT AVAILBLE

86 – 98

शिवादृनिकं नामशर्मा तं संबुध्य मंत्रांते निर्दिश्य दक्षिणपाणिना सांगुष्ठं बटोर्दक्षि
णपाणिं गृहीत्वा पुनरपि पूर्ववदुदकपूरणादि कृत्वा सविता ते हस्तमग्रभीदिति
मंत्रांते पूर्ववन्नामनिर्दिश्य हस्तं गृहीत्वा पुनरपि पूर्ववत्पूरयित्वाग्निराचार्यस्त
वेति मंत्रांते पूर्ववन्नामनिर्दिश्य हस्तं गृह्णीयात्। ततो बटुं संरक्षणार्थं व्रतपतये
८८ आदित्याय बटुं ददामीति मनसा स्मरन्नुद्दघात्। तत्र मंत्रः। बटुना सह निष्क्रम्य देव
सवितरेष ते ब्रह्मचारी तं गोपाय स मा मृतेत्युक्त्वा तमादित्यमीक्षयेत्। ततउभावप
रश्तरस्ताग्नेः पूर्ववदन्योन्याभिमुखौ तिष्ठेतां। अथाचार्यः कस्य ब्रह्मचार्यसीति
मंत्रं जपन् प्रजापतये रक्षणार्थं बटुं मनसा समर्प्य पूर्ववदुपविश्य येयं दुरुक्तेति मं
त्रेण मेखलामाबध्याद्यां तं इमं पित्वेति दण्डप्रदानपुराणाजिनयज्ञोपवीतादीन्ज
ले निक्षिप्य स्विष्टकृदादिहोमशेषं समापयेत्। अथ गुरूणां महानाम्नीव्रतं च
रेति ब्रह्मचारि प्रेषितश्चरिष्यामीत्युक्त्वा संवत्सरपर्यन्तं केशश्मश्रुनखलोम ८८

धारण भिक्षाचरणादिव्रतं पूर्ववच्चरेत्॥ पू० एवं वर्षे उदगयने शुक्लपक्षे बटुर्गुरो
र्महानाम्नीः श्रोष्यन् ग्रामाद्बहिर्विविक्तं शुचिदेशं देवालयादिं गच्छेत्। तत्र गुरुस्तिथ्या
दिसंकीर्त्यास्य ब्रह्मचारिणो महानाम्नीश्रवणाङ्गभूतव्रतपरिपूर्तिद्वारा श्रीपरमेश्व
रप्रीत्यर्थं तदङ्गहोमं कर्तुं उपलेपादि करिष्य इति संकल्प्य स्थण्डिलोल्लेखनादि अग्निप्र
तिष्ठापनान्तं कृत्वा पुनस्तिथ्यादि संकीर्त्यास्मिन्होमे देवतापरिग्रहार्थमन्वाधा
नं करिष्य इत्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वा। अग्निं० संसरायनी०। अग्निं। अग्निं।
अस्तृपंतीं। अनुमतिं। प्रदातारं। अग्निं। वायुं। सूर्यं। कृसरान्नद्रव्येण शेषेण स्वि
ष्टकृतमित्यादि सद्यो यक्ष्य इत्यन्वाधाय परिसमूहनादि पूर्णपात्रनिधानां
तं कुर्यात्। ततो बटुः स्थालीपाकविधानेन होमाय आत्मभोजनाय च पर्या
प्तांस्तण्डुलान् ब्रह्मणे देवताभ्यस्तूष्णीं निरूप्य तथैव प्रोक्ष्य महानाम्नीदेवता
परिग्रहार्थं तत्र तिलान्प्रक्षिप्य श्रपयित्वाचार्यः शृतः स्थालीपाक इतिभि

ज्ञापयेत्। तत आचार्यो ब्रह्मचारिणं व्रतलोपान् पृच्छाते न व्रतलोपमुक्ते तस्य गौरवलाघ
वे विचार्य गुरुश्चेद्दत्तोक्तप्रायश्चित्तं कारयित्वा पुनः संवत्सरं व्रतमादिशेत्। लघुश्चेत्प्रा
यश्चित्तमपि कारयित्वा शुद्धेन तेनान्वारब्ध आज्यसंस्काराद्याज्यभागांतं कृत्वा वदान
धर्मेणा चरुमवदायाग्नावग्निरित्यादिभिरेकश्रुत्यो क्तैः षण्मंत्रैर्व्यस्ताभिर्व्याहृति
भिश्च नवाहुतीर्जुहुयात्। ते च मंत्राः। ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो
अधिराज एषः। तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माक
१०० मोमुहद्भागधेयं स्वाहा। अग्नय इदं न मम। ॐ याति रश्मीनिपघते ह विचरणीदक्षि
तां स्तोघ तस्य धारया यजे संराधनीमहं स्वाहा संराधन्या इदं०। यस्मै त्वा काम कामाय व
यं सम्राड्यजामहे। तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा। अग्नय इदं०। अयं वो अ
ग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिंदन्। अयं शत्रूञ्जयतु जर्हृषाणो यं वाजं १००

जयतु वाजसातौ स्वाहा अग्नय इदं० न। असूयं त्यै चानुमत्यै स्वाहा असूयं त्यै अनुमत्या इ
दं०। प्रदात्रे स्वाहा प्रदात्र इदं०। भूः स्वाहा अग्नय इदं०। भुवः स्वाहा वायव इदं०। स्वः स्वाहा सूर्या
य इदं०। एवं नवाहुतीर्हुत्वा स्विष्टकृदर्थस्कचिच रुमवदाय तां बर्हिषि निधाय ब्रह्मचारिणं
शास्ति एवं स्थालीपाकं सर्वमश्नानेति॥ स चरु सर्व चरुमश्नीयात्। आचार्यो भुक्तवंतं आ
चांतं तं व्रतपतिमादित्यं व्रतपूर्तये उपतिष्ठस्वेति। ततः स हत व्रतो नो व्रतपते रसि व्रतं चरि
ष्यामि तच्छकेयं तेन राकेयं तेन राध्यासमित्यादित्यमुपतिष्ठमानो द्विः पूर्णांजलिं सिंचे
त्। तदाचार्यस्तेन मंत्रेण कृतांजलिं बटुं आदित्यमुपस्थापयेत्। तत अनालोक्या लोक
नासंभाष्य संभाषण निवृत्तमेव बटुं नाशिसमीलनं वा गमनं च कारयित्वा तत्र त्रिरा
दिवताप्रीत्यर्थं वेदत्रयमनुस्मरन्नहतेन वाससा बद्धे मुखसहितं शिरो वामकर्णप्रदे
शमारभ्य त्रिः प्रदक्षिणं वेष्टयित्वा यथा न दासो न पतति तथा बध्वा एकरात्रं त्रिरात्रं

चैवंभूतोऽस्वपन् भवेति प्रेष्य स्विष्टकृदादिहोमशेषं समापयेत् ॥ बटुस्तत्र्यहं कर्तव्य
संध्यावंदनाद्यन्यत्स्नानभोजनाद्यकुर्वाणस्तं कालं नयेत् ॥ तत एकरात्रपक्षे द्वितीय
दिने त्रिरात्रपक्षे चतुर्थदिने ग्रामाद्बहिरपराजितायां दिशि स्त्रीसंचाररहिते शुचौ
१०१ देशेऽन्यो ब्रह्मचारी अग्निं स्थंडिलादुत्तरतोसि मुदकंकमंडलुं अश्मानं च निधाय
त्प तस्मिं गुरुदग्देशे महानाम्न्यसंश्रवणस्थलेपि संगतानां योगिनामाश्रपार्थरम्यां
रक्तां द्विवर्षां वत्सतरीं तदसंभवे श्वेतां वा बभ्रां वा प्राप्य वेदयेत् ॥ तत आचार्यस्त
स्थंडिले उल्लेखनादि पर्युक्षणांतमग्निप्रतिष्ठापनांतं कृत्वा तत्पश्चात्प्रागग्रेषु तृ
णेषु एशानैस्थानद्देवान् संमानयन्निव तदभिमुखमुपविशेत् ॥ ततः शिष्यो वेष्टि
तवस्त्रं किंचिदपसार्य मुखं प्रक्षाल्य केशस्नानं कृत्वा ॥ चम्याग्निमाचार्यं च प्रदक्षि
णीकृत्य गुरुमभिवाद्य तस्येवासनदर्भमूले षेवनेऽर्कः तिस्थानद्राक्षसान् ॥ भिरीक्ष

१०१

णेनभिर्दहंस्तदभिमुखउपविश्य रक्षसामंतरागमननिर्हरणार्थं स्वपृष्ठमाचार्यपृष्ठे
न सह संधाय महानाम्नीर्भोअनुब्रूहीति मनसा गुरुं वदेत् ॥ ततो गुरुः कालप्रमाणेन
तदुक्तिं ज्ञात्वा पुनस्तद्दहरूत्पन्नव्रतलोपान् पश्चानुतापिने श्रद्दधानाय बटवे स्वपम
क्षिणी संमील्य विद्यामघवन्नित्याद्यानवर्चः ॥ एवाह्येवैवाह्यग्नाइत्यादिन वपु
षपदानि च त्रिवारं ब्रूयात् ॥ शिष्योपि त्रिवारं पठेत् ॥ ततस्तस्य शिरोवेष्टनमुन्मुच्या
दित्यमीक्षस्वेति वदेत् ॥ ततो बटुर्मित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा समी
क्षइति मंत्रद्वयेनादित्यमवेक्षेत ॥ ततोस्यादिसंभारयुतादिशो मित्रस्य त्वा चक्षुषानु
वीक्षइत्तीक्षेत ॥ पुनरादित्यमीक्षस्वेत्युक्ते मित्रस्य त्वा चक्षुषा प्रतिपश्यामि येत्समान्द्वे
ष्यं च वयं द्विष्मस्तं चक्षुषो हेतिर्ऋच्छत्वित्यादित्यमीक्षेत ॥ ततोऽग्न इलेत्याद्यष्ट
मंत्रैर्भुवमुपस्थापयेत् ॥ ते च ॥ ॐ अग्न इलानम इलानम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रप

गा० तिभ्यो नमो वो अस्तु देवेभ्यः शिवा नः शंतमा भव सुमृळीका सरस्वति मा ते व्योम संदृ प्रयो०
शि ॥ १ ॥ भद्रं कर्णेभिरित्यस्य राहूगणो गोतमो विश्वे देवास्त्रिष्टुप् ॥ २ ॥ रूम्कपस्पत्री
नेविनि० शन्न इंद्राग्नी इत्यस्य वसिष्ठो विश्वे देवास्त्रिष्टुप् ॥ स्कभेजनं सुव्रतमि
ति ऋजिश्वो विश्वे देवास्त्रिष्टुप् ॥ कया नश्चित्र इति तृचस्य वामदेव इंद्रो गायत्री ॥ अ
१०२ भीषुण इति निचृत् । स्योना नो काण्वो मेधातिथिर्भूमिर्गायत्री ॥ एतैर्मंत्रैर्भूमिं स्पृ
ष्ट्वा वत्सतरीं गुरवे दत्त्वानुप्रवचनीयार्थमुपनयनवत्तंडुलान्निक्षिप्य गुरवे नि
वेद्य दिने वब्रुमोदनं कुर्यात् ॥ तत्र क्रमः ॥ देशकालौ निर्दिश्य मम महानाम्न्य
ध्ययनांगभूतमनुप्रवचनीयहोमं करिष्य इति संकल्प्योल्लेखनाद्यग्निप्र
तिष्ठापनांतं कृत्वा पुनर्देशकालौ निर्दिश्यात्रानुप्रवचनीयहोमे देवतापरि
ग्रहार्थमन्वाधानं करिष्य इत्याधाघारांतं ज्येनेत्यंतमुक्त्वा सदसस्पतिं महानाम्नीः
१०२

ऋषींश्चैताः प्रधानदेवताः चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वा
समिधमग्नावाधाय परिसमूहनादि पूर्णपात्रनिधानांतं कृत्वा नेक्ष्यतंडुला
श्चतुरश्चतुरो मुष्टीन् देवतात्रयस्य विप्रहूय भोजनाय च । निरूप्य तथैव प्रोक्ष्य श्र
पयित्वाग्न्यंतोऽनुप्रवचनीयमिति गुरवे निवेदयेत् ॥ ततः सन्निविष्टेनान्वारब्ध आ
धारां ज्यसंस्थस्कारा धाराँ ~~[illegible]~~ तं कृत्वाज्यभागांते ऽभवदानधर्मेण चरुमवदाय
सदसस्पतिं काण्वो मेधातिथिः सदसस्पतिर्गायत्री अनुप्रवचनीयप्रधानचरु
होमे वि० ॐ सदसस्पतिं० स्वाहा सदसस्पतय इदं । महानाम्नीभ्यः स्वाहेति
द्वितीयं० । ऋषिभ्यः स्वाहेति तृतीयाहुतिं हुत्वा स्विष्टकृदादि होमशेषं समाप्य
कर्मांतकर्तव्यस्वस्तिवाचनं कृत्वा ब्राह्मणान् भोजयित्वा वेदसमाप्तिरस्त्विति भवं
तो ब्रुवं त्विति तान्वदेत् ॥ ते पि वेदसमाप्तिरस्त्विति वदेयुरिति ॥ ७ ॥ ७ ॥ इति

महानाम्नीव्रतप्रयोगः। अथमहाव्रतप्रयोगः। आचार्यः पूर्ववदुद्गापनादोस्वस्तिवाच
नहोमशेषसमाप्तंत महानाम्नीव्रतवत्कृत्वा संवत्सरंमहाव्रतमाचरेतिबटुं प्रेष्यतेन
संवत्सरव्रतआचरिते ग्रामाद्बहिः शुद्धदेशे प्रागग्रेषुदर्भेषु प्राङ्मुखउपविश्यशि
ष्येण विधिवदभिवादनपूर्वकंमहाव्रतंभो अनुब्रूहीतिवचनेनैवोक्तस्तं प्राङ्मुख
मुपवेश्याथ महाव्रतमित्याद्यारण्यकं त्रिर्ब्रूयात्॥ ततः शिष्यस्तथैव त्रिवारमुक्त्वा
१०२ पूर्ववन्मंत्रद्वयेनादित्यमवेक्षेत॥ ततो गुरुः शिष्यार्थं वानइत्यादिभिर्मंत्रैर्स्पृ भिंस्प १०२
ष्टो तो॥ ततः शिष्योदिवाब्रह्मौदनंभ्रपयित्वाचार्यायवेदयेत्॥ तत आचार्यो मह
नाम्नीभ्यः स्वाहेतिस्थापने महाव्रताय स्वाहेति द्वितीयाहुतिंहुत्वा सर्वमनु म
प्रवचनीयंकुर्यात्॥ इति महाव्रतप्रयोगः॥ अथोपनिषत्प्रयोगः॥ आचार्यः
पूर्ववद्धोमसमाप्यंतं महानाम्नीवत् कृत्वा संवत्सरमुपनिषद्व्रतमाचरेतिब
टुंप्रेष्यतेनतथाव्रते प्रागवदुपनिषदं भो अनुब्रूहीत्युक्तस्तं प्राङ्मुखमथातः

संहितायाउपनिषदित्यारण्यकं त्रिर्ब्रूयात् शिष्यस्तथैव त्रिरुक्त्वा पूर्ववदादित्यावेक्ष
णाभिस्पर्शब्रह्मौदनश्रपणनिवेदनादिकुर्यात्॥ ततः आचार्यो महाव्रतस्थानेउ
पनिषदे स्वाहेति हुत्वा सर्वमनुप्रवचनीयंकुर्यात्। तत आचार्याभावे शिष्यः स्वयमे
व महाव्रताध्ययनादिकंकुर्यात्॥ इत्युपनिषद्व्रतं॥ इति महानाम्न्यादिव्रतत्रयं॥
अथ गोदानव्रतप्रयोगः। जन्मतः षोडशेवर्षे उदगयने शुक्लपक्षे चोलोक्ततिथ्या
दौ गोदानंकुर्यात्॥ तत्र पूर्वेद्युराचार्यः कृतनित्यक्रियः कृतस्नानो ब्रह्मचारिणं
स्वदक्षिणत उपवेश्य प्राणानायम्य तिथ्यादिसंकीर्त्यास्य ब्रह्मचारिणो गोदा
नं कर्तुं तदंगस्वस्तिवाचनांकुरार्पणग्रहयज्ञाग्निप्रतिष्ठापनादि करिष्य इति प्रत्येकं
संकल्प्य तानि क्रमेण कृत्वा परेद्युः कृतनित्यक्रियः कृतनित्यक्रियं बटुं दक्षि
णतउपवेश्य कौतुकमावध्य सुमुहूर्ते उपलेपाद्यग्निस्थापनांतं कृत्वा पुनर्दे
शकालौ स्मृत्वामयाक्रियमाणगोदानहोमेदेवतापरिग्रहार्थमन्वाधानं क

१०४ रिष्ये अस्मिन्न्न्वाहिते ग्नावित्याद्याघारावाज्येनेत्यं तमुक्त्वा त्रिरग्निं पवमानं प्रजा
पतिं चैताः प्रधानदेवता आज्येन शेषेण स्विष्टकृतमित्याद्युक्त्वा समिद्धमग्ना वाधा
य पूर्णपात्रनिधानांतं कृत्वोदगग्रैरास्तीर्णदर्भैः पूर्वाहि यवमाषतिलैः पृथक्पू
र्णतानि नवशरावचतुष्टयं क्रमेणैकैकशः प्राक्संस्थमासाद्य प्रत्यगग्नेरासीन
स्य कर्तुर्दक्षिणे बटोर्माता प्राङ्मुख्या आसीत ॥ मातुः पुरस्तादग्नेः पश्चादानडु
हरामनकृ[illegible]घ शरावे शमीपर्णशरावं च स्थापयेत् । ततो ब्रह्मैकविंशतिकुशांकु
रान्दधानो मातुर्दक्षिणे तिष्ठे तिष्ठेत् ॥ ततो बटुनान्वारब्धः कर्त्ता पूर्वे तंत्रमा १०
घारांतं कृत्वा अग्न आयूंषीत्यादिभिश्चतुर्भिर्मंत्रैः पूर्ववदाज्याहुतीर्हुत्वो दे
शीत्यागंस्त्वा शीतोष्णजले पात्राभ्यां पृथगानीय बटोः पश्चिमतः स्थित्वा तदु
दकद्वयमन्यस्मिन्पात्रे पाणिभ्यां ॐ उष्णेन वायउदकेनेहीति युगपन्नीय

MEMORIAL

तदेकदेशेन नवनीतेन दध्नावामेलयित्वा बटोर्वामतः श्मश्रूनारभ्य प्रदक्षिणं ॥ ॐ अदितिः
श्मश्रूणि वपत्वाप उंदंतु वर्चस इति मंत्रावृत्त्या त्रिः श्मश्रूण्येवक्लेदयित्वा ब्रह्महस्तस्थे
कविंशतिकुशांकुरेषु त्रीनंकुरानादाय बटोरभिमुखं पश्चिमाग्रान्कृत्वा ॥ ॐ ओ
षधे त्रायस्वमामिति दक्षिणश्मश्रुस्थाने निधाय तेष्वंकुरेषु ताम्रमयं क्षुरं ॐ स्वधि
ते मामा हिंसीरिति निधाय । ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य
विद्वान् ॥ तेन ब्रह्माणो वपतेदमस्यायुष्मान्जरदष्टिर्यथासदिति सश्मश्रुकान्कु
शांकुरान्छित्वा प्रागग्रान् शरावस्थशमीपर्णैरेकीकृत्य मातुः करे दद्यात् ॥ सा च
तानानडुहे गोमये प्रागग्रान्निदध्यात् ॥ एवं द्वितीयादिषु छेदनेषु कुशांकुरत्रयनिधा
नादिसमंत्रकं कार्यं । विशेषस्तु । ॐ येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषेवपन् । तेन त
आयुषे वपामि सुश्लोक्याय स्वस्तय इति मंत्रो द्वितीयछेदने । ॐ येन भूयश्च रात्र्यां

ज्योक्क पश्याति सूर्यं । तेनत आयुषे वपामि सुश्लोक्याय स्वस्तय इति तृतीये ।। चतुर्थे
त्वेते त्रयोपि ।। एवं दक्षिणश्मश्रुभागे चत्वारि छेदनानि कृत्वा उत्तरभागे प्येवं त्रीणि छे
दनानि आदितो मंत्रत्रयेण कुर्यात् न चतुर्थं । ततः क्षुरधारां ॐ यत्क्षुरेण मर्चयता
सुपेशसा वप्ता वपसि केशश्मश्रूणि । शुंधि शिरो मुखं मास्यायुः प्रमोषीरित्यनेन आ
१०५ रभ्या मूलमवमृज्य नापितमाहूय शीतोष्णाभिरद्भिः रवर्थं कुर्वाणेग धिणवन्कु
त्राली कुन्त्रा श्मश्रुलोमनखान्युदकसंस्थानि कुर्विति प्रेष्य प्रैषार्थं चावबोध्य
तेन पूर्वसेकावशिष्टैः शीतोष्णोदकैः शिरः स्वपाणिना ह्रीकृत्य केशश्मश्रुलो १०५
मनखान्युदकसंस्थानि वापयित्वा तं बटुं पूर्ववदुपवेश्य । स्विष्टकृदादि होमशे
षं समाप्य तद्ब्राह्मणादि पात्रचतुष्टयं नापिताय दद्यात् । ततो बटुरहः शेषं मौ
नेन नीत्वा वंदित सायंसंध्यो गुरोरंतिकं गत्वा वरं ददामीति वाचं विसृज्य त
स्य अनड्वाहं गां च दक्षिणां तेन याचित्वा वा दद्यात् । ततः परेद्युः संवत्सरं गो

अग्निं वायुं सूर्यं प्रजापतिं ४ अग्निं पृथ्वीं महांतं ५ वायुं अंतरिक्षं महांतं ६ आदित्यं दिवं महांतं ७ चंद्रमसं नक्षत्राणि दिशो महांतं ८ अग्निं ९ अग्निं १०
विभावसुं ११ शतक्रतुं १२ अग्निं १३ अग्निं १४ अग्निं १५ वायुं १६ सूर्यं १७ प्रजापतिं १८ यथामंत्रेण त्यागः ।।

दानव्रतमाचरेत् आचार्येणोक्तो ब्रह्मचारी संवत्सरं केशश्मश्रूणि धृत्वा पूर्वोक्त
ब्रह्मचारि नियमेन गुरुसमीपे व्रतं चरेत् ।। ।।इति प्रयोगरत्ने गोदान व्रत प्रयो
गः ।। अथ ब्रह्मचारी व्रतलोप प्रायश्चित्तं ।। तत्र बौधायनः ।। अत्र शौचाचमन
संध्यावंदन दर्भभिक्षा । अग्निकार्यशाटित्वग्भूद्रादिस्पर्शन कौपीन कटिसूत्र
यज्ञोपवीत मेखलाजिन दंड त्यागदिवास्वाप छत्रधारण पादुकाद्यारोह
ण मालाधारणोद्वर्तनानुलेपनांजन जलक्रीडा द्यूत नृत्य गीत वाद्याद्यभिरति
पारुष्यादिसंभाषण पर्युषितभोजनादि ब्रह्मचारिव्रतलोपसकलदोषपरिहारा
र्थं ब्रह्मचारी कृच्छ्रत्रयं चरेत् । महाव्याहृतिहोमं च कुर्यात् ।। तद्यथा ।। लौकिकाग्निं
प्रतिष्ठाप्यान्वाधानादि आज्यभागांतं कृत्वा प्रथमं व्यस्तसमस्ताभिर्व्याहृतिभिश्च
तस्र आज्याहुतीर्हुत्वा ।। ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा । ॐ भुवो वायवे

वांतरिक्षाय च महते च स्वाहा ॥ ॐ सुवरादित्याय च दिवे च महते च स्वाहा ॥ ॐ भूर्भु
वस्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॥ ॐ पाहि नो अग्न एनसे स्वाहा ॥
ॐ पाहि नो विश्ववेदसे स्वाहा । ॐ यज्ञं पाहि विभावसो स्वाहा ॥ ॐ सर्वं पाहि शतक्रतो
स्वाहा । ॐ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः स्वाहा ॥ ॐ सह
रय्या निवर्तस्वाग्ने पिन्वस्व धारया ॥ विश्वप्स्न्या विश्वतस्परि स्वाहा ॥ १४ ॥ पु
१०६ नर्व्याहृतीभिर्हुत्वा स्विष्टकृदादि होमशेषं समापयेदिति । एतदल्पधर्मलोपे प्राय
श्चित्तं ॥ बहुधर्मलोपे तु प्रायश्चित्ते विशेषः स्मृतिचान्द्रे शौनकेनोक्तः ॥ तं वो धिया १०६
जपेन्मंत्रं लक्षं चैवं विशालये ॥ ब्रह्मचारी स्वधर्मे च न्यूनं चेत्पूर्णमेव तदिति ॥ महाना
म्न्यादिव्रतेषु लुप्तेषु तारतम्येन षड्द्वादश वा कृच्छ्रान् दत्वा पुनर्व्रतं प्रारभेत ॥ तिस्मृ
त्यर्थसारे ॥ ॥ इति प्रयोगरत्ने ब्रह्मचारीव्रतलोप प्रायश्चित्तं ॥ अथ समावर्त्त
नप्रयोगः ॥ आचरितब्रह्मचारिनियम महानाम्न्यादिव्रत चतुष्टये ब्रह्मचारी वि

द्यांते गुरुमर्थदानेन संपूज्य तेनानुज्ञातो ज्योतिर्विदुक्ते शुभकाले आचार्यगृहे समावर्त्तनं
नाम कर्म कुर्यात् ॥ ब्रह्मचारिनियमव्रतचतुष्टयलोपपक्षे प्रायश्चित्तं कृत्वाभ्युदः सन्नि
दं कुर्यात् ॥ तत्रायं क्रमः ॥ पूर्वं घटित्यादि संकीर्त्य मम शौचाचमनादि सर्वब्रह्मचर्य
नियमव्रतलोप प्रायश्चित्तद्वारा श्रीपरमेश्वरप्रीत्यर्थं होमपूर्वकं कृच्छ्रत्रयमाचरि
ष्य इति संकल्प्य लौकिकाग्निं प्रतिष्ठाप्याज्यहोमधर्मेणान्वाधानं पूर्वोक्ताष्टादशा
ज्याहुतीर्हुत्वा कृच्छ्रत्रयप्रत्याम्नायत्वेन कल्पितगोदान सहस्रतिलहोम दशसहस्र
गायत्रीजपादि अन्यतमं चरित्वा होमशेषं समापयेत् ॥ महानाम्न्यादिव्रतलोपपक्षे
प्रत्येकं गायत्र्या शतसंख्यया विंशतिअष्टौ वाज्याहुतीर्हुत्वा एकैकं कृच्छ्रं चरित्वा
शुभदिने महानाम्नीव्रतं कृत्वा तथैव महाव्रतादिव्रतत्रयं कृत्वा गुरवे दक्षिणां दत्वा
तेनानुज्ञातो मण्यादीन्येकादशोपकल्पयेत् । तानि च । मणिं कुंडले । वस्त्रयुगं ।

छत्रं। उपानद्युगं। दंडं। स्रजं। एकबीजकरंजफलपिष्टं। श्रीखंडाद्यनुलेपनं। अंजनं। उष्णी
षमिति। एतान्यात्मने चाचार्याय च मधुपर्कसमयोर्निवेदितं देताचार्यायैव संपादयानि॥ पश्चिम
ल्लशालिनि समावर्तनं तस्मिन्प्रातरपराजितां दिशं गत्वा पश्चिमवृक्षस्यैशान्यां शा
खां छित्वात्मप्रदेशसंमितां समिधमाहृत्य वृक्षमेरन्यत्रोपनिदध्यात्॥ अथ क्रमः॥
१०८ ब्रह्मचारी कृतनित्यक्रियः कृतप्रातरग्निकार्यश्च प्राणानायम्य तिथ्यादिसंकीर्त्य
मम गृहस्थाद्याश्रमांतरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनं करिष्ये इति स १०८
ति संकल्प्य तदंगभूतस्वस्तिवाचनांकुरार्पणाग्रहयज्ञाभ्युदयिकानि संकल्प्य
पूर्वकं कृत्वा प्रागुक्तलक्षणां समिधमाहृत्योपनिदध्यात् ब्रह्मचर्यसंपूर्तये ब्रा
ह्मणाय गां दत्वा द्विजान् भोजयित्वा विधिवत् कौतुकमाबध्य शुभकाले स्थंडिलो
ल्लेपाद्यग्निप्रतिष्ठापनांतं कृत्वा एनर्द्देशकालौ निर्दिश्य मम प्राक्रियमाणे समा

वर्तनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहितेग्नाविध्माधाघा
राबाज्येनेत्यंतमुक्त्वा त्रिरग्निं पवमानं प्रजापतिं चेताः प्रधानदेवता आज्येन अ
ग्निमूर्ध्वसमिधा विश्वान्देवान् द्वादशसमिद्भिः शेषेण स्विष्टकृतमित्यादि सद्यो
यक्ष्य इत्यंतमुक्त्वा समिद्द्वयमग्नावाधाय पूर्णपात्रनिधानांतं पुरस्तन्तं तंत्र
मनुष्ठायोदगग्नेरास्तीर्णेषु दर्भेषु व्रीहियवमाषाक्षतिलैः पृथक्पृथक् पूरिताश्चि
चत्वारि शरावाणि क्रमेणैकैकशः प्राक्संस्थमासादयेत्॥ ताम्रमयं लोहं वा क्षुरं
शीतमुष्णं चोदकं नवनीतं दधि द्रप्साश्चामण्पाद्येकादशपात्राणि चाग्नेरुत्तर
त आसादयेत्॥ ततः प्रत्यगग्नेरासीनस्य कर्तुर्दक्षिणतो माता प्राङ्मुखासीत॥
तस्याः पुरोग्नेः पश्चादेकस्मिन्छरावे शमीपर्णानि अपरस्मिन्नानडुहं गोम
यमासादयेत्॥ ततो ब्रह्मैकविंशतिकुशांकुरान्दधानो मातुर्दक्षिण

तस्तिष्ठेत्॥ततोब्रह्मचारीपुरस्तनंतंत्रमाघारांतंकृत्वा॥अग्नआयूंषीतिति
सृणांशतंवैखानसाऋषयः॥अग्निःपवमानोदेवतागायत्रीछंदः॥तृतीया
पादनिवृत्।प्रधानाज्यहोमेवि०ॐअग्नआयूंषि०स्वाहा।अग्नयेपवमाना
येदंनमम।एवमग्नेपि॥अग्निऋषिः॥ॐअग्नेपवस्वस्वपा०।स्वाहाप्र
१०८ जापतेहिरण्यःप्रजापतिस्त्रिष्टुप्।प्रधानाज्यहोमेवि०ॐप्रजापतेनत्वत्०पात्राभ्यांपृथगानी १०८
स्वाहाप्रजापतयइदं०।४।ततोब्रह्माशीतोष्णेवारिणी
यबटोःपश्चिमदेशेस्थित्वातदुदकद्वयमन्यस्मिन्पात्रेपातिप्यांॐउष्णेन
वायउदकेनेहीतिमंत्रेणयुगपत्त्रेनीयतदेकदेशंगृहीत्वानवनीतेनदध्नावा
भिःप्रपिलाबटोर्वामश्मश्रुप्रदेशमारभ्यप्रदक्षिणं।ॐअदितिःश्मश्रूणि
वपत्वापउंदंतुवर्चसेइतिमंत्रेणप्रतिक्लेदनमावर्तयेत्।त्रिवारंश्मश्रूण्येव

वक्ष्यदीपितास्वहस्तस्थितेष्वेकविंशतिकुशांकुरेषुत्रीनंकुरानादायदक्षिणश्मश्रुभा
गेब्रह्मचार्यभिमुखंपश्चिमाग्रंनिदध्यात्॥तदाब्रह्मचारीॐओषधेत्रायस्व
मामितिजपेत्।ततोब्रह्मातेषुकुशांकुरेषुताम्रमयंक्षुरं।निदध्यात्।तदाब्रह्म
चारीॐस्वधितेमामाहिंसीः।ॐयेनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुण
स्यविद्वान्॥तेनब्रह्माणोवपतेदमस्यायुष्मान्जरदष्टिर्यथासमितिजपेत्॥
ततोब्रह्मचारिणायेनावपदितिमंत्रेउच्चारितेब्रह्मा।सश्मश्रूकान्कुशांकु
रान्छित्वातानंकुरान्प्रागग्रान्शरावस्थशमीपर्णैःसहैकीकृत्यमातुः
करेदद्यात्॥साचतान्सश्मश्रूकान्शमीपर्णकुशांकुरान्आनडुहेगोम
येनिदध्यात्॥एवंद्वितीयादिछेदनेकुशांकुरत्रयनिधानादिसमंत्रकंका
र्यं।छेदनमंत्रेतुविशेषः।ॐयेनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥
तेनतआयुषेवपामिसुश्लोक्यायस्वस्तयइतिद्वितीयछेदने[illegible]मंत्रः॥ॐ

येन भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यं। तेन ते आयुषे वपामि सुश्लोक्याय स्वस्तये॥
चतुर्थं तु येनावपत्॥ येन धाता। येन भूयश्चेति त्रयोऽपि मन्त्राः॥ एवं दक्षिणे श्मश्रु
भागे चत्वारि छेदनानि कृत्वोत्तरश्मश्रुभागे वपनमारीत्या घोनि त्रीणि छेदना
नि प्रत्येकं मन्त्रैः कुर्यात्॥ न तु सर्वैर्मन्त्रैश्चतुर्थं। ततः क्षुरधारां। ॐ यत्क्षुरेण मर्च
१०८ यता सुपेशसा वप्ता वपसि श्मश्रूणि॥ शुन्धि शिरो मुखं मा न आयुः प्रमोषीरित्य
नेनाग्रत आरभ्य मूलमवमृज्य नापितमाहूय ॐ शीतोष्णाभिरद्भिरवर्थं १०८
कुर्वाणोऽक्षिण्वन् कुशली कुर्विति प्रैषेणानुशास्य प्रैषार्थं चावबोध्य नापितेन
पूर्वावशेषितशीतोष्णाद्भिरार्द्रीकृत्य केशश्मश्रुलोमनखान्युदक्संस्था
नि वापयित्वा तद्धीघादि शिरावचतुष्टयं नापिताय दद्यात्। ततः करंजबीज
पिष्टेन स्वशरीरमुद्वर्त्य तान् शीतोष्णोदकैः स्नात्वा द्विराचम्य पुनर्वह्नेरन्ति
कं गत्वा एकं वस्त्रं समन्त्रं परिधायान्यदुत्तरीयं प्रावृणुयात्॥ तत्र मन्त्रः। युवं व

स्त्राणीत्यस्य औचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप्। ॐ युवं वस्त्राणि०॥ ततो
द्विराचम्य पाणिनांजनमादाय ॐ अश्मन्नस्ते जोऽसि चक्षुर्मे पाहि इति मन्त्रा
वृत्त्या सव्यदक्षिणे चक्षुषी क्रमेणाक्त्वा तथैव ॐ अश्मन्नस्ते जोऽसि श्रोत्रं मे पाहि
इत्यनेन कुंडलाभ्यां सव्यदक्षिणश्रोत्रे अलंकृत्य कुंकुमाद्यनुलिप्ताभ्यां पाणि
भ्यां पूर्वं मुखमनुलिप्य पश्चादितराङ्गान्यनुलिप्य करौ प्रक्षाल्य ॐ अनार्त्ती
स्यनार्त्तोऽहं भूयासमित्यनेन शिरसि स्रजं बध्वा। ॐ देवानां प्रतिष्ठिस्थः स
र्वतो मा पातं इत्यनेन चर्ममय्यावुपानहौ दक्षिणसव्याभ्यां पादाभ्यामारु
ह्य। ॐ दिवश्छद्मासीति मन्त्रेण छत्रं धृत्वा ॐ वेणुरसि वानस्पत्योऽसि सर्व
तो मा पाहीति वेणवं दंडं गृहीत्वा आयुष्यमिति सूक्तेन सुवर्णमणिं कंठे ब
ध्नीयात्॥ आयुष्यमित्यस्य सूक्तस्य सनकसनंदनसनातनादय ऋषयः॥

हिरण्यदेवता आद्याश्चतस्रोनुष्टुभः ॥ पंचमी त्रिष्टुप् ५ षष्ठ्यानुष्टुप् ॥ सप्तमी शा
क्वरी अष्टमीनवम्यौ त्रिष्टुभौ दशम्यनुष्टुप् । एकादशी त्रिष्टुप् । कंठेमणिध्यार
णे वि० ॥ ॐ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं ॥ इदं हिरण्यं वर्चस्वज्जैत्रायाविश
तादिमां ॥ उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयं ॥ सर्वाः समग्रा ऋद्धयो हिर
१०१० ण्येस्मिन्समाहिताः ॥ शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ ॥ तेन मां सू
र्यत्वचमकरं पूरुषु प्रियं ॥ सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा । लक्ष्मीरा
ष्ट्रस्य या मुखे तया मामिंद्र संसृज ॥ अग्नेः प्रजातं परि यद्धिरण्यममृतं जज्ञे
अधिमर्त्येषु ॥ य एनद्वेद स इद्वेदमर्हति जरामृत्युर्भवति यो बिभर्त्ति ॥ यद्वे
द राजा वरुणो यद्वु देवी सरस्वती ॥ इंद्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे ॥
न तद्रक्षांसि न पिशाचास्तरंति देवानामोजः प्रथमजं ह्येतत् ॥ यो बिभर्ति
दाक्षायणा हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

DR. BHAU DAJI MEMORIAL

अग्निर्येन विराजति सूर्यो येन विराजति । विराज्येन विराजति तेनास्मान्ब्रह्मणस्पते विराजं समिधं कुरु ॥
परिबधं दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ॥ तन्म आबध्नामि शतशा
रदायायुष्मांज्जरदष्टिर्यथासत् ॥ घृतादुल्लुप्तं मधुमत्सुवर्णं धनंजयं धरुणं धारयि
ष्णु ॥ ऋणक्सपत्नाद्धरांश्च कृण्वदारोह मां महते सौभगाय ॥ प्रियं मा कुरु देवे
षु प्रियं राजसु मा कुरु ॥ प्रियं विश्वेषु गोप्त्रेषु मयि धेहि रुचा रुचं ॥ ~~अर्वाचमिंद्रममु~~
~~तो हवामहे यो गोजिद्धनजिदश्वजिद्यः ॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरि~~
~~वो मेदिनं त्वेति~~ ॥ अनंतरमुष्णीषेण प्रादक्षिण्येन शिरः संवेष्ट्य उपानहौ संत्यज्य
उपरि निहितां प्रागुक्तां समिधं गृहीत्वा तिष्ठन्नेव स्मृतं च म इत्यादीन् स्वाहांतमं
त्रानुक्तान् गत्वा वा दध्यात् ॥ एषां मंत्राणां प्रजापतिरग्निरृषिः ॥ समिदाधाने विनि०
ॐ स्मृतं च मे अस्मृतं च मे तन्म उभयं व्रतं । निंदा च मे अनिंदा च मे तन्म उभयं व्रतं ॥
विद्या च मे अविद्या च मे तन्म० श्रद्धा च मे अश्रद्धा च मे तन्म० प्रज्ञा च मे अप्रज्ञा च मे तन्म०

इष्टंचमेअनिष्टंचमेतन्म०दत्तंचमेअदत्तंचमेतन्म०अधीतंचमेअनधीतंचमेतन्म०कृ
तंचमेअकृतंचमेतन्म०सत्यंचमेअसत्यंचमेतन्म०श्रुतंचमेअश्रुतंचमेतन्म०
व्रतंचमेअव्रतंचमेतन्म०यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिरा
जन्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाका
११९ शस्यसातीकाशस्यसानूकाशस्यसप्रतीकाशस्यसदेवमनुष्यस्यसगंधर्वा
प्सरस्कस्यसहारण्यैश्चपशुभिर्ग्राम्यैश्चयन्मआत्मनआत्मनिव्रतंतन्मेस
र्वव्रतमिदंहमग्नेवर्चोभवामिस्वाहेतिअग्नयेइदंनमम।अथोपविश्यान्याः
प्रादेशासंमितादशसमिधोममाग्नेवर्चोविहवेष्वित्यनेनसूक्तेनप्रत्यृचंअग्नौ ११९
तेगनावादध्यात्॥पश्चात्स्वाहाकारमुच्चारयेत्॥अस्यसूक्तस्यविहव्यऋषिः॥
विश्वेदेवादेवतानवमीजगतीअन्यास्त्रिष्टुभः॥समिदाधानेवि०॥ॐममा

ग्नेवर्चोविहवेष्वस्तु०।स्वाहाविश्वेभ्योदेवेभ्यइदंनमम॥एवमग्रेपित्यागः॥ॐमम
देवाविहवे०ॐमयिदेवा०ॐमह्यंयजंतु०ॐदेवीषळुर्वीः०ॐअग्नेमन्युं०ॐधाताधा
तृणां०ॐउरुव्यचानो०ॐयेनःसपत्ना०।ॐअर्वांचमिंद्र०मेदिनंत्वास्वाहाइतिद
शमंत्राः।ततःस्विष्टकृदादिहोमशेषंसमापयेत्॥ततःस्नातकोनैमित्तिकंविनान
अन्यत्रमै कृनग्नश्चनस्नामि॥नग्नांस्त्रियंमैक्षेतवर्षतिनधावामि॥वृक्षंनारोहामि॥कूपं
पुनात। नावरोहामि॥प्राणसंशयंनाश्यापघेइन्येवंसंकल्पयेत्॥ततःकौपीनंमेखलांचवि
सृजेत्॥केशश्मश्रुलोमनखान्यपराजितायांदिशिनिखनति॥ततोयत्रमधुप
र्कादिपूजास्यसंभवतितत्रैतांत्ररात्रिंवसे०त्॥समावर्तनानंतरंत्रिरात्रमाशौचंकु
र्यात्॥इतिश्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरसूरिसूनुनाराय
णभट्टविरचितेप्रयोगरत्नेसमावर्तनप्रयोगःसमाप्तः॥छ॥छ॥छछ॥
॥नबाहुभ्यांनदीतरेत्

अथक्रमप्राप्तो विवाहः॥ तत्र तावत्तदुपयोगितया किंचित्संक्षेपेणोच्यते॥ ॥अना
श्रमी न तिष्ठेत दिनमेकमपि द्विजः॥ आश्रमेण विना तिष्ठन्प्रायश्चित्ती यते हि सः इति
दक्षस्मृतेः॥ गुरवे तु वरं दत्वा स्नायीत तदनंतरं। वेदव्रतानि वा पारं नीत्वा ह्युभयमेव
११२ वा॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां य
वीयसीं॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां इति याज्ञवल्क्योक्तेः स्त्री ११२
विचोपि वेदव्रतोभयस्नातकोऽविलंबेन लक्षणादिविशिष्टां स्त्रियं नपुंसकत्वा
द्यतयस्त्रीत्वेन परीक्षितामुद्वहेत्॥ तत्रापि कुलमग्रे परीक्षेतेति गर्गवचनाद्दा
रोसदाचारादिगुणवृत्तया हीनक्रियत्वादिदोषहीनतया परीक्ष्य कुलं तज्जोद्वा
ह्यातदनु लक्षणाद्यपि परीक्ष्य लक्षणानि च शुभाशुभसूचकानि तनुलोमके

शाद्दशाद्दशनत्वादीनि प्रत्यक्षगम्यानि बाह्यान्यांतराणि चाष्टौ पिंडान्कृत्वेत्यादिना
गर्गोक्तानि द्विविधान्यपि महाग्रंथेभ्यो ज्ञेयानि विस्तरभयादिह नोच्यंते॥ यादा
न नेनोपभोगेन वा पुरुषांतरपूर्विकां न भवति साऽनन्यपूर्विका तां॥ अनेन वाग्द
त्तामनोदत्ता दिंनि परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्त
पुनर्भुवो व्यावर्त्यंते॥ कांतां वोढुर्मनोनयनयोराह्लादकरीं समान एकः पिंडः पि
उदानक्रियामूलपुरुषशरीरं वा यस्याः न विद्यते सा असपिंडा तां कथंचिदे
कपिंडक्रियानुप्रवेशेन निर्वाप्य सापिंड्यं। केचिदाहुः॥ एकशरीरावयवान्व
येनावयवसापिंड्यं पित्रादिभिराद्ययोर्निर्दोषमेवेति॥ अत्र बहुतरं वक्तव्यं वि
चारस्तु तापत्यप्रयोगतां भंगभीत्या नोच्यते॥ नन्वेवं पितृव्यादेश्शरीरावयवा
न्वयेन सापिंड्यातिप्रसंगो न न कापि सपिंड इत्यत आह। याज्ञवल्क्यः॥ पंच

पात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा॥ सापिंड्यं निवर्त्तत इति विज्ञेयः॥ कूटस्थात्प्रा
रभ्यात्र गणना तदुक्तं वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः। पंचमी चेत्तयो
र्माता तत्सापिंड्यं निवर्त्तत इति। कूटस्थो मूलपुरुषः। यतः संतानभेदः॥ एवं च मा
तृपितृद्वारकसापिंड्यवतीनां कन्यकानामियं संख्या संकलना। वृद्धो वृद्धः पित
११३ रौ पितुश्च पितरौ तज्जन्मकं दंपती द्वंद्वं तस्य चतुष्कं सप्तकमतो यस्य क्रमात्स्यो
ज्झ्य॥ वंशारंभकदंपतिप्रभिति रित्यासप्तकक्षं रद्वाएकैकान्वयकन्यकाः पितृ ११३
कुले वा सप्तकक्षं ब्रुवे॥१॥ यद्यप्येकस्य ब [illegible] ह्वापि सुतास्युस्तदा। पीहतु।
संबंधसाम्यादेकैव गणितेत्यवधार्यतां॥२॥ एकस्मान्मिथुनात्सुतो थ
दुहिता द्वंद्वद्वयं तद्यातस्माद्द्वंद्वचतुष्कमष्ट च ततो तुःषोडशानोरद्वः॥
यावत्सप्तमकक्षमाग्निश्रान्तवः कन्याश्चैकान्वये तादंते गुणितार सैकरव
द्दशो नेशो सपिंडाः पितुः॥३॥ मातुर्जन्मदंपती च मिथुनं द्वंद्वं तयोः सागराः

तस्याः पंचमकक्षमश्वमिति रि। त्येकान्वयपुंसते॥ द्वंद्वाद्द्वंद्वयुगं ततो न्वय इतोष्टा पंचश्च
क्ष्यं शारक्षोण्यः सप्तगुणः शराग्नि विचयो मातुः सपिंडाः कुले॥४॥ कुलद्वयस्य कन्ये का
पुत्रा मिथः सपिंडकाः॥ हिमांशुदृग्वराद्दशो विवाहकर्मवर्जिता इति॥५॥ यवीयसीं
स्वापेक्षया वयसा वपुषा न्यूनां॥ अरोगिणी अचिकित्स्य राजयक्ष्मादिरोगरहि
तां॥ भ्रातृमतीमिति पुत्रिकाकरणशंकानिरस्त्यर्थं यत्र तु पुत्रिकाकरणशंकाभा
वन्निश्चयस्तामभ्रातृकामप्युद्वहेतु॥ असमानार्षगोत्रजां॥ ऋषेरिदमार्षं गोत्रप
वर्त्तकस्य मुनेर्व्यावर्त्तकः प्रवर इत्यर्थः॥ गोत्रं वंशपरंपराप्रसिद्धं। असमाने आ
र्षगोत्रे यस्य तज्जा मा न भवति तां। यस्कवाधूलमौनमूकानां भिन्नगोत्राणा
मपि भार्गववीतहव्यसावेतसेति प्रवरैक्यमस्ति तत्र विवाहो माभूदित्यस
मानार्षजा भिन्नमुक्तं। आंगिरसांबरीषयौवनाश्वेति मांधात्रंबरीषयौवना

श्चेति आंगिरसमांधातृप्रवरेष्वपि यौवनाश्वगोत्रेप्येतादृशो विवाहवारणाय समान
गोत्रजामित्युक्तं ॥ तथा च गोत्रप्रवरौ पृथक्पर्युदासे निमित्तभूतौ ॥ प्रवरे क्वचिद्विशेषमा
ह बौधायनः ॥ पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृग्वंगिरोगणेष्वेवं शे
षेष्वेकोपि वारयेदिति ॥ गोत्रप्रवरनिर्णयः सपिंडसप्रवरसगोत्रविवाहप्राय
११४ श्चित्तादि च महाग्रंथतोवसेयं विस्तरभियेह नोच्यते । सपत्नमातामहकुलेप्या
तिदेशिकात्सापिंड्यादविवाहः ॥ तथा च सुमंतुः ॥ पितृपत्न्यः सर्वा मातरः तद्भ्रा ११४
तरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि
भागिनेयानि । अन्यथा संकरकारिण्यः स्युरिति । अत्र यावद्वचनं वाचनिक
मिति न्यायेन परिगणितेष्वेवातिदेशिकं सापिंड्यं न तु पंचमसप्तमपर्यंतं । क्व
चित्तु वचनादेव विवाहनिषेधः ॥ यथा गृह्यपरिशिष्टे । अथ विवाहे त्वुपक्र

म्यमध्ये अविरुद्धसंबंधामुपयच्छेतेत्युक्तं तेदंपत्योर्मिथः पितृमातृसाम्ये विरुद्धसंबंधा
यथा भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसा चेति एवमेव विरुद्धसंबंधो विद्यते । तथा च
नारदः ॥ प्रत्यक्क्षाहो नैव कार्यो नैकस्मै दुहितृद्वयं ॥ नैवैकजन्मयोः पुंसोरेकजन्ये च कन्य
के ॥ नैवं कदाचिदुद्वाहो नैकदा मुंडनद्वयं ॥ अन्यत्रापि ॥ एकजन्ये तु कन्ये द्वे पुत्रयोर्नै
कजन्मनोः ॥ न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेति ॥ ॥ अथ वरगुणाः ॥ तत्र बु
द्धिमते कन्यां प्रयच्छेदिति गृह्ये ॥ कुलं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथतां
च ॥ एतान्गुणान्सपरीक्ष्य देया कन्या बुधैः शेषमचिंतनीयं । अन्योपि गुणदोष
विचारो ग्रंथांतरादवसेयः ॥ अन्यच्च । कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं । पु
त्रोद्वाहान्नैव पुत्री विवाहोपि ऋतुत्रये ॥ अब्दांतरान्मुंडनं च नैकदा मुंडनद्वयं ॥ अ
ब्दभेदे तु न दोष इति संहितासारावल्यां ॥ फाल्गुने चैत्रमासे च पुत्रोद्वाहोपनायने ॥

भेदाद्वृद्धस्य कुर्वीत नर्तुत्रयविलंबनमिति इत्यादि। देयकन्याकालो महाग्रंथतो
ज्ञेयः॥ वधूवरयोर्बृहस्पत्यादिशुद्धिर्विवाहे कालशुद्धिर्वर्णवश्यादि घटनातेषु
साधकबाधकव्यवस्था च ज्योतिषग्रंथेभ्यो विवेचनीयेति दिक्॥ तथा ज्येष्ठमासे
ज्येष्ठगर्भस्य जन्मा॰ आद्ये च सर्वेषां मंगलकार्यं निंदितं। रत्नकोशे। जन्मर्क्षे जन्म
११५ दिवसे जन्ममासे शुभं त्यजेत्। ज्येष्ठमासाद्यगर्भस्य शुभं वर्ज्यं स्त्रिया अपीति॥
अथ कन्यादातारः। तत्र याज्ञवल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी ११५
तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ अप्रयच्छन्समाप्नोति भ्रूणह
त्यामृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं। सकुल्यः प्रत्यासत्ति
क्रमेण ज्ञेयो पितृकुलस्य तदभावे मातामहकुलस्य। सर्वाभावे जननी। प्र
कृतिस्थः उन्मादादिदोषहीनः। गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तं। नार
दोपि। पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः। मातामहो मातुलश्च स

कुल्यो बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते। तस्यामप्रकृतिस्था
यां कन्यां दद्युः स्वजातयः। यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेदिति॥ अथ वि
वाहभेदः॥ मनुः। ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः। गांधर्वो राक्षसश्चै
व पैशाचश्चाष्टमो मतः॥ एतेषां लक्षणं फलं चालंकृत्य कन्यामित्यादि ग्रंथांतरेवगं
तव्यं॥ एतेषां व्यवस्था स्मृतौ। चत्वारो ब्राह्मणस्याद्या राज्ञो गांधर्वराक्षसौ। राक्षस
श्चासुरो वैश्ये शूद्रे चांत्यस्तु गर्हितः॥ अंत्यः पैशाचः। गांधर्वादिष्वपि भार्यापति
भावाय पश्चाद्धोमादिसप्तपदीतं कार्यं॥ गांधर्वासुरपैशाचा विवाहा राक्षस
श्चयः॥ पूर्वं परिणयं हस्ते पश्चाद्धोमो विधीयते इति परिशिष्टात्। होमाद्यभावे वरां
तरदेयाः सतितु नेति बौधायन आह॥ बलादपहृता कन्या मंत्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव ति॥ बलादिति छलादेरप्युपलक्षणं।

इत्यादि सर्वं विचार्य परिवित्तिपरिवेत्तृदिधिषूदिधिषूत्वादि च यथा न स्यात्तथा वि
चार्य विवाहः कार्यः। अस्माभिरत्र विस्तारभीतेर्न लिख्यते ॥ ॥अथ मुख्यब्राह्मवि
वाहांगभूतवाग्दानविधिः गृह्यपरिशिष्टाचारसंमत्योच्यते॥ ज्योतिर्विदादिष्टे
विवाहनक्षत्रादियुते शुभकाले द्वौ चत्वारोऽष्टादश वा प्रत्रास्त्ववेषाः वरेण तासि
त्रादिना वा अनृक्षरा ऋजवः संतु पंथेति प्रहितास्तावतीभिः पुरंध्रीभिर्मंगल
११६ गीततूर्यैश्च सहत्रा कुनदर्शनपूर्वकमलंकृता वरपुतास्तद्युताश्च कन्यागृहमु
पेत्य शुभे सवस्त्रपीठासने प्राङ्मुखीं सालंकारां सुवेषां कन्यामुपवेश्य तदुत्संगे फलं
तांबूलादि दत्वा तत्पित्रादिपुरतः श्रीगणपत्यादिस्मरणपूर्वकं प्राङ्मुखासीना
प्रत्यङ्मुखा वा अमुकप्रवरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रा
यामुकपुत्रायामुकनाम्ने वरायामुकप्रवरोपेताममुकगोत्रोत्पन्नाममुक
प्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नीं कन्यां भार्यात्वाय वृणीमह इति ब्रूयुः

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारकम्

अथ दाता भार्याज्ञातिबंध्वनुमतिं कृत्वा यथोक्तमनूघानन्नघ वृणीध्वमिति
वदेत्॥ एवं पुनर्द्विः॥ प्रयुज्य प्रदास्यामीति चोच्चैस्त्रिर्वदेत्। ततो वरपित्रादि
गंधाक्षतशुभवस्त्रसुगंधभूषणतांबूलपुष्पादिभिः कन्यां पूजयेत्संप्रदाया
गतमंत्रैः। ततः कन्यादाता प्राङ्मुखः कन्यां वामत उपवेश्याद्यदेशकालौ स्मृ
त्वा करिष्यमाणविवाहांगभूतं वाग्दानमहं करिष्ये तदंगगणपतिपूजनं करि
ष्य इति संकल्प्य गंधादिदक्षिणांतैर्गणपतिं पूजयित्वा यथाचारं कलशपूजा
दि कृत्वा स्वस्थाने कन्यापूजयितारमुपवेश्य स्वयं तत्प्राच्यां प्रत्यङ्मुख उपवि
श्य गां च तांबूलदानादिना पूजयेत्स च दातारं। ततो दाता आचारतो हरिद्रा
खंडं पंच षट् पूगीफलानि च गंधाक्षतालंकृतानि गृहीत्वा अमुकप्रवरा

न्वितायामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकनाम्नेवरा
यामुकगोत्रामुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नीमिमां कन्यां ज्यो
तिर्विदादिष्टमुहूर्ते दास्ये वाचा संप्रददे इति वाचा ॥ अव्यंगे पतिते क्लीबे दश
दोषविवर्जिते । इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ ॥ वितिवरैरपि त्रादि
११८ वस्त्रप्रांते तानि पूगीफलानि प्रक्षिप्य प्रतिष्ठामंत्रेणानदस्विल्यादिना वस्त्रेव ११८
ध्वा ग्रंथिं चंदनेन चर्चयेदित्याचारप्राप्तं ॥ ततो हरिद्राखंड पंचपूगीफलानि
तथैव वरपित्रादिः ॥ हीलामुकगोत्रामुकप्रवराविषये भवंतो निश्चिताभ
वंत्विति दातृवस्त्रप्रांते प्रक्षेपादि कुर्यात् ॥ ततो दाता । वाचा दत्ता मया कन्या
पुत्रार्थं स्वीकृता त्वया ॥ कन्यावलोकनाद्विजौ निश्चिंतः स्वस्थः सुखी भवेति व
रपितरं प्रतिपठेत् ॥ स च । वाचा दत्ता त्वया कन्या पुत्रार्थं पुत्रार्थं स्वीकृता मया ॥

वरावलोकनाद्विजौ निश्चिंतः स्वस्थः सुखी भवेति दातारं प्रतिपठेत् ॥ स्वात्रादो
स्वीकर्त्तरि श्वात्रर्थे मित्रार्थमित्यूहः कार्यः ॥ ततो ब्राह्मणाः शिवा आपः संतु
सौमनस्यमस्तु । अक्षतं चारिष्टं चास्तु । दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्चास्तु । एतद्वः सत्यम
स्त्विति उक्त्वा समानीव आकूतिः ० । प्रसुग्मंताधियं ० इति मंत्रौ पठेयुः । ततो दाता पात्रस्थ
सिततंदुलोपरि पुंजे शचीमावाह्य षोडशोपचारैः पूजयेत् । तां च कन्येवं प्रार्थयेत् । देवेंद्राणि
नमस्तुभ्यं देवेंद्रप्रियभामिनि । विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे ॥ ततः पुरंध्री स्त्रि
नीराजनादि मांगलिकं कार्यं । विप्राश्चाक्षता दूर्वादिना परिजिता आशिर्मंत्रान्पठेयुः । तेच
हिरण्यवती ० । ऋ २ समिद्धस्य ० ० ऋ १ वनस्पतेशतवल्शो ० १ इंदुर्देवानां ० १ अस्यापिब शु
मतः ० ऋ १ घृतवतुल सं ० ऋ १६ तिसौभाग्याय पद् । तदस्तु मित्रावरुणा ० ऋ ० गरुडावे प्रतिष्ठा ०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इत्याद्यप्यत्र॥ इति वाग्दानविधिः॥ ततो वैवाहिके शुभे मुहूर्ते वधूवरयोस्तैलहरिद्रारोपणादि य
थाचारं कार्यं॥ वाग्दानोत्तरं देशांतरगते वरे नारदः। प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरं। मरणे च वसिष्ठः। अद्भिर्वाचा च दत्तायां म्रियेताथो
१९८ वरो यदि। न च तौ दंपती स्यातां कुमारी पितुरेव सा। यस्मै वाग्दत्ता तस्य दोषयोगे परास्त
न वरांतरलाभे च तस्मै देया। इत्याह याज्ञवल्क्यः। दत्तामपि हरेत्पूर्वां श्रेयांश्चेद्वर आ
व्रजेत्॥ अत्र स्यैः पूर्वस्य च दोषयोग इति विज्ञानेश्वरः। प्रतिश्रुत्याप्यधर्मेण संयुक्ता
यन्न दद्यादिति स्मृतिः। अन्यथा हरणे तु स एव दंडमाह। सकृत्प्रदीयते कन्या हरंस्तां स
दंडभागिति॥ विवाहमंडपमाह वसिष्ठः। षोडशारत्निकः कार्यश्चतुर्द्वारोपशोभितं। मंडपं तो ११८
रणैर्युक्तं तत्र वेदिं प्रकल्पयेत्। अष्टहस्तं तु रचयेन्मंडपं वा द्विषट्करं। द्विषट्करं द्वादशकरं।